॥ विवादचिन्तामणिः ॥

॥ श्रीवाचस्पतिमिश्रविरचितः ॥

॥ श्रीरामचन्द्रविद्यावागीशशोधितः ॥

॥ साधारणविद्यारक्षार्थकसमाजाधिपतीनामाज्ञया ॥

कलिकाताराजधान्यां सारसुधानिधिमुद्रायन्त्रे मुद्रितोऽयं

॥ संवत् १९३४ शाके १७९९ वैशाखे ॥

॥ इति विवादचिन्तामणिः सूचीपत्रं ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ विवादचिन्तामणिः ॥

धीराः श्रीहरिनारायणा निरुपमपरिपन्थि प्रोद्यमद्भूमिभङ्गीम
कुर्वन्काटावैरित्रिभुवनभवनां श्रीभया नवभीतिं। देवः पार
पारात्कुसुमशरशरीरशासद्धातभावः सद्यः स्निग्धत्वेन
कमलमुखीमादधानः करेण ॥ १ ॥ श्रीमत्यकल्पद्रुमपारि
रत्नाकरादीनवलोक्य यत्नात्। वाचस्पतिः श्रीमतिनम्रमे
र्विवादचिन्तामणिमातनोति ॥ २ ॥

अथ विवादपदानि तत्र मनुः तेषामाद्यमृणादानं निः
[illegible] च समुत्थानं दत्तस्यानपकर्म च ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवा
दः स्वामिपालयोः॥ सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयञ्च साहसञ्चैव स्त्रीसंग्रहणमेव च ॥ स्त्रीपुंधर्मो विभागश्च
द्यूतमाह्वय एव च पदान्यष्टादशैतानि व्यवहारस्थिताविह॥

अथर्णादानं। तत्र नारदः ऋणं देयमदेयञ्च येन यत्र
यथा च यत्। दानग्रहणधर्माश्च ऋणादानमिति स्मृतं॥ स्थान
लाभनिमित्तं यद्दानग्रहणमिष्यते। तत्कुसीदमिति प्रोक्तं तेन
वृत्तिः कुसीदिनां ॥ स्थानमवस्थानं मूलधनस्य तन्निमित्तं

लाभो वृद्धिस्तदर्थं दानग्रहणं द्रव्ये कर्म व्युत्पन्ने तेन मूलावस्थान एव लाभनिमित्तं धनिकेन दत्तमधमर्णेन च तथाभ्युपेत्य गृहीतमृणमित्यर्थः कलाप्रयुक्ते तु तुल्यत्वाद्गौणप्रयोगो नहि तेन वृत्तिः गुणस्थावस्थापाकरणीयत्वमिति न्यायचतुर्थाध्याये स्पष्टं। यस्यैव दानं तस्यैव तज्जातीयस्य वा ग्रहणं अत एव वाणिज्यार्थप्रयुक्तस्यापि न ग्रहणत्वं। बृहस्पतिः कुत्सितात्सीदतश्चैव निर्विशङ्कैः प्रगृह्यते। चतुर्गुणं वाष्टगुणं कुसीदाख्यमृणं ततः॥ वा कारोऽनास्थायां कात्यायनः न स्त्रीभ्यो दासबालेभ्यः प्रदद्यात्किञ्चिदृतं। दाता न लभते तत्तु तेभ्यो दत्तं तु यद्वसु॥ उद्धृतमुद्धारः

तत्र प्राप्तिहेतुमाह बृहस्पतिः परिपूर्णं गृहीत्वाधिं बन्धं वा साधुलग्नकं। लेख्यारूढं साक्षिमद्वा ऋणं दद्याद्धनी सदा॥ अथाविश्वासशेषां करणं अयमुपदेशः आधिर्बन्धः बन्धो ऽत्र भेगलाभादन्यतुरर्थादि अतो भेदः। किं रूपो लाभस्तत्र मनुः वशिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्द्धिनीं। अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शते॥ वशिष्ठः वशिष्ठवचनप्रोक्तां वृद्धिं वार्द्धुषिके शृणु। पञ्चमाषांस्तु विंशत्यामेवं धर्मो न हीयते॥ विंशतिः पणानां॥

माषे बृहस्पतिः माषो विंशतिभागस्तु पणस्य परिकीर्तितः। माषोऽत्र षोडशरक्तिकः तेन चतुःसुवर्णपरिमितपलविंशतितमे न माषेण षोडशरक्तिकावच्छिन्नमाषपञ्चकेन सुवर्णेनैको वृद्धिर्भवति तत्र विंशतिपणस्याशीतितमो भागो भवति एवमशीति[illegible] को लाभो भाति मनूक्तेन तु माषपञ्चकेन [illegible]

सुवर्ण एकोवृद्धि

भागोवृद्धिः

स्यवचनात्।

शके। निरःधा

मसः शाष्टभाग

तितमभागस्ते

का वृद्धिः नि

मासेन द्वौ सु

मनुः द्विकं

तृतीयाद्दर्णा...नुपूर्वशः॥ द्विकं शतं हि वृद्धाणीन भवत्यर्थ
किल्बिषी। सम्बन्धकादावप्येवं वर्णक्रमेणोत्कर्षः तेन ब्राह्मणे या
वृद्धिः सा क्षत्रिये सार्द्धा वैश्ये हि द्विगुणा शूद्रे सार्द्ध द्विगुणा
एतन्मनुवाक्यादुक्तप्रकारवृद्धिग्रहणे वैश्यस्य तथापदि ब्राह्मणा
दीनामपि नाधर्म्मः अतिरिक्तकारितादिवृद्धिग्रहणे तु पीडाक
रत्वादधर्म्मः अनापदि तु वैश्येतरेषां त्रयाणामुभयथाप्यधर्म्मः।
हारीतः पुराणे पञ्चविंशत्यां मासेऽष्टपणा वृद्धिः। एवं षड्मासै
श्चतुर्भिर्वर्षैर्गतैर्द्विपर्य्यासं सन्तिष्ठते एषा धर्म्या वृद्धिर्नानया
धर्म्मात् च्यवते एवं पञ्चाशता मासैर्द्विगुणीभूतं ततोन वर्द्धतेधन
मित्यर्थः॥

वृद्धिः कान्या कतिविधा वा तत्र वृहस्पतिः वृद्धिश्चतुर्विधा
प्रोक्ता पञ्चधान्यैः प्रकीर्त्तिताः। षड्विधान्यैः समाख्याता तत्वतस्तां
न्निबोधत॥ कायिका कालिका चैव चक्रवृद्धिस्तथा परा। कारि

ह्यवा ह्यकर्मैरुता
णो ग्रघत्यणार्द्धा
नाग्नथति ग्रग्न
ह्ना युधे घाद्र:
र्द। अत्र व्याभि
ा तु नद्विनैति
मता। चकुंरपि
ोमतु या वृद्धि
व्या कारिता
तु सा ॥ अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चन। अन्य
थेति वलेन स्वीकारितेत्यर्थः। वृहस्पतिः प्रत्यहं गृह्यते या तु
शिखा वृद्धिस्तु सा स्मता। शिखेव वर्द्धते नित्यं शिरश्छेदान्निवर्त्तते॥
मूले दत्ते तथैवैषा शिखावृद्धिस्ततः स्मृता। गृहक्षेत्रैः फलः
क्षेत्राद्भोगलाभः प्रकीर्त्तितः॥ गृहस्य भोगः भाटकं शयनादि
आधिभूतात्क्षेत्रात् शस्यादिफललाभः सद्दृत्तु गतौ सदृशा
दने इति धात्वनुसरणात् अयञ्चाधिभोग इत्युच्यते प्रयत्नाण
श्चैतत् तथा च कात्यायनः आधिभोगस्त्वशेषेण यो वृद्धिः परि
कल्पितः। प्रयोगो यत्र चैवं स्यादाधिभोगः स उच्यते॥ तस्य भोग
एव वृद्धिरिति यत्र व्यवस्था स आधिभोगः कायिका वाचिकी
कालिका मासिकी चक्रवृद्धिः वृद्धिवृद्धिः कारिता आपदि स्वी
कृता शिखावृद्धिः प्रात्यहिकी भोगलाभो दासादिभोगः अय
पञ्चमप्रथमवत्सेषु वृहस्पतिः शिखावृद्धिं कायिकाञ्च भोगला

भक्ष्यैव च। धनी तावत्तमादद्याद्यावन्मूल्यं न शोधितं ॥ एषु
द्विगुणादिरूपाः परमवृद्धेरधिकापि वृद्धिरतिचिरावस्था
ने ग्राह्येत्यर्थः ॥

आधिभोगान्तरिकन्तु त्रिपुरुषोर्द्धं न देयं तदाह याज्ञवल्क्यः
ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु । आधिस्तु भुज्यते ताव
द्यावत्तन्न प्रदीयते ॥ एवञ्च ऋणिकप्रपौत्रेणापि सबन्धकमूलं
देयमिति भावः। उत्तमर्णो दद्यादित्यनुवृत्तौ विष्णुः अन्यवृद्धौ
प्रविष्टायामपि स्थावरमाधिम्दते वचनात् ॥ अन्यवृद्धौ प्रविष्टा
यामपि मया तावद्भोक्तव्यमित्येवं रूपाङ्गीकारवचनादृते तमाधिं भोग
वृद्ध्यारूढेऽपि स्वत्वं न दद्यादित्यर्थः। याज्ञवल्क्यः यदा तु द्विगुणी
भूतमृणमाधौ तदा खलु। मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे
धने ॥ इदन्तु विप्रतिपत्तिकस्य तथाभ्युपगमपरमेव विष्णुवचनेन सचैक
मूलकल्पनालाघवात्। षट्सु वृद्धिषु चतुष्टयी वत्सरादूर्द्धं न ग्राह्या
तथा च गौतमः नातिसंवत्सरीं वृद्धिं न चादिष्टां पुनर्हरेत् ।
चक्रवृद्धिः कालवृद्धिः कायिका कारिता तथा ॥ वृहस्पतिना
चक्रवृद्धावधिकं कायिकाया ग्रहणमुक्तं तन्नारदीकायाख्या
एव मूलधनच्छेदकायाविरोधित्वात् गौतमोक्तालियं कायिका
शरीरनिर्मिता दासादिभोगरूपान्या वृहस्पतिवचनैकवाक्य
तावत्तादृतेन स्वादीनां वत्सरपर्यन्तमेव दोहनादि । एतदपि
चतुष्टयं पुनरङ्गीकारे देयमेव न चादिष्टां पुनर्हरेदिति वचनात्
श्रीमदारः वृद्धिगुणाधिकवृद्धिग्रहणं यच्चक्रवृद्धिग्रहणं यच्चपूर्व्व
वृद्धीनरूपा मूलाद्द्विगुणे धने प्रविष्टे पुनः सवृद्धिमूलधनग्रहणं

सद्धर्म्मार्थं न तु न भवत्येवेति पूर्वलिखितवृहस्पतिवचनविरुद्धत्वात् अतएव वृहस्पतिः भोगो यद्द्विगुणादूर्द्धं चक्रवृद्धिश्च गृह्यते। मूलं च सोदयं पश्चाद्वार्द्धुष्यं तच्च गर्हितं ॥ द्विगुणाधिकवृद्धिग्रहणं वृद्धेर्वृद्धिग्रहणं वृद्ध्या सह मूलमधिकीकृत्य मूलत्वेनैव तद्ग्रहणं एतत्त्रयं निन्दितमिति गृहस्थरत्नाकरः ॥

अथायाचितवृद्धिस्तत्र कात्यायनः कृत्वोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्। ऊर्द्धं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥ उद्धारो निष्कासनं अत्र याचिते मासत्रयोपरि वृद्धिः। पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत्। ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्॥ निःक्षिप्तं वृद्धिशेषञ्च क्रयविक्रयमेव च। याच्यमानो न चेद्दद्याद्वर्द्धते पञ्चकं शतं ॥ क्रयः क्रेयं विक्रयो मूल्यं अत्रापि ऋतुत्रयमनुवर्त्तते तेन न्यासे वृद्धेः शेषे पण्यमूल्ये पण्ये चादत्ते याचिते ततः पञ्चमासानन्तरं पणशते पञ्चपणात्मिका वृद्धिः शूद्रेण देया द्विकं त्रिकमित्याद्येकवाक्यताबलात्। कात्यायनः प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितं याच्यमानं न चेद्दत्तं वर्द्धते पञ्चकं शतं॥ प्रीतिदत्तं प्रीत्या प्रातयिकं दत्तं अत्र मासत्रयोपरि वृद्धिः पूर्वलिखितकात्यायनैकवाक्यताबलात्॥ नारदः न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्। अनाकारितमप्यूर्द्धं वत्सरार्द्धाद्विवर्द्धते ॥ दत्तानामिति दानमत्र मर्पणमात्रमतो न मासत्रयोपरीत्यनेन पूर्व्वोक्तेन सह विरोधः तथा यो याचितकमादाय तददत्त्वा दिशं व्रजेत्। ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्॥ देशान्तरगमनञ्चात्राविवक्षितं

यथा चोक्तं स्वदेशस्थोऽपि वा यस्तु न दद्याद्याचितोऽसकृत् । सत
चाकारितां वृद्धिमनिच्छन्नपि चाहरेत् ॥ एतत्तु सर्व्वकालेन
दानासम्पादने बोध्यं ॥

यदा कृतं विनैव कार्य्यातिशयादन्यत्र गतस्तदाह विष्णुः
वृद्धिं दद्युर[illegible]मपि वत्सरातिक्रमे यथा विहितां ॥ वत्सरा
तिक्रमे वत्स[illegible]र्द्धमित्यर्थः सर्व्वमिदं मूल्यनिःक्षेपादिकं निःक्षे
पादिस्वामि[illegible]याचितमदत्तं कस्मनाऽर्द्धाब्दोत्तरं अच्छिन्नाल
दत्तमब्दोत्तरं वर्द्धते इति समुदायार्थः। पण्यं मूल्यं भृतिर्न्यासोद
ण्डो यच्चाभि[illegible]रिकं। वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः॥
प्रतिभाव्यमथव[illegible]पिता वृद्धिर्न भवतीत्यर्थः। कात्यायनेन तु यन्निः
क्षेपमूल्ययोर[illegible]पि वृद्धिरुक्ता तच्छलना प्रवेशितपरं ॥ दण्डो
व्यर्थं। भृति[illegible]तनं आभिसारिकं छलेन बलेन वा गृहीतं वृथा
दानं धर्म्ममुद्दिश्य दातुमुक्तं आक्षिकपणो द्यूतादिजितं। संवर्त्तः
न वृद्धिः स्त्रीधने लाभे निःक्षेपे च तथा स्थिते। संदिग्धे प्राति
भाव्ये च [illegible]दि न स्यात्स्वयं कृता ॥ स्त्रीधनं प्रीतिव्ययितं तथा
भर्त्तृपुत्राद्यनुज्ञा सएवाह यदि त्वेकतरोऽमीषां स्त्रीधनं भक्ष
येदृणात्। सवृद्धिं प्रतिदाप्यः स्याद्विनयश्च समाप्नुयात् ॥ तदेव
यदनुज्ञाप्य भक्षयतीतिपूर्व्वकं। मूलमेव सदाप्यः स्याद्यदा भक्ष
णवान् भवेत् ॥ व्यासः प्रातिभाव्यं भुक्तवान्समगृहीतश्च दितवत्। न
वर्द्धते अपक्वस्य दण्डः शुल्कं प्रतिश्रुतं॥ प्रातिभाव्यं द्विगुणमेव देयं
स्यादप्रकल्य च। न पुनर्द्विगुणाधिकं भवतीत्यर्थः। अपक्वोधनिक
वशीभूतः अन्योन्यागाधिः शुल्कं पणीकृतं प्रतिश्रुतं दातुमङ्गी

क्तं एतच्च वृथादानपरं तद्याचकनारदवचनैकमूलकल्पनालाघ
वादितिप्रतिभाति। याज्ञवल्क्यः दीयमानं न गृह्णाति प्रयुक्तं यः
स्वकं धनं। मध्यस्थस्थापितं तत्स्याद्वर्द्धते न ततः परं॥ गौतमः
न वर्द्धतेऽवरुद्धस्य॥ अवरुद्धस्य ऋणमवरोधादिना न वर्द्धते॥

चिरकालावस्थाने कियद्दूरं वर्द्धते तत्र गौतमः। चिरावस्था
ने द्वैगुण्यं प्रयोगस्य॥ द्वैगुण्याद्यर्द्धकालेऽपि द्वैगुण्यमेव इदञ्च
सुवर्णादौ॥ अत्र विशेषमाह मनुः कुसीदवृद्धिर्द्वैगुण्यं नात्येति स
कृदाहृता। धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चतां॥ सकृ
दाहृते सुवर्णादौ द्विगुणैव धान्यादौ पञ्चगुणैव वर्द्धते। एव
मासकृद्ग्रहणे त्वधिकापि। रत्नाकरस्वरसोऽप्येवं कृदौ काधी
काधिकायां स्फुटएव। एवञ्चाचितेत्यपपाठः। [illegible] कर्मानर्हा
दि सदः भक्ष्यं लवो लवनीयं लोमादि वाह्यं विके विक्रेयं मणिमुक्ता
प्रवालानां सुवर्णरजतस्य च। तिष्ठति द्विगुणा वृद्धिः फालकीटा
विकस्य चेत्यष्टवादकात्यायनवचनात् कीटं कीटभवं॥ गौतमः
कुसीदं पशूपजलोमक्षेत्रवाह्येषु नातिपञ्चगुणं॥ पशूपजं
घृतं विहाय दुग्धादि। तैलानामथ सर्व्वेषां मद्यानामथ
सर्पिषां। वृद्धिरष्टगुणा प्रोक्ता गुडस्य लवणस्य चेति कात्या
यनवचनात्॥ वृहस्पतिः हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्र
कुप्यके। धान्ये चतुर्गुणा प्रोक्ता सस्यवाहलवेषु च॥ सदो धा
न्यातिरिक्तं क्षेत्रभवं फलादि। विष्णुः रसस्याष्टगुणा सन्त
तिस्त्रीपशूनां॥ वृहस्पतिः उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गु
णा स्मृता। लवणस्नेहमद्येषु वृद्धिरष्टगुणा स्मृता॥ गुडे मधुनि

[illegible]नोक्ता प्रयुक्ते चिरकालिके। एवमष्टगुणता लवणादि विषयैव विशेषवाक्येनैव तस्यास्तत्र विधानात् अन्यत्र त्रिगुणता वशिष्ठोक्ता यथा द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च तुलाधृतमष्टगुणं। इयमष्ट गुणता सुवर्णादिव्यतिरिक्तविषया तेषां वृद्धिविशेषस्य विशेष वाक्येन विधानात्। बृहस्पतिः तृणकाष्ठेष्टकासूत्रकिण्वपर्णास्थि चर्मणां। हेतिपुष्पफलानाञ्च वृद्धिस्तु न विधीयते॥ किण्वं पैष्टी मूलं चेतिरत्नं एतच्चाकृतवृद्धिनिषेधार्थं कार्य्यवशात्तु वृद्धिर ङ्गीकृता भ[illegible]। अतएव कालकैटाविकस्य चेति पुष्पमूलफला नि चेति का[illegible]नवशिष्ठाभ्यां द्विगुणत्रिगुणवृद्धिकथनं। धान्ये ऽधिकवृद्ध्यर्थाभूल्यानुसारेण तेन प्रयोगकाले अल्पोत्पत्तेः धान्यादेश्च मूल्यं अल्पोत्पत्त्यनन्तरं तस्याल्पकाले द्विगुणं ततोऽ धिककाले त्रिगुणं ततोऽधिककाले चतुर्गुणं ततोऽधिककाले पञ्चगुणं। एतच्च सर्व्वगुणवृद्धिकथनमृणमात्र एव कालानार म्भानुपा[illegible]नात्। तदाह हारीतः स्वर्णे तु द्विगुणं धान्यं त्रिगुण मेव च वर्द्धते। मूल्यानुसारेणैव वृद्धिव्यवस्थां मनुरपि दर्शयति समुद्रयानकुशला देशकालार्थदर्शिनः। स्थापयन्ति च यां वृद्धिं सा तत्राधिगमं प्रति॥ समुद्रयानस्याभ्यातिशयं ज्ञात्वाधिकां कलां कुर्व्वीरन्। एतद्विषयव्यवस्थार्थं हारीतोऽपि पुराणे पणिकं काय वृत्त्यादिति। नारदोऽप्युक्तवान् ऋणानां सार्व्वभौमोऽयं विधि र्वृद्धिकरः परः। देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते॥ द्विगु

णं त्रिगुणञ्चैव तथान्यस्मिंश्चतुर्गुणं । तथाष्टगुणमन्यस्मिन् देयं देशे च तिष्ठति॥ अन्यस्मिन् देशेऽन्यस्मिन् काले यावता प्रस्थं लभ्यते उत्पत्तेः प्राक् तावतैव प्रस्थचतुष्टयं उत्पत्तौ लभ्यत इति देशकालज्ञानं । यत्र द्वैगुण्यादिलाभस्तत्र वर्षक्रमेणैवास्तु अस्तु वा आशस्थाने न्यूनं द्वित्रैरपि मासैस्तत्र द्विगुणं धनापगमे तु त्रिगुणं धान्यं पुराणे तु मासेन पणो वृद्धिरिति सङ्करजातिपरमिति रत्नाकरः । धान्ये त्रिगुणपञ्चगुणत्वे कालभूमीति शिष्टाः ॥

अथाधिविधिः ॥ तत्र नारदः. अधिक्रिय[illegible]वाधिः स विज्ञेयो द्विलक्षणः । कृतकालोपनेयश्च यावद्देये[illegible] ॥ तथा उपचारस्तथैवास्य लाभहानिर्विपर्यये । प्रमादाद्धनिकस्य दआधौ विकृतिमागते ॥ विपर्ययो नाशः विकृतिर्भग्नत्वादि । धनिदोषेणाधेर्नाशे विकृतौ वा लाभहानिरित्यर्थः । कात्यायनः गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते ॥ मनुः नत्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ॥ सोपकारे भुक्ते कृताधिभोगमात्रस्यैव वृद्धिहानौ तन्नतया हापितस्य केवलनाशे हेतुः तेन कस्याप्याधेर्धनिकदोषेण व्यवहाराक्षमत्वेऽपि वृद्धिहानिरित्यर्थः । तथा यः स्वामिनाननुज्ञातमाधिं भुङ्क्तेऽविचक्षणः । तेनार्द्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः ॥ अक्षाममननुज्ञातमाधिं यः कर्म्म कारयेत् । भोक्ता कर्म्मफलं दाप्यो वृद्धिं वा न लभेत सइति कात्यायनवचनात् । अनिर्वर्तितभोगे सर्व्ववृद्धिहानिः आधीकृतदासाद्यपेक्षितभोगत्वं च गोप्या

धिभोगे तु सर्व्ववृद्धिहानिः। नारदः विनष्टे मूलहानिः स्या
द्दैवराजकृतादृते ॥ बृहस्पतिः भुक्ते चासारतां प्राप्ते मूल
हानिः प्रजायते। बद्धमूल्यं यत्र नष्टऋणिकं तत्र तोषयेत् ॥
अवृद्धिस्वस्वविषयकमेतत्। व्यासः गृहीतृदोषान्नष्टश्चेदन्यो देया
दिको भवेत्। ऋणं सलाभं संग्राह्य तन्मूल्यं दाप्यते धनी ॥ बृह
स्पतिः दैवराजोपघातेन यत्राधिर्नाशमाप्नुयात्। तत्रान्यन्दा
प्यते बन्धं शोधयेद्वा ऋणं ऋणी ॥ नारदः रक्ष्यमाणोपि चे
दाधिः कालेनेयादसारतां। आधिरन्योऽथवा कार्य्योदेयं वा
धनिने धनं ॥ विष्णुः गोचर्म्ममात्रामपि भुवमन्यस्य आधिकृतां
तस्मादनिर्मोच्यान्यस्य यः प्रयच्छति सवध्यः हीना चेत् षोडश
सुवर्णान् दण्ड्यः। उत्तराधिनं सिद्धातीत्यर्थः। पारिजातरत्ना
करस्मृतिसारादयोप्येवं। एवञ्च स्वामिकृतस्तद्विक्रयो निराबाध
इति द्रष्टव्यं। विष्णुः एकोऽश्नीयाद्यदुत्पन्नं नरः संवत्सरं फलं।
गोचर्म्ममात्रा साक्षेपी स्तोका वा यदि वा बहुः। तथा ययोर्नि
क्षिप्तआधिस्तौ विवदेतां यदा नरौ। यस्य भुक्तिर्जयस्तस्य बला
त्कारं विना भवेत् ॥ तुल्यकालोपभोगो चेत् भोगोपि समको
भवेत्। प्रदाने विक्रये चैव विधिरेषप्रकीर्त्तितः ॥ एतच्च प्रायिकं
उभयत्र दृष्टे मानतोऽन्येऽदृष्टेन नि[illegible]यः। कात्यायनः नश्येद्भूमि
करोषेण निष्पतेत म्रियेत वा। आधिमन्यं सदाप्यः स्यान्न
सानुच्येत नर्णिकः ॥ गवादौ बन्धकावस्थायां दैवान्नष्टे मूल
हानिरित्याचारादिगीतव्यवहार एव मूलं। तथा आधाता यत्र
नष्टः स्यात्क्रमात् बन्धं निवेदयेत्। राजकृतः सविज्ञातो विक्रेय

इति धारणा ॥ सवृद्धिकं गृहीत्वा तु शेषं राजन्यथार्पयेत् । बृहस्पतिः यत्नाद्रक्षितं वृद्धिश्च भोगेन प्रकर्षान्वितं । तत्रर्णी नाप्नुयाद्द्रव्यं धनी चैव ऋणं तथा ॥ भोगे भोगनिमित्तं च प्रकर्षान्वितं न पूर्णावधिकं । पूर्णे प्रकर्षे तत्साम्यमुभयोरपि कीर्त्तितं । अपूर्णे तु प्रकुर्य्यातां परस्परमतेन तौ ॥ प्रकर्षेऽवधौ मनुः न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ॥ कालसंरोधः चिरकालावस्थानं निसर्गोऽन्यत्र एतदधिकधनेन आधीकरणं न दानमिति तु हलायुधः । न निसर्गो न विक्रयः उत्तमर्णेन कर्त्तव्यइति शेषः ॥ अन्ये तूत्तमर्णस्य स्वत्वाभावेन प्रसक्त्यभावान्निषेधो न युक्तः अतः संरोधादवधिकालाति क्रमणात्तदभ्यन्तरे व्याख्यातत्वादधमर्णेन निसर्गोऽन्यस्मै दानं विक्रयश्चाधेर्न कर्त्तव्यइति वाक्यार्थमाहुः । आधी[illegible] न्यत्र विक्रयो बलवानिति तु तादृशावधिरहिताधिपरं [illegible] [illegible] चैवाधेर्न दानं न च विक्रयइति तु निर्मूलं । [illegible] वाक्यं भोग्याधिविषयमिति कल्पतरौ प्रायोवादः ॥ [illegible] [illegible]न्यादकृतव्यवस्थगोप्याधिविषयत्वस्यापि सम्भवात् ॥

अथ प्रतिभूः ॥ तत्र बृहस्पतिः दर्शने प्रत्यये दाने ऋणि द्रव्यार्पणे तथा । चतुःप्रकारः प्रतिभूः [illegible] [illegible] र्पणे दाने इति सम्बधः । अर्पणमत्र याचितकविषयं तेन यत्किञ्चित् केनचित् प्रार्थ्यमीतं तत्रापरो वदति यद्ययं नानी यार्पयति तदा मयार्पणीयमिति तेन तत्रार्पणमात्रं न दानं [illegible] तु दानमेव दद्यादिति भेदः । सम्प्रदायस्तु ऋणिद्रव्या

र्णीते इति पठित्वा ऋणिद्रव्यस्य धनिकार्पणे इत्यर्थमाह।
तथा आदेको दर्शयाम्येनं साधुरेषोऽपरोऽब्रवीत्। दाताहमेतद्
वित्तमर्पयाम्यपरो वदेत्। आद्यौ तु वितथे दाप्यौ तत्कालावे
दितं धनं। उत्तरौ च विसम्वादे तौ विना तत्सुतावपि॥ विवा
दरत्नाकरे प्रपयादौ च लग्नकः कात्यायनेनोक्तो दर्शना
दावेव प्रविष्ट इति चतुष्टयं। तद्यथा दानोपस्थानविश्वास
विक्रयप्रत्ययाय च। लग्नकं दापयेद्देवं यथा योगं विपर्यये॥
असाधुमेव साधुं वदन् प्रत्ययप्रतिभूः तथा दर्शनमकारयन्
दर्शनप्रतिभूः प्रकृतधनं दाप्येत तु तयोः सुतोऽपीत्यर्थः। तथा
च याज्ञवल्क्यः दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा। न तत्पु
त्रा धनं दद्युर्दद्युर्दानाय यः स्थितः॥ प्रदानार्पणप्रतिभूत्वेन यः
स्थितस्तस्य पुत्रा दद्युरिति। दर्शनप्रतिभूस्तु देवराजकृताद्दते दर्श
नावधौ व्यतीते दाप्यः। तथा देवराजकेनावधौ व्यतिक्रान्ते तदुप
घाताद्यर्थे व्याध्यादिनाऽभियुक्तमरणे वा न सदर्शयन्नपि दाप्य
एव। तथा हि कात्यायनः दर्शनप्रतिभूर्यत्र देशे कालेन दर्श
येत्। निबन्धमावहेत्तत्र देवराजकृतादृते॥ काले व्यतीते
प्रतिभूर्यदि तन्नैव दर्शयेत्। निबन्धं दापयेत्तन्तु प्रेते चैवं
विधिः स्मृतः॥ प्रेतेऽभियोगिनि दर्शनावधिमतिक्रम्य मृते प्रति
भुवः तत्र दाप्यदर्शितस्याभियोगो देयः। तथा यदि बन्धकं
गृहीत्वा दर्शनप्रतिभूरभूत्तदा पुत्रोऽपि दाप्यः। तद्यथा गृहीत्वा
वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत्। विभाव्य वादिना तत्र
दाप्यः स्यात्तद्धनं सुतः॥ लग्नकसुतस्य देयं कलारहितमेव।

तथा व्यासः। ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः। समं दाप्यस्तत्सुतस्तु न दाप्य इति निश्चयः॥ लग्नकबहुत्वे याज्ञवल्क्यः बहवः स्युर्यदा स्वांशैर्दद्युः प्रतिभुवो धनं। एकच्छायाश्रितेष्वेषु धनिकस्य यथा रुचि॥ एकच्छायेति धनिको यत्र व्यवहारकाले वदति मदिच्छया यस्य कस्यापि पार्श्वे स्थास्यतीति न मे भेदनाय यत्न इति तेनैको लग्नको यथा सर्व्वं ददाति तथा तत्र वः इच्छि। एकच्छाया तु एकस्माद्द्रव्यं लग्नकस्य कालं लभते प्रार्थितस्य द्रव्यान्वेषणाय। तथा च बृहस्पतिः। नष्टस्यान्वेषणे कालं दद्यात् प्रतिभुवे धनी। देशानुरूपतः पक्षं मासं सार्द्धमथापि वा॥ नाध्यमं पीडनीयाः स्युः ऋणं दाप्याः शनैः शनैः। तथा प्रातिभाव्यं तु यद्दद्यात् पीडितः प्रातिभाविकः। त्रिपक्षात्परतः सोऽर्थं द्विगुणं लब्धुमर्हति॥ द्विगुणं त्रिपक्षात् परतः स्वाकारितापि वृद्धिर्भवति ततः कालेन द्वैगुण्यं नत्वेतावतैव द्वैगुण्यं तथान्यदपि याचितं द्रव्यं ऋणार्थे प्रतिभुवा ऋणिना देयं। तथा च कात्यायनः यस्यार्थे येन यद्दत्तं धनिना पीडितेन तु। साक्षिभिर्भावितेनैव प्रतिभूस्तत्समाप्नुयात्॥ प्रतिभूग्रहणे तु साक्ष्यसिद्धौ समर्थत्वमेवोपयुज्यते। तथा च कात्यायनः नष्टे धनिने दातुं दण्डं राज्ञे च तत्समं। न विज्ञातो गृहीतव्यः प्रतिभूः स्वक्रियां प्रति॥ समर्थत्वं लोकत एव ज्ञातव्यं॥

अथर्णादानविधिः॥ तत्र बृहस्पतिः याचमानाय दर्शितमप्रतिकृतं ऋणं। पूर्णावधौ सान्त्वलाभमभावे च पितुः सुतैः॥ यत्र धनिकस्यैव दानावधिर्विभाव्यो नियमिता तथापि माना य

देयं यत्र चान्योऽवधिर्नियमितस्तत्र तु तेन देयं यत्र त्ववधिर्न कृतस्तत्परमवृद्धिमात्रं सदेयमित्यर्थः । नारदः पितर्युपरते पुत्राः ऋणं दद्युर्यथांशतः । विभक्ता ह्यविभक्ता वा योवा तामुद्वहेद्धुरं ॥ याज्ञवल्क्यः पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा । पुत्रपौत्रैः ऋणं देयं निह्नवे साक्षिभावितं ॥ प्रोषिते तु विशेषमाह नारदः नार्वाक् संवत्सराद्विंशात् पितरि प्रोषिते सुतः । ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा ॥ एतौ विष्णुवाक्ये प्रवसिते द्विदशाः समा इति समस्यः नान्यत्र विरोधात् । यदाह सएव ऋणग्राहिणि प्रेते प्रव्रजिते द्विदशाः समाः प्रवसिते वा तत्पुत्रपौत्रैः ऋणं देयं नातः परमनीप्सुभिरिति । प्रपौत्रेणानिच्छया दद्यादित्यर्थः । ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव च । आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ॥ अविभक्तेन पित्रा पितृव्येण ज्येष्ठभ्रात्रा वा यदृणं कृतं तन्नैयायिकं सत्तस्मिन् प्रोषिते पुत्रादिना विंशतिवर्षोत्तरं देयमिति रत्नाकरार्थः । स्मृतिसारकृतस्तु विभक्तेन पित्रादिना यत् स्वार्थमृणं कृतं तत्तस्मिन् प्रोषिते पुत्रादिना देयं तत्रैव कालनियमः नत्वविभक्ते कुटुम्बार्थकृतेऽपि तत्र तथापि ऋणिकत्वात् एकवाक्यता तुल्यत्वमेव एवं वाक्यमहार्थं न भवति अतोयत्रैव वाक्यबलादेव दानं ऋणग्रहणनिमित्तं विनापि तत्रैव वाक्येन कालनियमविधिः कुटुम्बार्थकृतमर्वागेव देयं याज्ञवल्क्यस्यैव वाक्यान्तरात् । तदाह अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत् । दद्युस्तदृक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥ तथाचापि कालप्रतीक्षा मानाभावात्

किञ्चविभक्तस्यैवेत्याहुः । जीवतोयद्दृणं देयं अत्र च न श्रावणा
पेक्षा तदाह वृहस्पतिः आविभक्तोपि पितुः पुत्रैः ऋणं देयं विभा
जितं । जात्यन्धवधिरोन्मत्तक्षयश्वित्रादिरोगिणः ॥ पितरि निरु
द्देशे दातुभागी विभक्तेनापि पुत्रेण समर्थेन तदभावे तादृश
पौत्रेणापि नैयायिकं तदृणं देयमिति तु पारिजातः । दायः
सर्वेषु केकोपि जीवत्यभियुक्तः शतं । मृतेषु तु न तत्पुत्रः सर्वो
दातुमर्हति ॥ एकच्छायाश्रितानां तु यस्तिष्ठेत्तद्दद्यात् । एक
च्छायाश्रितेष्वेषु धनिकस्य यथा रुचि । तथा एकच्छायाकृतं
सर्वं प्रदद्यात्प्रोषिते सुतः । मृते पितरि पितामहे च न कदाचि
न ॥ अनेनैव विषयेऽपि देयतात्पर्या प्रतीकारार्थमेव वाक्यं ।
मृते पितरि पित्रा एकच्छायाकृतमपि ऋणं पुत्रः स्वांशेन
दद्यात् । कात्यायनः सूर्यनार्धेन वा देयं श्रावितं धर्मका
रणात् । अदत्ते तु मृते दापयस्तत्सुतोनात्र संशयः । धर्मिं तु
धिनिष्पनाहे वारदः । अप्राप्तव्यवहारस्तु स्वतन्त्रोपि हि नर्ण
भाक् । कात्यायनः अप्राप्तव्यवहारैस्तु पितर्युपरते क्वचित् ।
कार्येण त्रिगुणा देयं वर्षैः पूर्णैः कोऽपरा ॥ गर्भस्थैः सदृशो ज्ञे
य आषोडशाद्वत्सराच्छिशुः । बालआषोडशाद्वर्षात्पौगण्डश्चा
पि कथ्यते । परतोव्यवहारज्ञः स्वतन्त्रः पितरावृते ॥ जीवतो
ऽपि पुत्रः पौत्रश्च वा देयं पितामहऋणं तत् । सर्वेषां ...
पुत्रा नैव देयमृणं क्वचित् ॥ इह प्रतिपन्नाभिप्रायेः सर्वोपि ...
... विषये न ... विप्रतिपत्ति ...
... । ... स्यात् । ...

माह गौतमः । प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डा न पुत्रान
ध्याभवेयुः । प्रातिभाव्यं दर्शनप्रत्ययप्रातिभाव्ये तथा वाणिज्या
दिना पितुर्दैयताकृतानि धनानि न पुत्रानध्याभवेयुरित्यर्थः ।
बृहस्पतिः शौराक्षिकद्यूतदानं कामक्रोधप्रतिश्रुतं । प्राति
भाव्यं दण्डशुल्कशेषं पुत्रो न दातुमर्हति ॥ शौरं सुरानिमित्तं दण्डः
शुल्कयोरवशेषः । तथा च व्यासः दण्डो वा दण्डशेषो वा शुल्कं
तच्छेषमेव वा । न दातव्यन्तु पुत्रेण यच्च न व्यावहारिकं ॥ व्याव
हारबहिर्भूतमित्यर्थः । कामक्रोधकृतमाह कात्यायनः लि
खिता हस्तके वापि देयं यत्तु प्रतिश्रुतं । परपूर्व्वस्त्रियै तत्तु
विद्यात्कामकृतं ऋणं ॥ यत्र हिंसां समुत्पाद्य क्रोधात्स्वं विनाश
यन्ति वा । ऋणं तद्विद्धि कारणं तु विद्यात्क्रोधकृतन्तु तत् ॥ तेन नाति
प्रसक्तिः दण्डादानमपि प्रतिषुतमित्यर्थः । अन्यथा दण्डस्या
देये न निषेधः स्यात् । प्रातिभाव्यं प्रत्ययदर्शनप्रतिभुवः ।
कदाचित् पितृऋणमपि पुत्रेण न देयमित्याह नारदः धनस्त्री
हारिपुत्राणामृणभाग्योऽधमं हरेत् । पुत्रोऽसतोः स्त्रीधनिनोः
स्त्रीहारी धनिपुत्रयोः ॥ धनेति अधमर्णो धनिपुत्रावपि पुत्रे
सति धनग्राहकएव ऋणं दापयेदित्यर्थः । स्त्रीधनिनोरिति अस
त्वादिकप्रत्ययः तेन धनहारिपुत्रोऽपि पुत्रे सति स्त्रीहारिणि
धनहारिणि च दद्यात् स्त्रीहारी धनहारिणि पौत्रे पुत्रे चास
ति दद्यात् स्त्रीधनहारिणि सति तदभावे स्त्रीहारी पुत्रे
स्त्रीहारी दद्यात् । अतएव कात्यायनः "धनस्त्रीहारी तु यदि

योषिद्ग्रहः स्मृतः । स्त्रीहारी तु तयोरेव स्यादभावे धनहारिणः ॥ अत्रैव कात्यायनोऽपि ऋणन्तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवः। द्रविणार्हश्च धुर्यश्च नान्यथा दापयेत्सुतं॥ व्यसनाभिप्लुते पुत्रे बाले वा यत्र दृश्यते। ऋणमुद्दापयेत्तत्तु तस्याभावे पुराविदः॥ द्वयोरभावे पुत्रस्य देयमित्यत्र याज्ञवल्क्योऽपि ऋक्थग्राही ऋणं दाप्यो योषिद्ग्राही तथैव च । पुत्रोऽनन्याश्रितधनः पुत्रहीनस्य ऋक्थिनः॥ अतोऽयमर्थोऽपि पुत्रोऽनन्याश्रितद्रव्यश्च ऋणं दाप्यः तेन पितुरधिकारे योऽभिषिच्यते स एव तां धुरमुद्वहति तस्यैव देयं नापरस्य पुत्रस्य। तदयं संक्षेपः धनस्त्रीहारिणोरभावे द्रविणार्हधुर्यश्च पुत्र एव अनीहितपुत्रत्वेऽपि धनहारी धनहार्यभावे पुत्रवत्पुत्रत्वेऽपि स्त्रीहारी उभयोरभावेऽयोग्योऽपि पुत्र एव पितृणं दद्यात्। यदि तु पुत्राणामेकतम एव पितृधनाभिषिक्तस्तदा स एवेति। पुत्रादन्यस्यापि देयं दर्शयति नारदः पितृव्येणाविभक्तेन भ्रात्रा वा यदृणं कृतं। मात्रा वा यत्कुटुम्बार्थं दद्युस्तत्सर्वरिक्थिनः॥ मनुः कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत्। स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत्॥ याज्ञवल्क्यः पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः। यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति॥ एवं दासादिकृतऋणेऽपि देयत्वात् स्वामिना कुटुम्बार्थमपि कृतं देयमेवेति अपिशब्दः कुटुम्बार्थमिति वाक्यात्। पुत्रर्णमपि पितुः निषिद्धं। यथाहि ऋणं पुत्रकृतं पिता नाप्नुयादिति। अतएवेन वा दत्तानाणा दातुमर्हति ॥ शिशुः स्त्री पतिपुत्र

कृतं न स्त्रीकृतं पतिपुत्रौ ॥ नारदः न च भार्य्याकृतमृणं कथ-
ञ्चित्पत्युराभवेत्। आपत्कृतादृते पुंसः कुटुम्बार्थाद्धि दुष्करः॥
अन्यत्र रजकव्याधगोपशौण्डिकयोषितां। तेषां हि तत्प्रत्यया
वृत्तिः कुटुम्बञ्च तदाश्रयं॥ एवमन्यत्रापि यत्र स्त्रीप्राधान्यं
तत्र तथैव न तु जात्यादरः कार्य्यः तत्र योषिदेव सर्व्वमनुष्ठा-
नं पुरुषोऽज्ञ एव इदन्तु प्रपञ्चनमात्रं कुटुम्बार्थं आपदा-
दि स्त्रीकृतमपि कुटुम्बिदेयत्वादिति। अन्यच्च यादृशं स्त्रिया
देयं तत्र याज्ञवल्क्यः प्रतिपन्नं स्त्रिया देयं पत्या वा सह
यत्कृतं॥ कात्यायनः भर्त्रा पुत्रेण सार्द्धं वा केवलं वात्मना कृतं॥
नारदः न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा। अभ्युप-
गमेन वा भर्त्रा उक्ता देयमृणं तथा॥ अप्रपन्नापि सा दाप्या
धनं यत्राश्रितं स्त्रियां। पत्या स्त्रीकारितमृणं भार्य्यया देयं
तथा गृहीतास्तधनयाऽपुत्रया अमर्णमनङ्गीकृतमपि देयं
अन्यथाभावित्वादिति संक्षेपः। स्त्रीप्रभेदं विभजति नार-
दः अन्तिमा स्वैरिणीनान्तु पुनर्भूः प्रथमा तु या। ऋणं
तयोः पतिकृतं दद्याद्यस्ते समश्नुते॥ अधनस्य ह्यपुत्रस्य मृतस्यो-
पैति यः स्त्रियं॥ ऋणं वोढुः स भजते तदेवास्य धनं स्मृतं॥ तेत्राह
नारदः प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या। तवाह-
मित्युपगता सा चतुर्थी प्रकीर्त्तिता॥ कन्यैवाक्षतयोनिर्या पाणि-
ग्रहणदूषिता। पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा॥
कात्यायनः निर्द्धनैरपतीस्तु यत्कृतं शौण्डिकादिभिः। तद्
स्त्रीषु पुत्रभोक्ता तु दद्यादृणमेव तु॥ भावित्वं न स्वाधीन

वृत्तयोग्राह्याः । कात्यायनः दीर्घप्रवासिनिर्बन्धुजडोन्मत्ता
दिविक्लिनां । जीवितामपि दातव्यं तत्स्त्रीद्रव्यसमाश्रितैः॥ अत्र
च पितुर्यादृशमृणं पुत्रेण देयं तादृशमेव ऋक्थग्राहिप्रभृ
तिभिः किन्त्वेतरत्तत्रैव पुत्रवदत्रापि वृद्धिदानानभिधानादि
त्येव विशेषः । यत्र तु ब्राह्मणो धनिकः स च निरन्वयोऽप्र
जस्तत्राह नारदः । ब्राह्मणस्य तु यद्देयं सान्वयस्य न चा
स्ति सः । सकुल्येभ्योऽस्य निनयेत्तदभावेऽस्य बन्धुषु ॥ यदा
तु न सकुल्यः स्यान्न च सम्बन्धिबान्धवाः । तदा दद्याद्द्विजा
तिभ्यस्तेष्वसत्स्वप्सु निक्षिपेत्॥ क्षत्रियादेस्तु राजैव गृह्णीया
द्ब्राह्मणधनवर्ज्जं हि राजगामीति दर्शितं । तेन ब्रह्मस्वं कथ
मपि न राज्ञा गृहीतव्यमिति। तदृणं प्रार्थनाकाले प्रार्थि
तोऽपि ऋणी यत्र न ददाति तत्र धनिकेन यत्कर्त्तव्यं तदाह
मनुः यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः । तैस्तैरुपायैः
संगृह्य साधयेदधमर्णिकं ॥ धर्म्मेण व्यवहारेण छलेनाचरि
तेन च । प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥ पूर्वपूर्वसाम
र्थ्याभावे उत्तरोत्तरं । धर्म्मे बृहस्पतिः सुहृत्सम्बन्धिसन्दि
ष्टैः सामोक्त्यानुगमेन च । प्रायेण वा ऋणी दाप्यो धर्म्म एष उदा
हृतः ॥ प्रायः प्रायोपवेशनं । ब्राह्मणस्तु परिक्षीणः शनैर्दा
प्योऽयथोदयं । व्यवहारे तु कात्यायनः धार्य्यावरुद्धर्णि
कः प्रकाशं जनसंसदि । यावन्न दद्याद्देयस्य देशाचारस्थि
तिर्यथा ॥ छलाचरितवत्तेषु बृहस्पतिः छद्मना याचयित्वा
र्थमानीय ऋणिकाद्धनी । अन्वाहितादि वा कृत्य दाप्यते यत्र

सोपधिः ॥ उपधिश्छद्म । तथा दारपुत्रपशून् रुद्धा कृत्वा द्वा
रोपवेशनं । यत्नर्णी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते ॥ बद्धा
स्वगृहमानीय ताडनाद्यैरुपक्रमैः । ऋणिको दाप्यते यत्र बला
त्कारः प्रकीर्त्तितः ॥ प्रथमं प्रार्थनैव सर्व्वत्र युक्ता । कात्या
यनः राजानं स्वामिनं विप्रं सान्त्वेनैव प्रसाधयेत् । ऋणिनं
सुहृदं वापि छलेनैव प्रसाधयेत् ॥ ऋक्थिनं दायादं तथा वणि
जः कर्षकांश्चैव शिल्पिनश्चाब्रवीद्भृगुः । देशाचारेण दाप्याः स्यु
र्दुष्टान् संपीड्य साधयेत् ॥ यत्र धारणेऽपि धनं न लभ्यते तत्रा
ह बृहस्पतिः निर्द्धनं ऋणिकं कर्म्म गृहमानीय कारयेत् ।
शौण्डिकाद्यं ब्राह्मणस्तु दापनीयः शनैः शनैः ॥ याज्ञवल्क्यः हीन
जातिं परिक्षीणमृणार्थं कर्म्म कारयेत् । ब्राह्मणस्तु परिक्षीणः
शनैर्दाप्यो यथोदयं ॥ प्रथमत एव बलात्कारे दण्डमाह कात्याय
नः यदि स्यादो बलादिष्टमप्रभकर्म्म कारयेत् । प्राप्नुयात्साहस
पूर्वमृणान्मुच्येत चर्णिकः ॥ यदा दा ऋणिकं गर्हितं कर्म्म ऋणनि
र्यातनाय धनिकः कारयेत्तदा स पूर्वसाहसं दण्डं दाप्यः ऋणिक
श्च ऋणान्मुच्यते इत्यर्थः । नारदः अथ शक्तिविहीनः स्यादृणी का
र्य्यं विपर्य्ययात् । शक्त्यपेक्षमृणं दाप्यः काले काले यथोदयं ॥ अथ
परमवृद्धिप्राप्तं धनं ऋणिको दातुं न शक्नोति तदा चक्र वृद्धा
लेख्यया धारयेत् । तथा च बृहस्पतिः पूर्णावधौ सान्यलाभ
मृणमुद्ग्राहयेद्धनी । कारयेद्वा ऋणी लेख्यं चक्रवृद्धिव्यवस्थ
या ॥ परकवृद्धिर्मूलेन सह मूलीकृतायाद्विगुणाधिकं भोगला
भेपि याद्यमाह स एव द्विगुणस्योपरि यथा चक्रवृद्धिः प्रथ

ग्यते । भोगलाभस्तथा नच मूलं स्यात्सोदयं ऋणं ॥ ऋणभावे स एव हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके । द्रव्यं तदीयं संगृह्य विक्रीणीत ससाक्षिकं । रक्षेद्वा कृतमूल्यन्तु दशाहं अत्र संसदि । ऋणानुरूपं परितो गृहीतान्यत्तु वर्जयेत ॥ स्वधनञ्च स्थिरीकृत्य गणनाकुशलैर्नरैः । तद्धनं ज्ञातिविदितं मध्यस्थात्प्राप्नुयात् ॥ उत्तमर्णस्तु बलादिनापि स्वधनं गृह्णन् राज्ञा शास्यः । तथा च विष्णुः प्रयुक्तमर्थं यथाकथञ्चित्साधयन्न राज्ञा वाच्यः स्यात् ॥ यथाकथञ्चिद्यथाविषयं प्रवर्त्तितैर्धर्मादिभि रित्यर्थः । याज्ञवल्क्यः प्रतिपन्नं साधयानो न वाच्यो नृपतेर्भवेत् । साध्यमानो नृपं गच्छन् दण्ड्यो दाप्यश्च तद्धनं ॥ प्रतिपन्नोऽङ्गीकृतर्णः । यस्तु विप्रतिपन्नोऽन्यायवादी स आसेध्यः । तथा च बृहस्पतिः नासेद्धव्यः क्रियावादी सन्दिग्धेऽर्थे कथञ्चन । आसेधयंस्तु नासेध्यं दण्डो भवति धर्मतः ॥ मदनरत्ने तद्वदि न्यायतस्तद्दाख्यत्वं । एवं यत्रर्णिको ब्रूते क्रियावादी स उच्यते ॥ रूपसङ्ख्यादिलाभेषु यत्र भ्रान्तिर्द्वयोर्भवेत् । अदेयदेययोर्वापि सन्दिग्धार्थः प्रकीर्त्तितः ॥ मनुः यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत् । तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमं ॥ दण्डस्यातिधनत्वे इदं द्रष्टव्यं । तथा ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति । अपह्नवे तु द्विगुणं तन्मनोरनुशासनं ॥ आदौ विमते पश्चादनुमते शते पञ्चकं पश्चादपि विमते प्रमिते एते दशकं राज्ञा दण्ड्यः दण्डस्याल्पधनत्वे इदं । याज्ञवल्क्यः निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समं । मिथ्या

भियोगी द्विगुणमभियोगाद्धनं हरेत् ॥ कारणे निधिरेव
स्याज्जितस्यैकनरस्य तु । प्राङ्न्यायवादे च तथा जितस्यैकत
रस्य तु ॥ मध्यविधधनस्य मिथ्याकारणे प्राङ्न्याये त्विदं । यमः
धनिकः सधनो यस्तु दौरात्म्यान्न प्रयच्छति । राज्ञा प्रदाप
यितः स्याद्गृहीत्वा द्विगुणं ततः ॥ विष्णुः उत्तमर्णश्चेद्राजानमि
यात्तद्विभावितोऽधमर्णो राज्ञे धनदशमभागं दत्वा दण्डं द
द्यात् ॥ प्राप्तार्थश्चोत्तमर्णो विंशतितममंशं ॥ कात्यायनः नानर्थं
समवायेन यत्पूर्वकृतं भवेत् । तत्तदेवाग्रतो देयं राज्ञः श्रोत्रि
यतोऽपि वा ॥ एकाहे लिखितं यच्च तत्र कुर्य्यादृणं समं ।
स्वर्णं रत्नं लाभमन्यथा तु यथा क्रमं ॥ यस्य द्रव्येण यत्पण्यं
साधितं सो विभावयेत् । तद्द्रव्यमृणिकेनैव दातव्यं तस्य मान्य
था ॥ अन्यद्रव्याभावे तस्यैव कृते तद्देयमित्यर्थः । याज्ञवल्क्यः
दत्वर्णं पाटयेल्लेख्यं शुद्ध्यै चान्यत्तु कारयेत् । साक्षिमच्च भवे
द्यद्वा तद्दातव्यं ससाक्षिकं ॥ * ॥

अथ निक्षेपः ॥ तत्र नारदः स्वद्रव्यं यत्र विस्रम्भान्निक्षिपत्य
विशङ्कितः । निक्षेपो नाम प्रोक्तं तद्व्यवहारपदं बुधैः ॥ मनुः
कुलजे वित्तवति धर्मज्ञे सत्यवादिनि । महापक्षे धनिन्यार्य्ये
निक्षेपं निक्षिपेद्बुधः ॥ महापक्षो महाबन्धुः । याज्ञवल्क्यः वासन
स्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते । द्रव्यं तदौपनिधिकं प्रतिदेयं
तथैव तत् ॥ नारदः स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा ।
प्रतिदानं तथैवास्य प्रत्ययः स्याद्विपर्य्यये ॥ विपर्य्यये प्रत्यय

द्विव्यं दद्यात् । बृहस्पतिः भर्तृद्रोहे यथा नार्य्याः पुंसां पुत्रसु
हृद्वधे । दोषोभवेत्तथा न्यासे भक्षितेऽपह्नुते नृणां ॥ न्यास
द्रव्यं न गृह्णीयात्तन्नाशस्तु यतस्करः । गृहीतं पालयेद्यत्ना
द्यथाकालं याचितमर्पयेत् ॥ निर्हेतुरेव तद्दद्यात्तत्काले । तथा च बृह
स्पतिः स्थापितं येन विधिना येन यत्र यथाविधि । तथैव तस्य
दातव्यं न देयं प्रत्यनन्तरे ॥ प्रत्यनन्तरे पुत्रादौ । मनुः स्वय
मेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे । न स राज्ञा नियोक्तव्यो न नि:
क्षेप्तुश्च बन्धुभिः ॥ नारदः ग्रहीतुः सह योऽर्थेन नष्टोनष्टः सदा
यिनः । दैवराजकृते तद्वन्न चेत्तज्जैह्म्यकारितं ॥ निर्हेतुरेव नष्ट
इत्यर्थः एवं राजकृतेपि ग्रहीतृकौटिल्यात्कृते देयमेव ग्रहीत्रा ।
तेन ग्रहीत्रपराधो दाने हेतुरिति तत्त्वं । मनोरप्येतत्परता ।
चौरैर्हृतं जलेनोढमग्निना दग्धमेव च । न दद्याद्यदि
तस्मात्स न संहरति किञ्चन ॥ किञ्चित्संहृत्य गृहीत्वा शेषस
्य निःक्षिपति उपेक्ष्यते वा सर्वं मम न देयं भवतीति तत्सर्वं
देयमेव । तथा च कात्यायनः ग्राहकस्य तु यद्दोषान्नष्टं तद्ग्रा
हकस्य तु । देयमिति शेषः तथा यस्य दोषेण यत्किञ्चिद्विनश्येत
च्छिद्येत वा । तद्द्रव्यं सोदयं दाप्यो दैवराजकृतादिना ॥ राज
कृतेऽपि च तद्दोषात्कृते दद्यादेवेत्युक्तं । याचितकमधिकृत्य कात्या
यनः प्राप्तकाले कृते कार्य्ये न दद्याद्याचितोपि सन् । तस्मि
न्नष्टे हृते वाथ ग्रहीता मूल्यमाहरेत् ॥ अयमर्थः यत्कार्य्यमु
द्दिश्य यद्याचितं तस्मिन् कार्य्ये कृते काले वा पूर्णे याचितोपि
स्वामिना स ग्रहीता यदि न ददाति तदा दैवराजादिनष्टमपि

ग्रहीता मूल्यादिद्वारेण दद्यादेव । नारदोपि एषएव विधि
र्दृष्टोयाचितान्वाहितादिषु । शिल्पिषूपनिधौ न्यासे प्रतिन्यासे
तथैवच ॥ न्यासमपह्नुवानः स्वकीयं द्रव्यं निःक्षिप्य प्रार्थ्य प्राप्यचौ
रत्वेन अप्राप्य चौरत्वेन प्राचीने न्यासे विचारकेन निर्णयः । एवं
याचितादावपीति । अत्र प्रकरणे वाक्यमिदं रत्नाकरे लिखितं ।
बृहस्पतिः मोहेनापेक्षया न्यासं ग्रहीता यदि नाशयेत् । याच्य
मानोन दद्याद्वा दाप्यस्तत्सोदयम्भवेत् ॥ स्वद्रव्यमेव पृथक्कृत्य
रक्षति न निक्षिप्तं तत्रापि दद्यादेवेत्यर्थः । यत्र प्रार्थितोपि न
दत्तवान् कालान्तरे राजा गृह्णाति तत्रापि दद्यादेव । तथा
च नारदः याच्यमानन्तु यो दातुर्निःक्षिप्तं न प्रयच्छति । दण्ड्यः स
राज्ञा भवति नष्टे दाप्यस्तु तत्समं ॥ यत्रार्थं साधयेत्तेन निक्षेप्तुर
ननुज्ञया । तत्रापि दण्ड्यः स भवेत्तच्च सोदयमाहरेत् ॥ व्यासः
भक्षितं सोदयं दाप्यः समं दाप्य उपेक्षितं । किञ्चिन्न्यूनं प्रदाप्यः
स्याद्द्रव्यमज्ञाननाशितं ॥ मनुः उपधाभिश्च यः कश्चित्परद्रव्यं
हरेन्नरः । ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः ॥ उपधा
छलं सहायो हरणसहकारी बधस्ताडनबन्धनादिः । अन्यत्रा
प्येवं जातीयके अयमेव विधिः । तथा च बृहस्पतिः अन्वाहिते
याचितके शिल्पिन्यासे तथैव च । एष एवोदितो धर्मस्तथैव नाश
मागते ॥ शिल्पिन्यासोऽलङ्करणादिघटनार्थं शिल्पिषु समर्पिते
सुवर्णादौ उपधाभिरेषां हरणे उक्तैव शास्तिः । यैस्तु संनिक
धने न्यासोदिवसैः परिनिष्ठितैः । तदर्द्धं स्थापयन् शिल्पी

दाप्योदैवहृतेऽपि तत् ॥ घटनावधिदिनातिक्रमेणेति लिखितता न तु तदभ्यन्तर इत्यर्थः । मनुः यो निक्षेपं नार्पयति यश्चा निक्षिप्य याचते । तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमं ॥ अत्रैव श्लोके द्विगुणं दममिति मत्स्यपुराणे पाठः । अत्र दमः सधननिकृष्टाचारविषयः । मनुवचनन्तु निर्द्धनसदाचार विषयं । कात्यायनः न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितं । अज्ञानान्नाशितञ्चापि येन दाप्यः स एव तत् ॥ एवकारेण तत्प राधानन्तर्गततत्पुत्रादिव्यवच्छेदः । तथा च दाप्या भवेयुरित्य धिकारे गौतमः निध्यन्वाहितयाचितावक्रीतादयो नष्टाः सर्वा ननिन्दितान् पुरुषापराधेन ॥ निधिर्निक्षेपः अन्वाहितमन्वा धिः अवक्रीतं भाटकेनानीतं सर्वान् पुत्रादीन्निरपराधान् । उप निधौ कात्यायनः क्रयः प्रोषितनिःक्षेपो बन्धान्वाहितयाचितं । वैश्यहस्त्यर्पितञ्चैव सोऽर्थस्तूपनिधिः स्मृतः ॥ क्रयो विक्रीतं द्रव्यं विक्रेतुर्हस्ते कथञ्चित्स्थितं स्वामिनि गते देशान्तरमपरस्य निक्षेपः प्रोषितनिक्षेपः वैश्यहस्त्यर्पितं लाभाय समर्पितमित्यर्थः एतेषु सर्व्वेष्वेव रक्षणप्रत्यर्पणपरीक्षणदण्डादि न्यासवत् ॥

अथास्वामिविक्रयः ॥ तत्र नारदः अस्वामिना कृतो यस्तु दायो विक्रय एव वा । अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥ कात्यायनः अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्त-येत् ॥ मनुः विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मतः । न तं नयेत साक्ष्यन्तु स्तेनमस्तेनमानिनं ॥ अवहार्योभवेच्चैव

साम्वयः षट्शतं दमं । निरन्वयोऽनपसरः प्राप्तः स्याच्चौर
किल्बिषं ॥ साम्वयं प्रामाण्यं व्यवहार्यो दाप्यः साम्वयः प्रकृतस्वा
मिवंश्यः निरन्वयस्तद्वंश्यः अनपसरः तद्धननिर्गमहेतुप्रति
ग्राहादिरहितः षट्शतं पणानां दण्ड्यः । तथा अनेन विधि
ना प्राप्तः कुर्वन्नस्वामिविक्रयं । अज्ञानाज्ज्ञानपूर्व्वन्तु चौर
वद्दण्डमर्हति ॥ अज्ञातपरस्वविक्रयी षट्शतेन विदितविक्रयी
चौरदण्डेन हस्तच्छेदनादिना शास्यः । यदा यस्य हस्ते
द्रव्यं तमपरोवदति मदीयं देहीति साधुश्चासौ तदा तेन किं
कर्त्तव्यमित्यत्र वृहस्पतिः । पूर्व्वस्वामी तु तद्द्रव्यं यदागत्य
विभावयेत् । तत्र मूलं दर्शनीयं क्रेतुः शुद्धिस्ततोभवेत् ॥ मूलं
प्रकाशेन तद्द्रव्यं लब्धं । कात्यायनः प्रकाशं वा क्रयं कुर्य्या
मूलं वापि समर्पयेत् । मूलानयनकालस्तु देयो योजन
सङ्ख्यया ॥ यदा मूलमुपन्यस्य पुनर्व्वादी वदेत्क्रयं । आहरेन्मूल
शोधादौ न क्रयेण प्रयोजनं ॥ क्रयशुद्धिरपि तत एव भविष्य
ति । तेन मूलाभावएव क्रयशुद्धिरन्वेषणीया । प्रकाशं क्रयं
प्रकाशयेदित्यर्थः । मूले आनीते व्यासः मूले समाहृते क्रेता ना
भियोज्यः कथञ्चन । मूलेन सह वादस्तु नाष्टिकस्य तदा भवेत्॥
नाष्टिकोनष्टधनस्वामी । वृहस्पतिः विक्रेता दर्शितोयत्र हीय
ते व्यवहारतः । क्रेतृराज्ञोर्धनदमौ प्रदद्यात्स्वामिने धनं ॥ ज्ञा
तक्रये तु क्रेतुरपि दण्डः । तदाह नारदः अस्वाम्यनुमताद्दा
सादसतश्च जनाद्रहः । हीनमूल्यमवेलायां क्रीणंस्तद्दोषभा
ग्भवेत् । अस्वामिविक्रेतुः समदोषभाक् । मूलग्रहणेऽपि क्रेता

तद्ददित्याह नारदः न गूहेदागमं क्रेता शुद्धिस्तस्य तदागमात्। विपर्य्यये तुल्यदोषः सर्व्वं तद्दण्डमर्हति ॥ मूलाग्रहणे नारदः अनुपस्थापयन्मूलं क्रयञ्चापरिशोधयन् । यथाभियोगं धनिने धनं दाप्योदण्डञ्च सः । मनुः अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितं । अदण्ड्योमुच्यते राज्ञा नाष्टिकोलभते धनं ॥ यत्र क्रयः प्रकाशः क्रेतानाष्टिकश्च तत्स्वत्वं साधयति मूलञ्च देशान्तरगमनेनाशक्याहरणं तत्र क्रेता राज्ञा न दण्ड्यः नाष्टिकाय तद्धनं दाप्यः। तथा च कात्यायनः नाष्टिकस्तु प्रकुर्व्वीत तद्धनं ज्ञातिभिः स्वकं । अदृश्यकविक्रीतं क्रीत्वा स्वं लभते धनी ॥ प्रकाशक्रेता मूलेऽज्ञातवासस्थानत्वादानेतुमशक्ते बृहस्पतिः प्रमाणहीनवादे तु पुरुषापेक्षया नृपः। सम न्यूनाधिकत्वेन स्वयं कुर्य्याद्विनिर्णयं ॥ वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः । अविज्ञाताश्रयात्क्रीतं विक्रेता यत्र वा मृतः ॥ स्वामी दत्वार्द्धमूल्यन्तु प्रगृह्णीत स्वकं धनं । स्वामी विभावितस्वत्वोनाष्टिकः। अर्द्धं द्वयोरपहृतं तत्र स्याद्व्यवहारतः ॥ तथा अविज्ञातक्रये दोषस्तथा चापरिपालनं । एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैः ॥ यत्र तु नाष्टिकोन स्वत्वं साधयति तत्र प्रकाशक्रेतुरेव द्रव्यं नाष्टिकस्यैव दण्डः। तथा च कात्यायनः यदि स्वं नैव कुरुते नाष्टिको ज्ञातिभिः स्वकं। प्रसङ्गविनिवृत्त्यर्थं चौरवद्दण्डमर्हति ॥ स्वामितोऽपि क्रयः कश्चिद्विरुद्धो भवति यदाह बृहस्पतिः येन क्रीतस्तु मूल्येन प्रागध्यत्तनिवेदितं । न तत्र विद्यते दोषः स्तेनः स्यादुपधिक्रये ॥ अन्तर्गृहे वणिग्ग्रामा

त्रिभुर्पाम्बसतोजनात् । हीनमूल्यन्तु यत्क्रीतं ज्ञेयोऽसावु
पधिक्रयः ॥ अत्राप्यस्वामिविक्रयवद्व्यवहारः । तथाच विष्णुः
यश्चाप्रकाशं हीनमूल्यमुपांशु क्रीणीयात्तदा क्रेता चौरवच्छा
स्यः ॥ याज्ञवल्क्यः हृतं प्रणष्टं योद्रव्यं परहस्तादवाप्नुयात् ।
अनिवेद्य नृपे दण्ड्यः सतु षणवतिं पणान् ॥ राजयाच्चस्व
ग्रहनाद्दण्ड्यः ॥ * ॥

अथ सम्भूयसमुत्थानं ॥ तत्र याज्ञवल्क्यः समवायेन वणिजां
लाभार्थं कर्म्म कुर्वतां । लाभालाभौ यथाद्रव्यं यथा वा संविदा
कृतौ ॥ अव्यवस्थायां मूलधनानुसारेण वृद्धिक्षयौ व्यवस्थाया
न्तु व्यवस्थानुसारेणैव ताविति अर्थः । बृहस्पतिः चयोहानिर्यदा
तत्र दैवराजकृताद्भवेत् । सर्व्वेषामेव सा प्रोक्ता कल्पनीया यथां
शतः ॥ चयोमूलस्य हानिर्दानस्य । अस्यापवादमाह सएव
अनिर्द्दिष्टोवार्य्यमाणः प्रमादाद्यस्तु नाशयेत् । तेनैव तद्भ
वेद्देयं सर्व्वेषां समवायिनां ॥ अनिर्द्दिष्टोऽननुज्ञातः । तथा दैव
राजकृताद्यस्तु स्वशक्त्या परिपालयेत् । तस्यांशं दशमं दत्वा
गृह्णीयुस्तेंऽशतोऽपरं ॥ नारदः दैवतस्कररोजाग्निव्यसने समु
पस्थिते । स्वशक्त्या रक्षयेद्यस्तु तस्यांशोदशमः स्मृतः ॥ कात्या
यनः । चौरतः सलिलादग्नेर्द्रव्यं यस्तु समाहरेत् । तस्यांशोद
शमोदेयः सर्व्वद्रव्येष्वयं विधिः ॥ एकस्वामिकेष्वपीयं व्यवस्थे
ति केचित् । सम्भूय समुत्थानप्रकरणाम्नानात् । एवमेव
रत्नाकरादयोपीति । तैः परस्परमवञ्चयद्भिः प्रवर्त्तितव्यं ।

तथाच कात्यायनः समत्वमथवार्घं वा वञ्चयन्तः परस्परं । नानापण्यानुसारेण प्रकुर्य्युः क्रयविक्रयौ ॥ बृहस्पतिः यः कश्चि द्वञ्चकस्तेषां विज्ञातः क्रयविक्रये । अपथैः परिशोध्यः स्यात् सर्व्वदारेष्वयं विधिः ॥ अपथैरिति प्रमाणोपन्यासं । नास्ति कोऽपि क्रोधादेः सम्भवात् तस्य क्षतिमप्याह याज्ञवल्क्यः जिह्मं छेद्युर्निर्लाभमशक्तोऽन्येन कारयेत् । जिह्मं मूर्खं दत्वा शिः सारयेयुः । अजिह्म एव योऽद्यव्यरक्षणे इतरव्यापारे चाक्षमः शठतरं पुरुषं नियुञ्जीतेत्यर्थः । रक्षणाक्रमस्य लेकस्य मरणे नारदः एकस्य चेत्स्याद्व्यसनं दायादोऽस्य तदाप्नुयात् । अन्यो वासति दायादे शक्ताश्चेत्सर्व्व एव वा । एकस्य मरणे तद्दायादो भागमस्य रक्षित्वा तद्भागमंशं तदभावेऽन्यस्तद्रक्षिता तदभावे सर्व्व एव वणिजो भाण्डं रक्षित्वा सम्भूय दशमांशं गृह्णीयुरित्यर्थः । दूरस्थ भाण्डस्वामिमरणे नारदः कश्चिच्चेत्संचरन्देशात्प्रेयादभ्यागतो वणिक् । राजास्य भाण्डं तद्रक्षेद्यावद्दायाददर्शनं ॥ तथा बृहस्पतिः यदा तत्र वणिक्कश्चित्प्रमीयेत प्रमादतः । तस्य भाण्डं दर्शनीयं नियुक्तैः राजपूरुषैः । राज्ञा इतिशेषः । यदा कश्चि दागच्छेत्तत्र रिक्थहरो नरः । स्वाम्यं विभावयेद्देशीः स द्रव्यमर्हति । नारदः दायादे सति तत्कुलीनो ज्ञातिभिःस्य तद्दर्शयेत् । तदभावे सुगुप्तं तद्रक्षयेद्दश वत्सरान् । राजा दद्यात्ते नवमं दशमं तथा । चत्वरिंशत् ... ह्णीत विंशकं ॥ अब्दादूर्द्धं तु नागच्छेद्य ... तदा गृह्णीत तद्राजा अब्राह्मणं ब्राह्मणं ...

अनागतस्य प्रणष्टस्वामिकद्रव्यं संवत्सरं परिपाल्य राजा
हरेत् । कालविकल्पस्त्वागमनदेशाद्यपेक्षया । अचिराच्चिरेण
वागमनसम्भावनायां नारदः। अस्वामिकमदायादं दश
वर्षस्थितं ततः । राजा तदात्मसात्कुर्य्यादेवं धर्मो न हीयते ॥
ऋत्विजां व्यसने चैवमन्यस्तत्कर्म निस्तरेत् । लभेत दक्षिणा
भागं स तस्मात्सम्प्रकल्पितं ॥ व्यसनेऽसामर्थ्ये । सामान्येनैवाह
बृहस्पतिः एकक्रियाप्रवृत्तानां यदा कश्चिद्विपद्यते । तद
न्येन क्रिया कार्य्या सर्व्वैर्वा सहकारिभिः ॥ याज्ञवल्क्यः
ऋत्विक् त्यजेयुर्निर्लोभमशक्तोऽन्येन कारयेत् । अनेन विधि
नाख्यातऋत्विक्कर्षककर्म्मिणां सम्भूय समुत्थानमार्गेण । मनुः
ऋत्विग्यदि वृतो यज्ञे स्वकर्म परिहापयेत् । तस्य कर्म्मानुरूपे
ण देयोंऽशः सह कर्त्तृभिः । व्याध्यादिना स्वकर्म्मत्यजतऋत्वि
जः कृतक्रतुभागानुसारेण क्रतुदक्षिणाभागो देय इत्यर्थः ।
तथा दक्षिणासु त्वदत्तासु स्वकर्म परिहापयन् । कृत्स्न
मेव लभेतांशमन्येनैव तु कारयेत् । माध्याह्निकसवनादौ
दक्षिणाकाले दक्षिणास्वदत्तासु सतीषु कर्म व्याध्यादिना
त्यजन् कृत्स्नमेव क्रतुदक्षिणाभागं लभेत कर्म्मशेषन्तु पुत्रादिना
कारयेदित्यर्थः । तथा सर्व्वेषामर्द्धिनो मुख्या द्वितीयास्तु तद
र्द्धिनः । तृतीयिनस्तृतीयांशाश्चतुर्थांशैकपादिनः । ज्योतिष्टोमे
शतेन क्रीणातीति श्रूयते तेन तत्र शतगावो दक्षिणा विहिता
तत्र कस्य कीदृग्भाग इत्याकाङ्क्षायां मुख्या होत्रध्वर्युब्रह्मोद्गा
तारः सर्व्वेषां गवामर्द्धिनः किञ्चिन्न्यूनार्द्धभाजोऽशमभागात्

मोधान्येन तेभ्यस्तुर्य्योऽष्टाचत्वारिंशद्गावः । द्वितीयास्तेषां वरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्ते प्रथमभागार्द्धभक्तिनस्तेभ्यस्तुर्य्यश्चतुर्विंशतिर्गावः । तृतीयिनस्त्वच्छावाकनेष्टाग्नीध्रप्रतिहर्तारस्ते तृतीयिनः प्रथमांशतृतीयभागभाजः तेन तेभ्यस्तुर्य्यः षोडश गावः । चतुर्थांशास्तु ग्रावस्तुत्पोतृसुब्रह्मण्योन्नेतारः पादिनः प्रथमांशचतुर्थभागभाजः तेन तेभ्यस्तुर्य्यो द्वादश गावो देया इति । एते चत्वारो वर्गाः अध्वर्य्युश्चप्रतिप्रस्थात्रादेः श्रुतौ सुव्यक्ताः । तथा यस्य कर्म्माणि यानि सुव्यक्ताः प्रत्यक्षदर्शिताः । अतएव तान्यादद्दीत भजेरन् सर्वे एव च ॥ अत्र मनुमते ऋत्विभिः स्वस्वकर्म्मेण यादक्षिणाः कथितास्तथा अभिषेचनीये दिवसतो अष्टाशतसहस्रं ददातीत्याम्नाताः किं यजमानस्याम्नानात्तेनैव याच्याः ततः स्वस्वकर्म्मानुसारेणैव याच्या इति प्रश्नः अत्र निर्णयार्थमाह मनुः रथं हरेद्वाध्वर्युः ब्रह्माधाने च वाजिनं । होता चापि हरेदश्वमुद्गाता चाप्यनः क्रये ॥ ऋत्विक्सामान्याधाने अध्वर्युरथं ब्रह्मा वेगवन्तं घोटकं सोमक्रये उद्गाता अनः शकटं हरेदित्यर्थः । तथा च यदीन ऋत्विग्भ्यो यत्र तद्ग्रहीतुम्प्रभवीति नान्यथा । ऋत्विग्भिर्वा अथ ऋत्विजि इति वर्त्तमानः कृतकार्य्यपूर्वकर्त्ता दक्षिणां यथाकृतः किञ्चिन्नश्यति यजमानस्याविनिर्जितं यदि तस्यापः तत्कालमनुष्ठितं तस्मात् यजेत स्वाहाद्यर्थिनोऽपि तान् कर्म्म समापयेत् प्रोक्ष त्याज्यतया किञ्चिन्नश्यति अथ येषा निरिक्षः सर्वेषामनुमाषितानि ऋत्विक् मन्त्रयन्तः कृत्य

वा दुष्टऋत्विक्तुल्योपाध्यायः तद्गुणनायकः एवं व्याधितपति
तोन्मत्तप्रक्षीणप्रध्वस्तेषु प्रमादात्प्रवाद्य ऋत्विक्षु कामाधिकृप
तितं याज्यं त्यजेत् ऋत्विक् अशुद्धाहितमलं इमं याज्यश्चेत्तदा
अशुद्धात्यागे ऋत्विजोऽपतितस्य कामं पतितमश्रोत्रियं त्यजेत् ।
याज्यं चाभियुक्तमदातारं ॥ अस्यार्थः अथेति ऋत्विजां मध्ये
एकस्मिन् ऋत्विजि अपगते अन्यं वृणुयात् दक्षिणा तु पूर्वस्यैव कृत
स्तु कर्मानुरूपं किञ्चिद्दद्यादित्यर्थः । प्रवसेदिति कश्चिदृत्विक्
कार्यवशात्प्रवसेद्यजमानस्तावत्कालमपेक्षेत अत्यन्तप्रवासाभ्यु
पगमात् ऋत्विगन्तरेण कर्म समापयेत्तस्यैव दक्षिणा प्रोषिताग
ताय च किञ्चिद्दद्यादित्यर्थः अथ चेदिति यजमानेन निराकृ
तोऽपि चेत् स्वेच्छयैव ऋत्विक् प्रवसेत्तदा शतपणान् दण्ड्य
इत्यर्थः स एवेति ऋत्विक् अदोषवित्यादानमुपनयन् गुरुः कर्त
दण्ड्य इत्यर्थः एवमिति याज्यादौ प्रमादात्कृते पश्चात्कारि
णम् प्रसाद्य परितोष्यानुज्ञाप्य ऋत्विगन्तरं वृणुयादित्यर्थः ।
कामादिति अशक्तत्यागे ऋत्विजः ऋत्विक्त्यागे याज्यस्य च
अपराधकर्म दण्डः अदोषस्य तु त्यागे दोषइत्यर्थः । मनुः
ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक् त्यजेद्यदि । शक्तं कर्मण्य
दुष्टञ्च तयोर्दण्डः शतं शतं ॥ एतच्च पूर्वकल्पितं प्रकारा
दिव अस्वस्तेन वा बोध्यं । नारदः ऋत्विक् त्रिविधो दृष्टः
पूर्वजुष्टः स्वयं कृतः । यश्चान्याभियुक्तः कुर्यादार्त्विज्यं सोऽपि
पूर्वकं ॥ ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणं । अदुष्टं

र्त्विजं याज्योविनियो तावुभावपि ॥ क्रमागतेष्वयं धर्मोऽतृते र्त्विक्षु च स्वयं । याहच्छिके तु संयोज्ये तत्त्यागे नास्ति किल्वि षं ॥संयोज्ये र्त्विजि ।वृहस्पतिः देशस्थित्या प्रदातव्यं ग्रहीतव्यं तथैवच । समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत्॥न याचते च यः कश्चिल्लाभात्सपरिहीयते । प्रयोगः पूर्वमाख्यातः समासेनोदि तोऽधुना ॥ श्रूयतां कर्षकादीनां विधानमिदमुच्यते । वाह्यकर्ष कवीजाद्यैः क्षेत्रोपकरणेन च ॥ ये समानास्तु तैः सार्द्धं कृषिः का र्य्या विजानता । वाह्यवीजात्ययाद्यस्य क्षेत्रहानिः प्रजायते ॥ तेनैव सा प्रदातव्या सर्व्वेषां कृषिजीविनां । अत्र हानिर्यस्य विसामख्या यत्नेन पतति तत्क्षतिस्तेनैव सोढव्या । तथा हिर ण्यकुप्यसूत्राणां काष्ठपाषाणचर्म्मणां । संस्कर्त्ता तु कलाभिज्ञः शिल्पी चोक्तोमनीषिभिः । हेमकाराद्योयत्र शिल्पं सम्भूय कुर्व्वते । कर्म्मानुरूपं निर्वेशं लभेरंस्ते यथां शतः निर्व्वेशोभृतिः अत्रैव विशेषमाह कात्यायनः शिक्षकाभिज्ञकुशला आचार्य्या श्चेति शिल्पिनः । एकद्वित्रिचतुर्भागानाहरेयुर्यथोत्तरं॥ वृह स्पतिः हर्म्म्यं देवगृहं वापि धार्म्मिकोपस्कराणि च । सम्भूय कुर्व्वतां तेषां प्रमुख्योद्व्यंशमर्हति ॥ नर्त्तकानामेषधर्म्मोधर्म्मवि द्भिरुदाहृतः । तालज्ञोलभतेऽध्यर्द्धं गायनास्तु समांशिनः ॥ अर्द्धमधिकं यत्र तदध्यर्द्धं तेन सार्द्धमंशं तालज्ञोलभते इत्यर्थः । स्वाम्याज्ञया तु यच्चौरैः परदेशात्समाहृतं । राज्ञे दत्वा तु षड्भागं लभन्ते ते यथांशतः ॥ चतुरोऽशांस्ततोमुख्यः शूरस्त्रीं शमवाप्नुयात् । समर्थस्तु हरेद्व्यंशं शेषास्त्वन्ये समांशिनः ॥ मुख्यो

बुद्धिशरीरव्यापारवान् शूरः साहसिकः समर्थोऽत्रातिबलः। कात्यायनः परराष्ट्राद्धनं यत्स्याच्चौरैः स्वाम्याज्ञया हृतं। राज्ञो दशांशमुद्धृत्य विभजेरन् यथाविधि॥ यत्र राज्ञोरक्षणादिव्यापारस्तत्र षड्भागः अत्यन्तस्वामिव्यवधाने यत्र न तद्व्यापारस्तत्र दशमांशः। तथा तेषां चेत्प्रसक्तानाञ्च ग्रहणं यः समाप्नुयात्। तन्मोक्षणार्थं यद्दत्तं तस्य कार्य्या समा क्रिया॥ तत्त्यागाय धनं सर्व्वैः समं विभज्य दातव्यं। तथा वणिजां कर्षकाणाञ्च चौराणां शिल्पिनान्तथा। अनियम्यांशकर्तृणां सर्व्वेषामेषनिश्चयः॥

अथ दत्ताप्रदानिकं॥ नारदः दत्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति। दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतं॥ अदेयमथ देयञ्च दत्तञ्चादत्तमेव च। व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः॥ तत्र ह्यष्टावदेयानि देयमेकविधं स्मृतं। दत्तं सप्तविधं विद्याददत्तं षोडशात्मकं॥ असम्यक्त्वञ्च दानस्यादेयद्रव्यदानाद्वा अयथादानाद्वा सम्प्रदानभ्रान्त्यादिना वा पित्राद्यसम्मत्या वा दातुरेवातिवृद्धत्वाद्यवस्थाभेदाद्वा॥

तत्रादेयानि॥ तत्र बृहस्पतिः। सामान्यं पुत्रदाराधि सर्व्वस्वन्यासयाचितं। प्रतिश्रुतं तथान्यस्मै न देयं त्वष्टधा स्मृतं॥ सामान्यमनेकस्वामिकं तत्र सामान्यपुत्रदारेष्वस्वाम्याद्दानासिद्धिः। अस्मा तथा च सामान्ये आधान पत्न भार्य्ययोर्व्विमतयोर्व्वचनबलात्सर्व्वस्वे सान्वयस्य प्रतिश्रुते च सर्व्वस्यैव वचनबलादेव आधिन्यासयाचितेषु स्वत्वाभावात्

पुत्रदारसर्व्वस्वप्रतिषेधेषु चतुर्ष्वपि स्वामित्वे सत्यपि वचन बलादेव दानबाध इति । स्मृतिसारमते तु सर्व्वस्वे शास्त्र निषिद्धेऽपि स्वत्वस्यानिवृत्तत्वात् किन्तु दातुः प्रत्यवायो निषिद्धाचरणादिति। नारदः अन्वाहितं याचितकमाधिः साधारणञ्च यत् । निक्षेपः पुत्रदारञ्च सर्वस्वं चान्वये सति ॥ आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना । अदेयान्याहुरा चार्य्या यच्चान्यस्मै प्रतिश्रुतं ॥ पुत्रस्य दाराणाञ्च सर्वस्वेऽपि उपा दानात् एकपदार्थतया एकत्वादष्टत्वं । आपत्कालेऽपि पुत्र दाराद्यन्वयानां विमतौ पुत्रदारसर्व्वस्वानामदेयतेत्यर्थः। तत्र आपत्तौ देयतामाह कात्यायनः विक्रयञ्चैव दानञ्च न नेयाः स्युर निच्छवः । दाराः पुत्रश्च सर्व्वस्वमात्मन्येव तु योजयेत् ॥ आप त्काले तु कर्त्तव्यं दानं विक्रय एव वा । अन्यथा न प्रवर्त्तेत इति शास्त्रविनिश्चयः ॥ तेषां दाराणां विमतानिच्छत्वं स्वयमेवोपयोगे तेषां सतोरनुमतौ परं तेषां दानमित्यर्थः । सर्व्वस्वमन्वयानु मतावपि न देयं । तत्सम्मताभावे दाननिषेधादिति तत्त्वं। पुत्रा नुमत्यैव दत्तकः । पुत्रकर्म्मोचित इत्यर्थः । पुत्रीगतानि पितृनिमि त्तानि प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः ॥ अत्रापि विशेषः एकस्मिन् पुत्रे वशिष्ठ आह स एव ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा नहि सन्तानाय पूर्व्वेषां न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्वयानुक्लेशापत्तेः ॥ एकपुत्रः स्वदार्थे स्था नानि न देयः स्त्रीत्यादि देहजनितमनन्यत्वात् । सर्व्वस्वमपि नि क्षिप्य न प्रदानाधिकारः तत्र स्वात्मनिबन्धनत्वादिति

वर्त्तुलार्थः । ननु अन्यथानुज्ञानाद्वर्त्तुरित्यविशेषेण श्रवणात्
भर्त्तुरनुज्ञया दानवद्ग्रहणेऽपि स्त्र्यधिकारसिद्धौ गतः प्रतिग्रहा
अनुमितिरपि तस्याः कल्प्येतेति चेन्नुक्तं सकलेन तस्या अधिकार
द्रव्यस्य तु प्रत्यक्षेण बाधसापेक्षविश्यापत्तेः ।

देयमाह बृहस्पतिः कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते ।
मध्वास्वादो विषं पश्चाद्दातुर्धर्मोऽन्यथा भवेत् ॥ कात्यायनः
सर्वस्वं गृहवर्ज्जन्तु कुटुम्बभरणाधिकं । यद्द्रव्यं तत्स्वकं देयमदेयं
स्यादतोऽन्यथा ॥ यदतिरिच्यते स्वकीयमपि तद्देयं । अन
तिरिक्तदाने पापं अतिरिक्ते तु पुण्यं अत दातुर्धर्मोऽन्यथा
भवेदिति पितृमाताकरणाद्धर्म्मसिद्धिरेव परं न भवतीति न
किन्तु प्रतिषिद्धाचरणादधर्मोऽपि दानसिद्धिश्च नावश्यं प्रत
स्य भूतकारणस्य सत्त्वात् । तेन सर्वस्वेन्तु गृहवर्जं इत्यस्य
दानाभिव्याप्तिः एवं स्थावरेऽपीति स्मृतिसारः । अन्यदपि
तु मन्त्रगतस्य आगमाय । तथा च बृहस्पतिः नस्तापकाद्गृहक्षेत्र
समक्षेत्र प्रदीयते । पित्र्यं वाथ स्वयं प्राप्तं तद्दातव्यं विवर्जितं ॥
श्रेयस्कादेश्यं स्वयं प्राप्तं वन्ध्याचारेण बन्धकं । वैवाहिकं प्रकाश्याते
धर्मदानं न विद्यते ॥ महागमः षड्विधस्वागमः अप्रतिसाद
आचार्यादावेतावाः अयोगः । अयोगः सर्वयोगस्य सर्वत्र
यत्नत एव नेति अध्युक्तः । अत दायोऽन्यथागतं सामीप्यादेः
क्रयः प्रसिद्धः क्रयः संमाने प्रयोगः कुसीदं कुसीदेन कवित्वा
दिव्यादिः । कन्यकापणनैमित्त भवसपि सौमूलकभाषा द्यत्र सामा
निन्द्याद्यनपाधारणकं तद्भवन यदिस्तिमिति प्रसाधानं भा

स्वयमविभक्तं। तदुक्तं सौदायिकं क्रमायातं शौ[illegible]प्राप्तञ्च यद्भवेत्। स्त्रीज्ञातिस्वाम्यनुमतं दत्तं सिद्धिमवाप्नुयात्॥ सौदायिकं कन्याभोग्यतया विवाहे यल्लब्धं तत्रैव पत्यादीयमाने पत्युरनुमत्यपेक्षा न्यायसहत्वात्। न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्मृतेरदृष्टार्थत्वापत्तेः क्रमायातेऽपि अविभक्ते स्थावरे ज्ञातीनां वा भ्रात्रान्तरानुमत्यपेक्षा। एवं शौर्य्यप्राप्ते रणजिते ग्रामक्षेत्रादौ स्वाम्यनुमत्यपेक्षा तस्यैव स्वामिगामित्वाभिधानम्। न तु वस्त्रादावपि तस्य जेतृपुरुषगामित्वाभिधानात्। भक्तिदा राज्ञा स्वपुरुषेषु समर्पितेऽश्वादौ राजान्तरसेनया जिते जेत्रा च दीयमाने भक्तिराजसम्मत्यपेक्षेत्यर्थ इति तन्वे। बन्धाधारेणेति बन्धकं यथा सम्बन्धि तथा परस्यापि कार्यं तेनायमर्थः इदं वस्तु मयि बन्धकमस्ति मया त्वयि दीयते त्वयापि बन्धकं गृहीत्वा एतत् स्वामिनि देयमित्यर्थः। एवं विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एको ह्यनीशः सर्वत्र दानाधमनविक्रये॥ इति विभक्तानामपि [illegible] जातस्त्वप्यग एव तिष्ठति तेन तत्र साधारण[illegible] कोऽनीशः पृथग्भूतेषु सर्वेषु द्रव्येषु स्वतन्त्रकृतस्य सिद्धिरेव। अन्ये तु दायादपदं पुत्र एव मुख्यमिति पितुरर्जि[illegible] [illegible]कस्यापि पुत्रस्य स्थावरे अनीशत्वं तेन प्रतिग्र[illegible] [illegible]त्यमेव तेन देयमित्याहुः। स्वतन्त्रस्वामिदत्त[illegible] तथैव हारीतः प्रतिश्रुताप्रदानेन दत्तस्याच्छेदनेन च। [illegible] धान्यरक्तान्याति तिर्य्यग्योनि [illegible]॥ [illegible] यत्र प्रति

ज्ञातं कर्मणा नोपपादितं । धनं तदृणसंयुक्तमिहलोके परत्र च ॥ कात्यायनः स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहं । न दद्यादृणवद्दाप्यः प्राप्नुयात्पूर्वसाहसं ॥ मत्स्यपुराणे प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः ॥ अस्यापवादमाह गौतमः प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात् । अधर्मे दत्तासंप्रदानत्वप्रयोजकोऽभिमतः ॥

अथ दत्तं ॥ तत्र बृहस्पतिः भृतिस्तुष्ट्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे । श्रद्धानुग्रहसंप्रीत्या दत्तमष्टविधं स्मृतं ॥ भृतिर्वेतनं तुष्ट्या नटादिषु दत्तं पण्यमूल्यं विक्रेतरि दत्तं स्त्रीशुल्कं विवाहे कन्याप्रदे दत्तं उपकारिणे प्रत्युपकारिणा दत्तं श्रद्धया सत्पात्रे यो दत्तं अनुग्रहेण पुत्रादिभ्यो दत्तं संप्रीत्या मित्रादिषु दत्तमिति दानस्य पूर्वमेवान्तर्भावं मत्वा स्पष्टं ॥

अथादत्तं ॥ तत्र नारदः । अदत्तन्तु भयक्रोधशोकवेगरुगन्वितैः । तथोत्कोचपरीहासव्यत्यासच्छलयोगतः । बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितैः ॥ कर्त्ता ममायं कर्मेति प्रतिलाभेच्छया च यत् । अत्र एतान्ताः पञ्च प्रकृतिस्थितिविरोधिनो द्रष्टव्याः । उत्कोचश्च कात्यायनेन वक्ष्यते परिहासउपहासः व्यत्यासः अन्यस्य देयस्य सम्प्रदानस्य वा छलं प्रमादादि बालोऽव्यवहारज्ञोऽविवेकः मूढो जडः अस्वतन्त्रः पुत्रदासादिः आर्त्तो रोगार्त्तः मत्तो मद्येन उन्मत्तो वातेन अपवर्जितो ज्ञातिभिर्बहिष्कृतः प्रतिलाभेच्छया सोपाधिदत्तमुपाध्यभिज्ञो । कात्यायनः कामक्रोधाभियोगान्तार्त्तक्लीबोन्मत्तप्रमादिभिः । व्यत्यासपरिहा

साभ्यां यद्दत्तं तत्पुनर्हरेत् ॥ यदि कार्य्यप्रसिद्ध्यर्थमुत्कोचा स्यात्प्रतिश्रुता । तस्मिन्नर्थेऽप्रसिद्धे तु न देया स्यात्कथंचन ॥ अथ प्रागेव दत्ता स्यात्प्रतिदाप्यः स तां बलात् । दण्डश्चैकादशगुणं प्राऊर्गार्ग्गीयगास्तथा ॥ अनार्त्तेन धर्म्मार्थं यद्दत्तं तद्दत्तमेव । सुस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात् । अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः इति कात्यायनवचनात् ॥ अथ स्वयं निवर्त्त्यत्वेन उत्कोचां परिभाषते कात्यायनः । स्तेनसाहसिकोद्वृत्तपारदारिकशंसनात् । दर्शनाद्वृत्तनष्टस्य तथा सत्यप्रवर्त्तनात् ॥ प्राप्तमेतैस्तु यत्किंचित्तदुत्कोचाख्यमुच्यते ॥ न तत् दाता दण्ड्यः स्यान्मध्यस्थस्तत्र दोषभाक् ॥ स्तेनाद्यनुसन्धाना नादिदर्शनार्थं यद्धनं दर्शयित्रे दत्तं यच्च साक्ष्यादीन् सत्याभिधाने प्रवर्त्तयित्रे दत्तं तदुत्कोचाख्यं कर्म्मसिद्धावपि ि र्त्थं मध्यस्थोप्युत्को [illegible] । कामक्रोधदत्तं च ए दानएवोक्तं बृहस्पतिः क्रुद्धाकृष्टप्रमत्तार्त्तबालोन्मत्तभयातुरैः । मत्तातिवृद्धनिर्धूतैः सम्मूढैः शोकरोगिभिः ॥ यच्च दत्तं तथैतैर्यत्तददत्तं प्रकीर्त्तितं । तेन धर्म्माद्यर्थं यद्दत्तत्प्रमाणमेवेत्यर्थः । अतिवृद्धो गलितेन्द्रियः । तथा प्रतिलब्धिश्रद्धया दत्तमपात्रे पात्रशङ्कया । कार्य्ये चाधर्म्मसंयुक्ते स्वामी तत्पुनराप्नुयात् ॥ नर्म्मदत्तं क्रीडादत्तं एवमन्यत्रापि येण यद्दानं तद्रूपस्यासौ न भवतीति तदाच्छिद्य गृह्णीयात् तथा च मनुः धर्म्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनं । पश्चा [illegible] न तथा तस्मान्न देयं तेन तद्भवेत् ॥ यदि संसाधयेत्तत्तु दर्पा

लोभेन वा पुनः। राज्ञा दाप्यः सुवर्णं स्यात्तस्य दोषस्य निष्कृतिः॥ यदि संसाधयेदिति त्वया मे यद्दत्तं तन्मया त्वयि न देयमिति पत्नीकृतं तद्देहीति वा यदि वदतीत्यर्थः। नारदः स्वात्म दत्तं योमोहाद्यश्चादेयं प्रयच्छति। दण्डनीयावुभावेतौ धर्म्मज्ञेन महीक्षिता॥

अथ भृतकविधिः॥ तत्र बृहस्पतिः अदेयादिकमाख्यातं भृतानामुच्यते विधिः। शुश्रूषामभ्युपेत्यैतत्पदमादौ निगद्यते॥ शुश्रूषामभ्युपेत्याशुश्रूषैरेतत्पदं विवादपदमित्यर्थः॥ वेतनस्यानपाकर्म तदर्थं स्वामिपालयोः। क्रमशः कथ्यते वादो भृतिभेदात्त्रयन्त्विदं॥ शुश्रूषकः कतिविधस्तत्र नारदः शुश्रूषकः पञ्चविधः शास्त्रे दृष्टोमनीषिभिः। चतुर्व्विधः कर्म्मकरः शेषादासास्त्रिपञ्चकाः॥ चतुर्व्विधाः कर्म्मकराः दासेन सह पञ्च शुश्रूषकाभवन्ति कथं चतुर्व्विधत्वं। तत्र नारदः शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत्। एते कर्म्मकराज्ञेयादासास्तु गृहजादयः॥ सामान्यस्वतन्त्रत्वमेषामाहुर्म्मनीषिणः। तदेव चतुर्व्विधत्वं बृहस्पतिरप्याह विद्या विज्ञानकार्यनिमित्तेन चतुर्व्विधाः। विद्या त्रयी समाख्याता ऋग्यजुस्सामलक्षणा। तदर्थं गुरुशुश्रूषां प्रकुर्य्याच्छास्त्रदेशितां॥ नारदः आविद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतोगुरुं। तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च॥ द्वितीयविधायां बृहस्पतिः। विज्ञान

नमुच्यते शिल्पं हेमकुप्यादिसंस्कृतिः । नृत्यादिकञ्च तच्छि-
ष्यः कुर्य्यात्कर्म गुरोर्गृहे ॥ विज्ञानार्थिनएव नारदेनान्तेवासि-
त्वमुक्तं स्वंशिल्पमिच्छन्नाहर्त्तुं बान्धवानामनुज्ञया । आचा-
र्य्यस्य वसेदन्ते कालं कृत्वा सुनिश्चितं ॥ आचार्य्यः शिक्षयेदेनं
स्वगृहे दत्तभोजनं । न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत्॥
यथा शिक्षयन्तमदुष्टञ्च यस्त्वाचार्य्यं परित्यजेत् । बलाद्वास-
यितव्यः स्याद्वधबन्धौ च सोऽर्हति । शिक्षितोपि कृतं काल-
मन्ते वासी समापयेत् । तत्र कर्म्म च यत्कुर्य्यादाचार्य्यस्यैव
तत्फलं ॥ बधोऽत्र ताडनमात्रं बन्धोबन्धनं कृतं कालमेता-
वन्तं कालं यावन्मया भवदीयमेतत् कर्म्म कर्त्तव्यमिति नियमितं
पूर्व्वमध्ययने तत्कालमन्तेवासीत्यर्थः । तत्काल मध्यादि-
फलं तथा गृहीतशिल्पः सम्यक् कृत्वाचार्य्यं प्रदक्षिणं । शक्ति-
तश्चानुमान्यैनमन्ते वासी निवर्त्तते ॥ तृतीयचतुर्थविधं काला-
दिनिमित्तेन बृहस्पतिराह योभुङ्क्ते परदासीन्तु सज्ञेयोवड-
वाभृतः । कर्म तत्स्वामिनः कुर्य्याद्यथान्योभृतकोनरः ॥ बड-
वार्थभृतः प्रोक्तस्तथाः भोगभृतः परः । कर्म कुर्य्यात्प्रतिज्ञा-
लभते पारिभाषिकं ॥ द्विप्रकारोभोगभृतः कृषिगोजीविसं-
भृतः । जातशस्यात्तथा क्षीरात्सलभेत न संशयः ॥ भोग-
भृतस्याप्यर्थभृतविशेषत्वाच्चतुर्द्धं । नारदेनैषां भृतकपदेन सर्व्वे-
प्रकारत्वमुक्तं तेषां प्रकारान्तरमप्याह भृतश्च भृतकस्त्रि-
धोज्ञेयउत्तमाधममध्यमः । शक्तिभक्त्यनुरूपत्वादेषां कर्म्माश्रया
भृतिः ॥ उत्तमस्त्वायुधीयोत्र मध्यमस्तु कृषीवलः । अधमो-

भारवाहः स्मादिति शेषस्त्रिविधोभृतः ॥ अर्थेष्वधिकृतो यः स्या
त्कुटुम्बस्य तथोपरि । सोऽधिकर्म्मकरो ज्ञेयः सचकौटुम्बिकः
स्मृतः ॥ वृहस्पतिनाप्यस्याप्यर्थभृतएवान्तर्भावः कृतः नार
देन तु सामान्यविशेषभावेन भेदेन गणनं । एषां मध्येऽपि
किं कस्य कर्म्मेति तत्र वृहस्पतिः शुभकर्म्मकराह्येते चत्वारः
समुदाहृताः ॥ चत्वारश्च शिष्योऽन्तेवासी भृतकः अधिकर्म्म
करश्च जघन्यकर्म्मभाजस्तु शेषादासास्त्रिपञ्चकाः । कर्म्मापि
द्विविधं ज्ञेयमशुभं शुभमेव च । अशुभं दासकर्म्मोक्तं शुभं
कर्म्मकरे स्मृतं ॥ गृहद्वाराशुचिस्थानरथ्यावस्करशोधनं ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनं ॥ इच्छतः स्वामिनः
स्वाङ्गैरुपस्थानमथान्ततः । अशुभं कर्म विज्ञेयं शुभमन्य
दतः परं ॥ नारदः गृहजातस्तथा क्रीतो लब्धो दायादुपाग
तः । अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥ मोक्षितो
महतश्चर्णाद्युद्धे प्राप्तः पणे जितः । तवाहमित्युपगतः प्रव्रज्या
वसितः कृतः ॥ भक्तदासश्च विज्ञेयस्तथैव वडवाभृतः । विक्रेता
चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥ दायादुपागतः
पित्रादिक्रमादागतः । अन्नाकालभृतो दुर्भिक्षपोषितः मोक्षित
इति महतऋणमोचनेनाभ्युपेतदास्यः कृतः एतावन्तं कालं तवाहं
दासः इति कृतसमयः भक्तदासः सुभिक्षेपि भक्तार्थमङ्गीकृत
दास्यः । नारदः राज्ञएव तु दासः स्यात्प्रव्रज्यावसितो नरः ।
न तस्य प्रतिमोक्षोऽस्ति नविशुद्धिः कथञ्चन ॥ कात्यायनः
प्रव्रज्यावसितो यत्र त्रयोवर्णाद्विजातयः । निर्व्वासं कारये

क्षिप्रं दासत्वं चत्रविट् नृपः । चत्रविडिति समाहारद्वन्द्वः । दत्तः पारिव्राज्यं गृहीत्वा तु यः स्वधर्म्मे न तिष्ठति। श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् ॥

अथ कस्य दासस्य कथं मोक्षोऽमोक्षो वा॥ तत्र नारदः तत्र पूर्वश्चतुर्व्वर्गो दासत्वान्न विमुच्यते। प्रसादात्स्वामिनोऽन्यत्र दास्यमेषां क्रमागतं॥ तत्रेति गृहजातक्रीतलब्धपारम्परीणादित्यर्थः । तत्रैव च दासपदं मुख्यं अन्यत्र पारतन्त्र्यगुणाद्गौणं ।तेन दासेनोढेत्यस्य पूर्वचतुर्व्वर्गग्रहणं ।तथा विक्रीणीते स्वतन्त्रः सन्नात्मानं योऽनराधमः । सजघन्यतमस्तेषां सोऽपि दास्यान्न मुच्यते ॥ स्वतन्त्रोऽस्वामिकः । विना स्वामिप्रसादादित्यत्रापि सम्बध्यते । यत्तु न स्वामिना विसृष्टोऽपि शूद्रो दास्याद्विमुच्यते । निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ॥ इति मार्कण्डेयपुराणे हरिश्चन्द्रवाक्यं तद्दासनिन्दापरं अन्यथा शूद्रेषु दासहेतुक्रयादिकं न प्रसज्येत इति तथा तवाहमिति चात्मानं योऽस्वतन्त्रः प्रयच्छति ।न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत तं । उत्तरस्य दास एवासौ न भवतीत्यर्थः । चौरापहृतविक्रीता ये च दासीकृता बलात् । राज्ञा मोचयितव्यास्ते दासत्वं तेषु नेष्यते॥ यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात् । दासत्वात्स परिमोच्येत पुत्रभागं लभेत सः ॥ एषां मध्ये अन्नाकालभृतो दास्यान्मुच्यते गोयुगं ददत् । भक्षितस्यापि यत्तत्र तन्न शुध्यति कर्म्मणा ॥ दुर्भिक्षभक्षितं यत्तद्गोयुगसहितं दत्वा मुच्यते इत्यर्थः । आहितोऽपि धनं दत्वा स्वामी यद्येनमुद्धरेत् ।आहितो नन्वकी

कृतः। अथोपगमयेदेनं सोपि क्रीतादनन्तरः। सबन्धकीकृतः
क्रीततुल्यइत्यर्थः। यस्मिन्नाहितो दासस्तमेवोपगमयेत् ग्राहये
यदि न मोचयेत्तदा तस्यैवासौ क्रीतादविशिष्ट इति लक्ष्मीधरा
दयः। ऋणन्तु सोदयं दत्वा ऋणी दास्यादिमुच्यते। ऋणार्थं कर्म्म
कारयेदित्यनेन ऋणकर्म्मकरः कथितः। कृतकालव्युपरमात्कृ
तकोऽपि विमुच्यते। यः कश्चित् कस्माच्चिद्धेतोः ऋणस्थितिकालं
यावद्दासीकृतः स कृतकः कर्म्मणा ऋणक्षयेणावधौ पूर्णे मुच्यते।
तवाहमित्युपगतोरणे प्राप्तः पणे जितः। प्रतिशीर्षप्रदानेन
मुच्यते तुल्यकर्म्मणा। तुल्यकर्म्मणा दासेनापरेणेत्यर्थः। भक्त
स्योपेक्षणात्सद्यो भक्तदासः प्रमुच्यते। निग्रहाद्वडवायाश्च मुच्यते
वडवाभृतः। वडवा दासी तस्यानिग्रहस्त्यागः तदनन्तरं स्वामि
कर्म्मकरत्वं निवर्त्तते इत्यर्थः। भक्तार्थं यः कर्म्मकरः सोऽपि तत्त्यागे
न प्रमुच्यते इत्यर्थः। कात्यायनः स्वदासीं यस्तु संगच्छेत्तत्प्र
सूता भवेत्ततः। अवेक्ष्य बीजं कर्त्तव्या अदासी सान्वया तु सा॥
अकाण्डपारिजातरत्नाकरेषु तत्स्वामिनः पुत्रान्तराभावे सा
स्वजनितपुत्रसहिता अदासी कार्य्या न तु पुत्रान्तरसत्त्वे इत्युक्तं।
यः प्रसादेनादासः कार्य्यस्तत्प्रकारमाह नारदः। स्वं दास
मिच्छेद्यः कर्त्तुमदासम्प्रीतिमानसः। स्कन्धादादाय तस्याप्तु
भिन्द्यात्कुम्भं सहाम्भसा॥ साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवा
किरन्। अदासइति चोक्त्वात्रिः प्राङ्मुखन्तं तथोत्सृजेत्॥ ततः
प्रभृतिवक्तव्यः स्वाम्यनुग्रहपालितः। भोज्यान्नोऽथ प्रतिग्राह्यो
भवत्यभिमतः सतां॥ अधनास्त्रय एवैते भार्य्यादासस्तथा सुतः।

यन्ति समधिगच्छन्ति यस्यैते तस्य तद्धनं ॥ देवलः पितर्य्युपरते पुत्राविभजेयुर्धनं पितुः । अस्वाम्यं हि भवेदेषां निर्द्दोषे पितरि स्थिते ॥ पत्यौ जीवति नारीणां दासानां स्वामिनि स्थिते । तद्वन्नियतमस्वाम्यं सर्व्वार्थेष्वब्रवीन्मनुः । विश्रब्धं ब्राह्मणः शूद्राद्द्रव्योपादानमाचरेत् । न हि तस्यास्ति किञ्चित्स्वं भर्तृहार्य्यधनो हि सः ॥ कात्यायनः दासस्य तु धनं यत्स्यात् स्वामी तस्य प्रभुः स्मृतः । प्रसादविक्रयाद्यत्तु न स्वामी धनमर्हति ॥ स्वामिप्रसादादात्मविक्रयाच्च यल्लब्धं दासेन तद्दासधनं स्वामी नार्हति दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात् । यस्माद्भर्त्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्य्यतः ॥ अत्र दासपदोपस्थापितमातियौगिकमेव दासीत्वं दासत्वञ्च पदिन्यायात् । अतोऽस्वामिकाऽन्यस्वामिका वा परिणीता सती वरस्वामिनः स्त्री भवति अर्थाच्च दासोढत्वं पूर्वस्वामिदास्यमोचनहेतुरर्थ अत एव तत्प्रकरणे वाक्यमिदं स्वाम्यनुमत्या च दासत्वं प्रमाण अतस्तद्विमतिविषये चेटिकापरिणयनवत्न पूर्वस्वामिस्वत्वहानिरिति ॥

अथ दास्याधिकारिणः ॥ तत्र नारदः वर्णानां प्रातिलोम्येन दासत्वं न विधीयते । स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता ॥ उत्तमस्य नीचदासत्वं न भवतीति दारत्ववत् । स्वाश्रमधर्मत्यागिनः परं तादृशी दासतेत्यर्थः । कात्यायनः त्रिषु वर्णेषु विज्ञेयं दास्यं विप्रस्य न क्वचित् । समवर्णेऽपि विप्रस्तु दासत्वं नैव कारयेत् ॥ श्रुताध्ययनसम्पन्नादूनं कर्म्म कारतः । तथापि

नाशुभं किञ्चित्प्रकुर्व्वीत द्विजोत्तमः । ब्राह्मणस्य हि दासत्वा न्नपतेजो विहन्यते । क्षत्रविट्शूद्रधर्म्मस्तु समवर्णे कदाचन ॥ कारयेद्दासकर्म्माणि ब्राह्मणं न बृहस्पतिः ॥ सगुणो निर्गुण मधिकगुणो न्यूनगुणं कर्म्म कारयेत् तच्चाप्यशुभं विण्मूत्रशोधना दिकं कर्म्म न कारयेदित्यर्थः । मनुः क्षत्रियञ्चैव वैश्यञ्च ब्राह्म णो वृत्तिकर्षितौ । बिभृयादानृशंस्येन स्वानि कर्म्माणि कार यीत् । स्वानि स्वजात्युक्तानि । दास्यन्तु कारयन्मोहाद्ब्राह्मणः संस्कृतान् द्विजान् । अनिच्छतः प्रभाविलाद्राज्ञा दाप्यः शता नि षट् ॥ दास्यं शूद्रोचितं द्विजानुचितमिति यावत् । शूद्रन्तु कारयेत्कर्म्म क्रीतमक्रीतमेव वा । दास्यायैव हि सृष्टोऽसौ स्वयमेव स्वयम्भुवा ॥ न स्वामिना विसृष्टोऽपि शूद्रो दास्याद्विमुच्यते । नि सर्गजं हि तत्तस्य कथं तस्मात्तदपोहति ॥ दास्याद्दासकर्म्मणः । विष्णुः समुत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसो दण्डः । उत्तमवर्णं ब्राह्मणं । उत्तमसाहसः पणसहस्रं । कात्या यनः आदद्याद्ब्राह्मणीं यस्तु विक्रीणीयात्तथैव च । राज्ञा तदकृतं कार्य्यं दण्ड्याः स्युः सर्व्वएव ते ॥ कामात्संसृजतीं यस्तु दासीं कुर्य्यात्कुलस्त्रियं । सङ्क्रामयति वान्यत्र दण्ड्यस्तत्राकृतं भवेत् । स्नेहोपगतां कुलस्त्रियं यो दासीं कुर्य्यादन्यत्र वा सम र्पयेत्तस्य दण्ड इत्यर्थः । बालधात्रीमदासीञ्च दासीमिव भुन क्ति यः । परिचारकपत्नीञ्च प्राप्नुयात्पूर्व्वसाहसं ॥ विक्रोश मानां यो भक्तां दासीं विक्रेतुमिच्छति । अनापदिस्थः शक्तः सन् प्राप्नुयाद्द्विशतं दमं ॥ बालधात्री दास्यपि सती बालकस्य स्तन्य

दासी अदासी शरणागता विक्रीयमाना स्वविक्रयमभि च्छन्ती। पूर्व्वसाहसं सार्द्धशतपणद्वयं॥

अथ वेतनस्यानपाकर्म्म॥ तत्र नारदः भृताय वेतनं दद्यात्कर्म्म स्वामी यथाकृतं। आदौ मध्येऽवसाने वा कर्म्मणां यद्विनिश्चितं॥ भृतावनिश्चितायान्तु दशमं भागमाप्नुयुः। लाभगोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः॥ लाभोवाणिज्येन धनवृद्धिः गोवीर्य्यं दुग्धं। याज्ञवल्क्यः योयावत्कुरुते कर्म्म तावत्तस्य तु वेतनं। बृहस्पतिः त्रिभागं पञ्चभागं वा गृह्णीयात्सीरवाहकः। भक्ताच्छादनभृतःसीरी भागं गृह्णीत पञ्चमं॥ जातशस्यत्रिभागन्तु प्रगृह्णीतोपधाभृतः॥ उपधा उपधिः यदुत्पद्यते तत्त्रिभाग इति न वस्त्रान्नादि किञ्चिद्दीयते यस्य स उपधाभृतः तस्य त्रिभागः भक्ताच्छादन दाने तु पञ्चमः। नारदोक्तोदशमांशः सीरवाहकेतरविषयः। आपस्तम्बः उद्धतः कीनाशस्य कर्म्मनाशे दण्डताडनं तथा पशुपालस्यावरोधश्चास्य पशूनां। उद्धतः पलायमानस्य हलवाहकस्य दण्डताडनं तथा गोपालस्य तस्य पशूनाञ्चावरोधनमधिकं। वृद्धमनुः समुद्रयानकुशलादेशकालार्थवेदिनः। नियच्छेयुर्वृत्तिं यान्तु सा साम्प्रागह्नता यदि॥ समुद्रयानकुशलावणिग्वेतनञ्चा इत्यर्थः। बृहस्पतिः गृहीतवेतनः कर्म्म न करोति यदा भृतः। समर्थस्सद्दमं दाप्योद्विगुणं तच्च वेतनं॥ समर्थः सन् चेन्न करोतीति सम्बन्धः। याज्ञवल्क्यः गृहीतवेतनः कर्म्म त्यजन् द्विगुणमावहेत्। अगृहीते समं दाप्योभृत्यैरक्ष्यउपस्करः॥ कर्म्मारम्भ

त्यजन् वैतनिकोऽगृहीतवेतनो द्विगुणमगृहीतवेतनस्तु समं दाप्यः। भृत्यैर्हलवाहकादिभिः उपस्करो लाङ्गलादीनां योक्त्रादिः। नारदः कर्म्माकुर्वन् प्रतिश्रुत्य कार्य्यो दत्वा भृतिं बलात्॥ वृद्धमनुः स चेन्न कुर्य्यात्तत्कर्म्म प्राप्नुयाद्विशतं दमं। इदमारभ्याकुर्व्वतः। अनारम्भे तु मनुः भृतोऽनार्त्तो योन कुर्य्याद्दर्पात्कर्म्म यथोदितं। स दण्ड्यः कृष्णलान्यष्टौ न देयं चास्य वेतनं॥ यथोक्तमार्त्तः सुस्थो वा यस्तत्कर्म्म न कारयेत्। न तस्य वेतनं देयमल्पोनस्यापि कर्म्मणः॥ आर्त्तस्तु कुर्य्यात्सुस्थः सन् यथाभाषितमादितः। सुदीर्घस्यापि कालस्य स लभेतैव वेतनं॥ अल्पोनस्य अल्पावशिष्टस्य। आर्त्तस्तु कर्म्म हित्वा सुस्थः सन् चिरेणापि कृत्वा वेतनं लभते। नारदः कालेऽपूर्णे त्यजन् कर्म्म भृतेर्नाशमवाप्नुयात्। स्वामिदोषादपक्रामन् यावत्कृतमवाप्नुयात्॥ विष्णुः भृतकश्चापूर्णे काले कर्म्म त्यजन्सकलमेव मूल्यं दद्यात् राज्ञे च पणशतं दद्यात् स्वामी चेत् भृतकमपूर्णे काले जह्यात् तस्य सकलमेव मूल्यं दद्यात् ॥ पणशतं राजनि अन्यत्र भृतकदोषात् मूल्यं वेतनं। वृद्धमनुः प्रमादान्नाशितं दाप्यः समं दिष्टाहनाशित। न तु दाप्यो हृतं चौरैर्दग्धमूढं जलेन वा ॥ दाप्यो भृतकः प्रकरणात्तद्दोषमन्तरेण तु नष्टं स न दाप्य इत्यर्थः। वृहस्पतिः प्रभुणा विनियुक्तः सन् भृतको विदधाति यत्। तदर्थमशुभं कर्म्म स्वामी तत्रापराप्नुयात् ॥ तदर्थं स्वाम्यर्थं अशुभं चौर्य्यादि। मत्स्यपुराणे मूल्यमादाय यो विद्यां शिल्पं वा न प्रय

च्छति। दण्ड्याः समूल्यं सकलं धर्मज्ञेन महीभृता ॥ वृद्धमनुः
पथि विक्रीय तद्भाण्डं वणिग्भृत्यं त्यजेद्यदि। अगतस्यापि देयं स्या
द्भृतेरर्द्धं लभेत सः॥ अगतस्यापि पूर्वं आवितमध्वानमगतस्या
पि भृतकस्य कृतवेतनं देयं स्यात् किन्त्वगताध्ववेतनार्द्धमित्यर्थः।
कात्यायनः यदा च पथि तद्भाण्डमाच्छिद्येत ह्रियेत वा। यावा
नध्वागतस्तेन प्राप्नुयात्तावतीम्भृतिं॥ आच्छिद्येत केनापि प्रति
रुद्ध्येत। बृहस्पतिः कृते कर्मणि यः स्वामी न दद्याद्वेतनं भृतेः॥
राज्ञा दापयितव्यः स्याद्विनयश्चानुरूपतः॥ कात्यायनः
त्यजेत्पथि सहायं यः श्रान्तं रोगार्त्तमेव वा। आप्नुयात्साहसं
पूर्वं ग्रामे त्र्यहमपालयन्॥ सहायं वैतनिकादि॥

अथ पण्यस्त्री विधिः॥ तत्र नारदः शुल्कं गृहीत्वा पण्यस्त्री
नेच्छन्ती द्विगुणं हरेत्। अनिच्छन् शुल्कदातापि शुल्कहानि
मवाप्नुयात्॥ स्मृतिः व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा॥
आमन्त्रिता च नागच्छेदवाच्या वडवा स्मृता॥ अवाच्या निर्दो
षा वडवा च वेश्या। मत्स्यपुराणे अयोनौ यः समाक्रामेद्बहुभि
र्वापि वासयेत्। शुल्कं सोऽष्टगुणं दाप्यो विनयं तावदेव तु॥
अयोनौ मुखादौ मेहनं प्रवेशयेत्। वासयेत् समाकार्य समा
नीय बहुभिः सह योजयेद्वा स वेश्याशुल्कमष्टगुणं राज्ञे दण्डञ्च
दद्यात्। तथा अन्यमुद्दिश्य वेश्यां योनयेदन्यस्य कारणात्।
तस्य दण्डो भवेद्राज्ञः सुवर्णस्य च माषकं॥ नीत्वा भोगं न या दद्या
द्दाप्यो द्विगुणवेतनं। राज्ञश्च द्विगुणं दण्डं तथा धर्मो न हीयते॥
बहूनां व्रजतामेकां सर्वे ते द्विगुणं दमं। तस्मादनुः पृथगाम्

दण्डश्च द्विगुणं परं॥ नारदः वेश्याः प्रधानायास्तत्र कामुकास्तद्गृहोषिताः। तत्समुत्थेषु कार्य्येषु निर्णयं संशये विदुः॥

अथ भूम्यादिभाटकविधिः॥परभूमौ गृहं कृत्वा स्तोमं दत्वा वसेत्तु यः। सतद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकं॥ स्तोमादिना वसित्वा तु परभूमावनिच्छतः। निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात्कथञ्चन॥ कात्यायनः गृहवार्य्यापणादीनि गृहीत्वा भाटकेन यः। स्वामिने नार्प्पयेद्यावत्तावद्दाप्यः सभाटकं॥ वारि परकारिताप्रतिष्ठितमत्र विवक्षितं। नारदः हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः। नार्प्पयेत्कृतकार्य्यः सन् तावद्दाप्यः सभाटकं॥ वृद्धमनुः योभाटयित्वा शकटं नीत्वा चान्यत्र गच्छति। भाटं न दद्याद्दाप्योऽसावनूढस्यापि भाटकं॥ शकटं वृषनौकादेरप्युपलक्षणं। अनूढस्य अवाहितस्यापि शकटादेः। नारदः स्तोमवाहीनि भाण्डानि पूर्णकालान्युपानयेत्। ग्रहीतुर्व्वा भवेद्भग्नं नष्टं चान्यत्र संप्लवात्॥ अन्यथाऽप्रत्यर्पितं सद्राजदैवकमन्तरेण कालदोषादिनापि नष्टं ग्रहीतुः समाधेयं भवेदित्यर्थः॥

अथ स्वामिपालविवादः॥ तत्र मनुः गोपः क्षीरभृतिर्यस्तु स दुह्याद्दशतोऽवरां। गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः॥ क्षीरभृतिः क्षीरमात्रवेतनः दशसु धेनुष्वेकां श्रेष्ठां भृतिं ग्रासाच्छादनादिना। इदं धेनुमात्रपरं। धेन्वधेनुपरन्तु नारदः गवां शताद्वत्सतरी धेनुः स्याद्द्विशताद्भृतिः। प्रतिसंवत्सरं गोपे सन्दोहश्चाष्टमेऽहनि॥ वत्सतरी त्रिहायणी

गौः यावत्योऽत्र धेनवस्तावतीनामष्टमाहे सम्यग्दोहस्य भृतिः ।
बृहस्पतिः तथा धेनुभृतः क्षीरं लभेताष्टमेऽहनि । धेनु
भृतो गोपाः । नारदः उपानयेद्गा गोपालः प्रत्यहं रज
नीक्षये । चीर्णाः पीताश्च ता गोपः सायाह्ने प्रत्युपानयेत् ॥
चीर्णा भक्षिततृणाः पीताश्च पीतजलाः । याज्ञवल्क्यः यथा
र्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा । प्रमादमृतनष्टांश्च
प्रदाप्यः कृतवेतनः ॥ मनुः दिवा वक्तव्यता गोपे रात्रौ स्वामिनि
तद्गृहे । योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात् ॥ मनु
नारदौ विक्रम्य तु हृतं चौरैर्न पालो दातुमर्हति । यदि देशे च
काले च स्वामिनः स्वस्य शंसति ॥ देशेऽन्वेषणयोग्ये एवं कालेऽ
पि । व्यासः पालग्रहे ग्रामघाते तथा राष्ट्रस्य विप्लवे । यत्प्रणष्टं
हृतं वा स्यान्न पालस्तत्र किल्बिषी ॥ बृहस्पतिः कृमिचौरव्याघ्र
भयाद्दरीश्वभ्राच्च पालयेत् । व्यायच्छेच्छक्तितः क्रोशेत् स्वामि
ने वा निवेदयेत् ॥ श्वभ्रो गर्त्तः दरी कन्दरादिः । अव्यायच्छ
न्नविक्रोशन् स्वामिने चानिवेदयन् । वोढुमर्हति गोपस्तां विनय
ञ्चैव राजनि ॥ वोढुं दातुं । मनुः नष्टं विनष्टं कृमिभिः
श्वहतं विषमे मृतं । हीनं पुरुषकारेण प्रदद्यात्पाल एव च ॥
नष्टं चौरादिनापहृतं गोपकर्त्तव्यप्रतिकारेण हीनं सन्नष्टादि
भूतं तेन पालवैगुण्यं तद्दानकारणमित्यर्थः । याज्ञवल्क्यः
पालदोषविनाशे तु पाले दण्डो विधीयते । अर्द्धत्रयोदशपणः
स्वामिनो द्रव्यमेव च ॥ विष्णुः अननुज्ञानाद्धरन् पञ्चविंशति
कार्षापणं ॥ अ[illegible] गृहीतमूल्यो गोपालो गां त्यक्त्वा

भिर्जनैर्वने । ग्रामचारी नृपैर्व्वध्यः शस्ताकी वनगोचरः । शस्ता की शलाकाग्रामर्पितः । यदि रोगादिदोषेण म्रियते गोर्गृहे क्वचित् । तदा स्वगोपतिर्द्दण्डोदत्वा गोपालवेतनं ॥ नारदः अनेन सर्व्वपालानां विवादः समुदाहृतः । मृतेषु च विशुद्धिः स्याद्वालशृङ्गादिदर्शनात् ॥ मृतत्वनिश्चयं कुर्य्यात्केनापि प्रकारेणेत्यर्थः ॥

अथ संविद्व्यतिक्रमः ॥ तत्र वृहस्पतिः । ग्रामश्रेणीगणानाञ्च सङ्केतसमयक्रिया । वाधाकाले तु सा कार्य्या धर्म्मकार्य्ये तथैव च ॥ राजचौरभये वाधा सर्व्वसाधारणी स्मृता । तत्रोपशमनं कार्य्यं सर्व्वैर्नैकेन कुत्रचित् ॥ कोषेण लेख्यक्रियया मध्यस्थैर्व्वा परस्परं । विश्वासं प्रथमं कृत्वा कुर्य्युः कार्य्याण्यनन्तरं ॥ शुचयो वेदधर्म्मज्ञादान्तादक्षाः कुलोद्भवाः । सर्व्वकार्य्यप्रवीणाश्च कर्त्तव्यास्तु महत्तमाः ॥ द्वौ त्रयः पञ्च वा कार्य्याः समूहहित वादिनः । कर्त्तव्यं वचनन्तेषां ग्रामश्रेणीगणादिभिः ॥ ग्रामोग्रामवासिसमूहः श्रेणी कारुसमूहः गणोब्राह्मणादिसमूहः । 'या ज्ञवल्क्यः । कर्त्तव्यं वचनन्तेषां समूहहितवादिनां । यस्तत्र विपरीतः स्यात्सदाप्यः प्रथमं दमं ॥ कात्यायनः युक्तियुक्तञ्च योहन्याद् कुर्य्योऽनवकाशदः । अयुक्तं तत्र योब्रूयात्प्राप्नुयात्पूर्वसाहसं ॥ नारदः पाषण्डनैगमश्रेणीपूगव्रातगणादिषु । संरक्षेत्समयं राजा दुर्गे जनपदे तथा ॥ पाषण्डास्त्रयीवाह्याः नैगमाः पौराः पूगोवणिगादिसमूहः व्रातश्चायुधीयसमूहः । आदि पदेन सर्व्वसङ्ग्रहादुपलक्षणतैव तेषा । याज्ञवल्क्यः निज

धर्म्माविरोधेन यस्तु सामयिकोभवेत् । सोऽपि यत्नेन संरक्ष्यो धर्म्मोराजकृतश्च यः ॥ स्वगणयोगक्षेमार्थं मासि मासि राजोपस्थानं कार्य्यमित्येवं रूपः सामयिकोधर्म्मः समयेऽकृते मासि मासि शान्तिः करणीया भवद्भिरित्यादिराजकृतोधर्म्मस्तद्व्यतिक्रमेण कार्य्यइत्यर्थः । कात्यायनः राज्ञा प्रवर्त्तितान्धर्म्मान् योनरोनानुपालयेत् । गर्व्वात्सपापोदण्ड्यश्चलोपयश्चाजशासनं ॥ याज्ञवल्क्यः गणद्रव्यं हरेद्यस्तु सम्विदं लङ्घयेत्तुयः । सर्व्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ॥ कात्यायनः साहसी भेदकारी च गणद्रव्यविनाशकः । उच्छेद्याः सर्व्वएवैते विज्ञाप्यैवं नृपे भृगुः ॥ समयक्रियास्वुपक्रमे वृहस्पतिः । पालनीयासमस्तैस्तु यः समर्थोविसम्वदेत् । सर्व्वस्वहरणं दण्डस्तस्य निर्व्वासनं पुरात् ॥ तत्र भेदमुपेक्षां वा यः कश्चित्कुरुते नरः । चतुःसुवर्णाः षण्णिष्कादण्डस्तस्य विधीयते ॥ मनुः षण्णिष्कानभिधाय शतमानन्तु राजतं इत्यधिकमाह यद्यपि निष्कश्चतुःसुवर्णएव प्रसिद्धस्तथापि सार्द्धं शतं सुवर्णानां निष्कमाहुर्म्मनीषिणः । तथा पञ्चसौवर्णिकोनिष्कइत्याद्युक्तनिष्कान्तरवारणाय चतुःसुवर्णइति निष्कविशेषणं । शतमानं रक्तिकानां विंशत्यधिकशतत्रयं । तथा अरुन्तुदः सूचकश्च भेदकृत्साहसी तथा । श्रेणीपूगनृपद्वेष्टा क्षिप्रं निर्व्वास्यते ततः ॥ अरुन्तुदः मर्म्मस्पृक् सूचकः पिशुनः । कात्यायनः [illegible]ऽयपङ्क्तिा वा सङ्क्षोभ्ता येन यो भवेत् । अकुर्व्वंस्तत्त[illegible] दोषमदर्शयन् ॥ वृह

स्मृतिः सम्भूयैकमतं कृत्वा राजभागं हरन्ति ये । ते तदष्टगुणं दाप्यावणिजः अपलायिनः ॥ राजभागं राजदेयं । याज्ञवल्क्यः समूहकार्य्यप्रहितो यल्लभेत तदर्पयेत् । एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयं ॥ वृहस्पतिः ततो लभ्येत यत्किञ्चित्सर्व्वेषामेव तत्समं ॥ कात्यायनः गणमुद्दिश्य यत्किञ्चित्कृत्वर्णं भक्षितं भवेत् । आत्मार्थं विनियुक्तं वा देयं तेनैव तद्भवेत् ॥ गणमुद्दिश्य गणहितव्याजेन यदृणं कृतं तत्कर्तृभिरेव देयमित्यर्थः । गणानां श्रेणिवर्गाणां गताः स्युर्ये तु मध्यतां । प्राक्तनस्य धनर्णस्य समांशाः सर्व्व एव ते ॥ अर्व्वागपि सर्व्वसम्मत्या वणिगादिगणादिषु प्रविष्टास्तेपि सर्व्वस्य पूर्वधनर्णस्य वाणिज्यादिमूलकस्य भागिन इत्यर्थः । तथैव भोज्यवैभाज्यदानधर्म्मक्रियासु च । समूहस्थोऽंशभागी स्यात् प्रगतस्त्वंशभाङ्न तु ॥ भोज्यं मोदकादि वैभाज्यं धान्यादि प्रगतः स्वकार्य्यमाचार्य्य गतस्तत्रांशभाक् न तु भवतीत्यर्थः ॥

अथ विक्रीयासम्प्रदानं । तत्र नारदः विक्रीय पण्यं मूल्येन क्रेतुर्य्यो न प्रयच्छति । स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलं ॥ अर्घश्चेदवहीयेत सोदयं पण्यमाहरेत् । स्थायिनामेष नियमो दिग्लाभो दिग्विचारिणां ॥ स्थावरस्य विक्रीतभूम्यादेः क्षयः शस्याद्युत्पत्तिहानिः जङ्गमस्य वृषादेर्व्वाहनादिक्रिया गवादेः फलं क्षीरादि क्रीतं रत्नादि चेत्तेनादत्तमर्घादवहीयते न्यूनमूल्यं क्रमेण स्यात्तदा मूल्यहानिसहितं स्थायिने क्रेत्रे देयं । दिग्विचारिणां देशान्तरगमनशालिनां गमने यो

स्वामिनः स्यात्तमेव दद्यात्। विष्णुः गृहीतमूल्योयः पण्यं क्रेतुर्नैव दद्यात्तस्यासौ सोदयं पण्यं दाप्योराज्ञा च पणशतं दण्ड्यः॥ विक्रेत्रा सर्व्वमूल्यग्रहणे कृते सति एतत्सर्व्वं द्रष्टव्यं। मूल्यग्रहणार्थं धारणे तु न दोषः। तत्र नारदः दत्तमूल्यस्य पण्यस्य विधिरेषप्रकीर्त्तितः। अदत्तेऽन्यत्र समयान्न च क्रेतुरतिक्रमः॥ नारदः उपहन्येत वा पण्यं दह्येतापह्रियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः॥ याज्ञवल्क्यः राजदैवोपघातेन पण्यदोषउपागते। हानिर्व्विक्रेतुरेवासौ याचितस्याप्रयच्छतः॥ दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी। सएवास्य भवेद्दोषोविक्रेतुर्योऽप्रयच्छतः॥

अथ क्रयविक्रयानुशयः। मनुः क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयोभवेत्। सोऽन्तर्द्दशाहे तद्द्रव्यं दद्याच्चैवाददीत वा॥ परेण तु दशाहस्य न दद्यान्नैव दापयेत्। आददानोददच्चैव राज्ञा दण्ड्यः शतानि षट्॥ यस्मिन् यस्मिन् कृते कार्य्ये यस्येहानुशयोभवेत्। तमनेन विधानेन धर्म्ये पथि निवेशयेत्॥ कात्यायनः क्रीत्वा प्राप्तं न गृह्णीयाद्योन दद्याददूषितं। मूल्याद्दशमभागन्तु दत्वा स्वं द्रव्यमाप्नुयात्॥ प्राप्तं स्ववशतामानीतं। स्ववशतामनानीते तु विशेषमाह सएव अप्राप्तेऽर्थे क्रियाकारे कृते नैव प्रदापयेत्। एवं धर्म्मोदशाहात्तु परतोऽनुशयो न तु॥ क्रियाकारः साक्षिलेख्यादिः तस्मिन् कृतेऽपि पण्ये स्ववशतामनानीतेऽवध्यभ्यन्तरे परावर्त्ये दत्तेऽपि न क्रेतुर्दशमभागहानिः [illegible]ग्राहकस्य तुनावध्युत्तरं परावर्त्त

नमित्यर्थः। यदा सदोषमेवात्यन्तं तस्य दोषं संङ्गोप्य छलेन
क्रीतं तत्पश्चादपि व्याघुट्य देयं। तथा वृहस्पतिः ज्ञात्वा सदोषं
यः पण्यं विक्रीणात्यविचक्षणः। तदेव द्विगुणं दाप्यस्तत्समं विन
यन्तथा॥ मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन च। अस्वतन्त्रे
ण मूढेन त्याज्यं तस्य पुनर्हरेत्॥ तस्य क्रेतुस्त्याज्यं त्यागार्हम्पुन
र्हरेत् विक्रेता। तथा अन्यहस्ते तु विक्रीय योऽन्यहस्ते प्रयच्छ
ति। सोऽपि तद्द्विगुणं दाप्यो विनयं तावदेव तु॥ अन्योऽचातदो
षः तदप्रयुक्त इति यावत्। अन्यत्र मूल्यसंवादं कृत्वान्यत्र क्रये
ऽधिकयेऽयं दण्ड इति रत्नाकरः। तथा दीयमानं न गृह्णाति क्री
त्वा पण्यञ्च यः क्रयी। विक्रीणानस्तदन्यत्र विक्रेता नापराप्नुया
त्॥ याज्ञवल्क्यः विक्रीतमपि विक्रेयं पूर्व्वक्रेतर्य्यगृह्णति। हानिश्चे
त्क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥ तथा सत्यङ्कारकृतं द्रव्यं द्विगु
णं प्रतिपादयेत्। स्वपण्यं विक्रेयत्वेनाभ्युपेत्य विक्रेत्रा क्रेतृदत्तं यद्व
नं गृहीतं तत्सत्यङ्कारकृतं तच्च विक्रये विमतेन तेन द्विगुणं क्रेत
रि देयमित्यर्थः। नारदः लाभार्थं वणिजां सर्व्वपण्येषु क्रयविक्र
यः। स च लाभोऽर्घमासाद्य महान् भवति वा न वा॥ तस्माद्देशे च
काले च विक्रये चार्थविद्वणिक्। न जिह्मेन प्रवर्त्तेत श्रेयानेवं
वणिक्पथः॥ पूर्वोक्तक्रये दशाहवचनं सर्व्वबीजेष्वेव। तथा च
व्यासनारदौ चर्म्मकाष्ठेष्टिकासूत्रधान्यासवरसस्य च। वसुकु
प्यहिरण्यानां सद्य एव परीक्षणं॥ त्र्यहाद्दोह्यं परीक्षेत पञ्चा
हाद्वाह्यमेव च। मुक्तावज्रप्रवालानां सप्ताहं स्यात्परीक्षणं॥

द्विपदामर्द्धमासस्तु पुंसां तु द्विगुणं स्त्रियः । दशाहं सर्व्ववीजा
नामेकाहोलैाहवाससां ॥ याज्ञवल्क्यः दशैकपञ्चसप्ताहमास
त्र्यहार्द्धमासिकं । वीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणं ॥
एवमेवोक्तं बृहस्पतिना । ततोऽर्व्वाक् पण्यदोषस्तु यदि संजा
यते क्वचित् । विक्रेतुः प्रतिदेयं तत्क्रेता मूल्यमवाप्नुयात् ॥
दुष्टमप्यर्व्वागेव देयं । अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्वि
भावितं । क्रीतं तत्स्वामिने देयं पण्यं कालेऽन्यथा न तु ॥
काले परीक्षा कालाभ्यन्तरे । अन्यथा तदूर्द्धं नैवेत्यर्थः । क्रे
त्रभिज्ञातदोषे तु वस्तुमात्रे नारदः । परिभुक्तञ्च यद्वासः
क्लिष्टरूपं मलीमसं । सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः ॥
एतत्सर्व्वं कालनियमनं अपरीक्ष्य गृहीते । तथा च याज्ञ
वल्क्यः क्षयं वृद्धिञ्च वणिजां पण्यानामभिजानतां । क्रीत्वा
नाऽनुशयः कार्य्यः कुर्व्वन् षड्भागदण्डभाक् ॥ नारदोऽपि क्री
त्वा नानुशयं कुर्य्याद्वणिक्पण्यविचक्षणः । क्षयं वृद्धिञ्च जानीया
त्पण्यानां चस्य यादृशीं । क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदो
षतः ॥ परीक्षाभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः ॥ बृहस्पतिः
परीक्षेत स्वयं पण्यमन्येषाञ्च प्रदर्शयेत् । परीक्षितं बहु
मतं गृहीतं न पुनस्त्यजेत् ॥ उक्तकालादर्व्वागपि द्रव्यदाने
विशेषमाह नारदः क्रीत्वा मूल्येन योद्रव्यं दुष्क्रीतं मन्यते
क्रयी । विक्रेतुः प्रतिदेयन्तु तस्मिन्नेवाह्न्यविक्षतं ॥ द्वितीयेऽ
ह्नि ददत्क्रेता मूल्यात्त्रिंशांशमाहरेत् । द्विगुणन्तु तृतीये
ह्नि परतः क्रेतुरेव तत् ॥ अस्य त्र्यहपर्य्यन्तमेव परीक्षणं तत्रे

हं । कात्यायनोऽपि दोषादौ विशेषमाह क्रीत्वा चानुशया त्पण्यं त्यजेद्दोषादि योनरः । अदुष्टमेव काले तु समूल्याद् शमं हरेत् ॥ काले उक्तार्पणकालइत्यर्थः इदन्तु वाक्यं यदस्तु क्रेत्रा न स्ववशीकृतं तत्परं । स्ववशीकृतपरं भविष्यदा क्ये अतोन विरोधः । क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपा गतं । षड्भागं तत्र मूल्यस्य दत्वा क्रीतं त्यजेद्भृगुः ॥ दोषमा च्छाद्य यद्विक्रीतं तत् बहुनापि कालेन परावर्त्य दातुं शक्य तएव । तदाह मनुः नान्यदन्येन संसृष्टरूपं विक्रयमर्हति न चावद्यं न च न्यूनं न दूरे न तिरोहितं ॥ अन्यत्कुङ्कुमादि अन्येन कुसुम्भादिना चावद्यं कुक्कुरादिलीढं दूरे पलायति अतोऽज्ञातत्वं तिरोहितं वस्त्रादिना एतच्च सर्व्वमेव ज्ञातं चिरे णापि परावर्त्यमिति भावः ॥

अथ सीमाविवादः ॥ तत्र मनुः सीमां प्रति समुत्पन्ने वि वादे ग्रामयोर्द्वयोः । ज्यैष्ठे मासि नयेदेतां सुप्रकाशेषु सेतुषु सीमावृक्षांस्तु कुर्व्वीत न्यग्रोधाश्वत्थ किंशुकान् । शाल्मलीशा लतालांश्च क्षीरिणश्चैव पादपान् ॥ गुल्मान् वेणूंश्च विविधा न् शमीवल्लीस्थलानि च । शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति ॥ तडागान्युदपानानि वाप्यः प्रस्रवणानि च । सीमासन्धिषु कार्य्याणि देवतायतनानि च । उपच्छ न्नानि चान्यानि सीमालिङ्गानि कारयेत् । सीमाज्ञाने नृणां वीक्ष्य लोके नित्यं विपर्य्ययं । अश्मनोऽस्थीनि गोवालां स्तुषां भस्मकपालिकाः ॥ करीषमिष्टकाङ्गारान् शर्करावालु

कारयेत् । यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत् ॥ तानि सन्धिषु सीमायाः अप्रकाशानि कारयेत् । वृत्तादावप्युपलम्भमेव । एतैर्लिङ्गैर्नयेत्सीमां राजा विवदतां नृणां पूर्वभुक्त्या च सततमुदकस्यागमेन वा ॥ बृहस्पतिः वापीकूपतडागादि चैत्यारामसुरालयाः । स्थलनिम्ननदीस्रोतःशरगुल्मनगाश्रयः ॥ यदि संशय एव स्याल्लिङ्गानामपि दर्शने । साक्षिप्रत्यय एव स्याद्विवादे सीम्नि निश्चयः ॥ तथा साक्ष्यभावे तु चत्वारो ग्रामाः सीमान्तवासिनः । सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ ॥ सामन्तानामभावे तु मौलानां सीमसाक्षिणां । इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान् ॥ व्याधाञ्छाकुनिकान् गोपान् कैवर्त्तान्मूलखानकान् ॥ व्यालग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान् । ते पृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणं । तत्तथा स्थापयेद्राजा धर्म्मेण ग्रामयोर्द्वयोः ॥ नियदरीतिमाह स एव । शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः । सुकृतैः शापिताः स्वैः स्वैर्ब्रूयुस्ते तु समञ्जसं ॥ सुकृतैरिति मृषाभिधानेन मम सुकृतं नश्यत्विति समञ्जसं सत्यं । तथा ते शब्दास्तु यथा ब्रूयुः सामन्ताः सीमनिर्णयं । निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः ॥ नारदः नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि ॥ गुरुत्वादस्य कार्य्यस्य क्रियैषा बहुषु स्थिता । एकश्चेदुन्नयेत्सीमां सोपवासः समुन्नयेत् ॥ रक्तमाल्याम्बरधर[illegible] क्षितिमारोप्य मूर्द्धनि ॥ सोपवासत्वाधिकं । बृ[illegible] आर्थिकविनाशे तु एकोऽप्यु

अपवसनः ॥ ज्ञातॄणां चिह्नानाञ्चेत्यर्थः । कात्यायनः कर्त्त
व्यान प्रदुष्टांश्च राज्ञा धर्म्मं विजानता । त्यक्त्वा दुष्टांश्च सा
मन्तानन्यान्मौलादिभिः सह ॥ सन्निश्य कारयेत्सीमामेवं
धर्म्मविदो विदुः । सामन्ताः सीमप्रभवाः यथोक्तेन नयन्त
स्ते पूयन्ते सत्यसाक्षिणः । विपरीतं नयन्तस्तु दाप्याः स्युर्द्वि
गुणं दमं ॥ सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणां । सर्व्वे
पृथक्पृथग्दण्ड्याः राज्ञा मध्यमसाहसं ॥ सेतौ सीमासेतौ ॥
कात्यायनः ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्त्तितं ।
गृहं गृहस्य निर्द्दिष्टं समन्तात्परिरभ्य च ॥ समन्तात्परिर
भ्येति यः परितोवेष्टयित्वा स्थितश्चतुर्दिक्षु ग्रामादेः स एव
तत्सीमासाक्षी एवं क्षेत्रगृहयोरपि इत्यर्थः । ये तत्र पूर्व्वसा
मन्ताः पश्चाद्देशान्तरं गताः । तन्मूलत्वात्तु ते मौलाऋषि
भिः सम्प्रकीर्त्तिताः ॥ नारदः यदा तु न स्युर्ज्ञातारः सीमा
याः न च लक्षणं । तदा राजा द्वयोः सीमामुन्नयेदिष्टतः
स्वयं ॥ बृहस्पतिः अन्यग्रामात्समाहृत्य दत्तान्यस्य यदा
मही । महानद्याथ वा राज्ञा कथं तत्र विचारणा ॥ नद्यो
त्सृष्टा राजदत्ता यस्य तस्यैव सा मही । अन्यथा न भवेल्ला
भो नराणां दैवराजतः ॥ नद्योर्द्वयोः जीवनश्च दैवराजवशा
न्नृणां । तस्मात्सर्व्वेषु कार्य्येषु तत्कृतं न विचालयेत् ॥ ग्राम
योरुभयोर्यत्र मर्य्यादा कल्पिका नदी । नद्योदये न चाख्या
सा चालयन् दण्डमर्हति ॥ कुरुते तदाहरणं भाग्याभाग्यव
शान्नृणां ॥ तत्र विचारणा एकत्र कूलपातनन्तु भूमेरन्यत्र

संस्थितिं । नदी तीरे प्रकुरुते तस्य तां न विचालयेत् ॥ कूलपातक्रमेण या भूः सोत्तरस्वामिन एवेत्यर्थः । क्षेत्रं समस्तमुत्सृज्य भूमिश्छिन्ना यदा भवेत् । नदीस्रोतः प्रवाहेण पूर्वस्वामी लभेत तां ॥ क्षेत्रोत्सर्गे नदी सञ्चारेऽपि लङ्घिता भूः पूर्वस्वामिन एव तिष्ठतीत्यर्थः । या राज्ञा क्रोधलोभेन छलान्यायेन वा हृता । दत्तान्यस्य तु तुष्टेन न सा सिद्धिमवाप्नुयात् ॥ प्रमाणरहिते ह्यर्थे भुञ्जतो यस्य वा हृता । गुणाधिकाय वा दत्ता तस्य तां न विचालयेत् ॥ क्रोधादिना हृतापि राज्ञा सीमा निवर्त्यान्या तु तत्कृता स्थ सीयेत्यर्थः । याज्ञवल्क्यः आरामायतनग्रामनिपानोद्यानवेश्मसु । एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु ॥ मनुः क्षेत्रकूपतडागानामारामस्य गृहस्य च । सामन्तप्रत्ययो ज्ञेयः सीमासन्धिविनिर्णयः ॥ वृहस्पतिः निवेशकालादारभ्य गृहवाप्यापणादिकं । येन यावद्यथा भुक्तं तस्य तन्न विचालयेत् ॥ वातायनाः प्रणाल्यश्च तथा निष्कर्वेदिका । चतुःशालं स्यन्दनिका प्राक्भिर्दिष्टान्न चालयेत् ॥ प्रणाली जलमार्गः निष्कर्वेदिका नागदन्तवेदिका चतुःशालं चतुर्द्वारं गृहं स्यन्दनिका गृहपटलप्रान्तः तु हारीति प्रसिद्धा । मेखलाभ्रमनिष्काशी गवाक्षांश्चोपरोधयेत् । प्रणालीं गृहवास्तुञ्च पीडयन् दण्डभाग्भवेत् ॥ निवेशसमयादूर्द्धं नैते योज्याः कदाचन । दृष्टिपातं प्रणालीञ्च न कुर्यात् परवेश्मसु ॥ मेखला मूलबन्धः भ्रमो जलनिर्गमः निष्काशो निःसरणपथः नोपरोधयेत् न

निरुन्ध्यात् दृष्टिपातोगवाक्षः । बृहस्पतिः वर्चस्थानं वह्निचर्व्वं गर्त्तोच्छिष्टाम्बुसेचनं । अत्यारात्परकुड्यस्य कर्त्तव्यं न कदाचन ॥ वर्च्चस्थानं विण्मूत्रोत्सर्गस्थानं अत्यारात् अतिसमीपे । कात्यायनः विण्मूत्रोदकचक्रस्य वह्निश्वभ्रे निवेशनं । अरत्निद्वयमुत्सृज्य परकुड्यां निवेशयेत् ॥ चक्रं तैलादियन्त्रं ॥ बृहस्पतिः यान्त्यायान्ति जनायेन पशवश्चानिवारिताः । तदुच्यते संसरणं न रोद्धव्यन्तु केनचित् ॥ कात्यायनः सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः । फलं पुष्पञ्च सञ्जातं क्षेत्रस्वामिषु निर्द्दिशेत् ॥ द्वयोः क्षेत्रयोः स्वामिषु । अन्यक्षेत्रेषु जातानां शाखास्वान्यत्र संस्थिताः । स्वामिनं तं विजानीयाद्यस्य क्षेत्रेषु संस्थिताः ॥ शाखा इतिशेषः । मनुः समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि । सद्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् ॥ आपद्गतस्तथा वृद्धोगर्भिणी बालएव वा । परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः ॥ परिभाषणं मा पुनरेवं कार्षीरित्यादि दण्डशून्यं वाक्यं । विष्णुः पथ्युद्यानोदकसमीपेऽस्थिव्युत्करादित्यागे पणशतं तच्च प्राश्येत् ॥ व्युत्करोऽवकरः गोन्दतलइति प्रसिद्धः एवञ्च मूत्रपुरीषावकरादिकं जलसमीपे राजमार्गादौ कुर्व्वाणः पणशतं दण्ड्यः यत्तु मनुना कार्षापणद्वयं दण्ड्य इत्युक्तं तदनतिशयितस्य त्यागेऽतोन विरोधः तन्मलं प्राश्येन्नोज्झेत् । कात्यायनः तडागोद्यानतीर्थानि योऽमेध्येन विनाशयेत् । अमेध्यं शोधयित्वा तु दण्डयेत् पूर्वसाहसं ॥ उपहन्तृद्वारा तदमेध्यं शोधयित्वा तं सार्द्धशतप

सहस्रं दण्डयेत् इदञ्च सकृदुपघाताचरणे । मनुः गृहं तडा
गमारामं क्षेत्रं वा भीषया हरन् । शतानि पञ्च दण्ड्यः
स्यादज्ञानाद्द्विशतो दमः ॥ गृहादिस्वामिनां भयमुत्पाद्य तद्गृ
हादिहरणे पञ्चपणशतानि दण्ड्यः स्वामित्वभ्रमेण तु हरणा
द्द्विशतमित्यर्थः । वृद्धमनुः स्थापिताश्चैव मर्य्यादामुभयोर्ग्रा
मयोस्तथा । अतिक्रामन्ति ये पापास्ते दण्ड्या द्विशतं दमं ॥
मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा । क्षेत्रस्य हरणे
दण्ड्या मध्यमोत्तमसाहसं ॥ मर्य्यादा सीमावृत्त्यादिः । शङ्खः
क्षेत्रमर्य्यादाभेदेऽष्टशतं सीमाव्यतिक्रमेऽष्टसहस्रं क्षेत्रोदकहर
णेऽष्टशतं ॥ अष्टाधिकं शतं सहस्रञ्च क्षेत्रोदकं क्षेत्रनिर्व्वाहक
मुदकं । नारदः परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते । महा
गुणोऽल्पबाधश्चेद्वृद्धिरिष्टा क्षये सति ॥ येन सेतुना बहुतरउ
पकारः क्षेत्रस्वामिनश्चाल्पा पीडा सक्षेत्रिणा न निवारणीय
इत्यर्थः । याज्ञवल्क्यः स्वामिने अनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत् ।
उत्पन्ने स्वामिनोभागस्तदभावे महीपतेः ॥ क्षेत्रस्वाम्यनुमति
मनादाय तत्क्षेत्रे कृतस्य सेतोर्म्महिम्ना यः परेषां शस्याधिगम
स्तत्र सेतुकर्त्ता न भागी किन्तु क्षेत्रस्वामी तदभावे तु
राजेत्यर्थः ॥

अथ कृष्टाकृष्टे ॥ तत्र नारदः अशक्तप्रेतनष्टेषु क्षेत्रिकेष्व
निवारितः । क्षेत्रञ्चेद्विकृषेत्कश्चिदाश्नुवीत सतत्फलं ॥ अशक्तोऽर्थ
रहितः नष्टस्त्यक्तदेशः अप्रभुकं क्षेत्रं खिलीभूतमित्यर्थः । विक्र
ष्यमाणे क्षेत्रे तु क्षैत्रिकः पुनराव्रजेत् । खिलोपचारं तत्सर्वं

हृत्वा क्षेत्रमवाप्नुयात् ॥ खिलोपचारं खिलकर्षणव्ययायासनि
ष्क्रयं । कात्यायनः अशक्तितोन दद्याच्चेत् खिलार्थे यः कृतो
व्ययः । तदष्टभागहीनन्तु कर्षकः फलमाप्नुयात् ॥ वर्षाण्यष्टौ
समोक्ता स्यात्परतः स्वामिनो हि तत् ॥ क्षेत्रस्याष्टमांशं क्षेत्र
स्वामी लभते सप्तांशान् कर्षकः । अष्टवर्षाण्येवं ततस्तु खिलो
पचारमदत्त्वैव स्वामी क्षेत्रं लभते । अतिक्रान्तकर्षणीय खिल
भूमिविषयकमेतत् । संवत्सरेणार्द्धखिलं खिलं स्याद्वत्सरैस्त्रि
भिः । पञ्चवर्षावसन्नञ्च क्षेत्रं स्यादटवीसमं ॥ एकवर्षप
तितमर्द्धखिलं त्रिवर्षपतितं खिलं पञ्चवर्षपतितमरण्यसमं भव
तीत्यर्थः । बृहस्पतिः गृहीत्वा वापयेत्काले वापगोपनस
ङ्ग्रहान् । अकुर्व्वन् स्वामिने दाप्योमध्यक्तं सदस्तु सः ॥ सदः
शस्यं मध्या उत्पत्तिरित्यर्थः । व्यासः क्षेत्रं गृहीत्वा यः कश्चिन्न
कुर्य्यान्न च कारयेत् । स्वामिने ससदं दाप्यो राज्ञे दण्डञ्च
तत्समं ॥ यत्र क्षेत्रे यद्देयं तदाह चिरावसन्ने दशमं क्रिय
माणे तथाष्टमं । सुसंस्कृते तु षष्ठं स्यात्परिकल्प्य यथास्थि
ति ॥ एतत्सर्व्वं मध्योत्पत्तौ बृहस्पतिवचनात् । तेनारण्य
समे मध्योत्पत्तेर्द्दशमं खिलेऽष्टमं अर्द्धखिले षष्ठं भागं क्षेत्र
मङ्गीकृत्य पातयित्वा क्षेत्रिणे क्षेत्राङ्गीकर्त्ता दाप्य इत्यर्थः । क्षे
त्र्यननुमत्या क्षेत्रवापे मनुः ये क्षेत्रिणोवीजवन्तः परक्षेत्रप्रवा
पिणः । ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित् ॥ ओ
घवाताहृतं वीजं यस्य क्षेत्रे प्ररोहति । क्षेत्रिकस्यैव तद्वीजं

न वप्ता लभते फलं ॥ तथा अबीजविक्रयी चैव बीजोत्कृष्टा तथैव च । मर्य्यादाभेदकश्चैव प्राप्नुयाद्विकृतं वधं ॥

अथ शस्यरक्षा ॥ तत्र याज्ञवल्क्यः ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा । धनुःशतं परीणाहो ग्रामक्षेत्रान्तरं भवेत् ॥ द्वे शते कर्व्वटस्य स्यान्नगरस्य चतुःशतं । कर्व्वटो ग्रामादुत्कृष्टो नगरादधमः । धनुश्चतुर्हस्तो दण्डः ग्रामीणानामिच्छया वा भूम्यनुसारेण वा राजाज्ञया वा पशुप्रचारणाय ग्रामादिकमभितो भूमिस्त्याज्या सा च ग्रामे हस्तचतुश्शतमिता महाग्रामे तद्विगुणा नगरे तच्चतुर्गुणा इत्यर्थः । मनुः धनुःशतं परीणाहो ग्रामस्य स्यात्समन्ततः । शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य च ॥ नगरस्य नगरकल्पस्य तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि । न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणां ॥ शम्यापाताः काण्डपाताः तत्र ग्रामपरीणाहाभ्यन्तरे विष्णुः पथि ग्रामविवीतान्ते न दोषोऽनावृते चाल्पकालं ॥ भक्षणे सतीति शेषः । ग्रामपरीणाहानां समीपे यत्क्षेत्रमनावृतं तस्याल्पकालं गवादीनां भक्षणे पालदोषो नास्ति । बहुकालभक्षणे तत्रापि दोषश्चाशु चापराधात् । तथा च याज्ञवल्क्यः पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते । अकामतः कामचारे चौरवद्दण्डमर्हति ॥ विवीतो गवादिचरणस्थानं । मनुः क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति । सर्व्वत्र तु सदो देयः क्षेत्रिकस्येति धारणा ॥ अन्येषु दूरस्थेषु । पशुविशेषे दण्डविशेषः । तच

शङ्खलिखितौ रात्रौ चरन्ती गौः पञ्च माषान् दिवा त्रीन् मुहूर्त्तं माषं ग्रामे त्वदण्ड्या । माषश्चार्थं राजतः । शैवर्ण्णमाषकैः सञ्ज्ञा दण्डकर्म्मसु शस्यते । पशूनां शस्यचरणे माषैरन्यैस्तु राजतैरिति भाष्यकारवचनात् । माषश्चार्थं राजतः कृष्णलद्वयात्मा । द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकइति मनुवचनात् । रात्रौ चरन्ती यावल्लौहित्यं पञ्च माषान् दिवा तु यावल्लौहित्यं चरन्ती त्रीन् क्षणं दिवा चरन्ती माषं ग्रामसमीपे तु चरन्ती न दण्ड्या इत्यर्थः । तद्दण्डस्तु तत्स्वामिनएव पशोरदण्ड्यत्वात् । कात्यायनः दापयेत्पणपादं गां द्वौ पादौ महिषीन्तथा । तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तितः ॥ पणोऽत्र कार्षापणः । गौतमः पञ्च माषान् गवि षडुष्ट्रे अश्वमहिषयोर्द्दश अजाविके द्वौ द्वौ ॥ शङ्खलिखितौ सर्व्वेषामेव वत्सानां माषं । नारदः सत्वानां द्विगुणो दण्डो वसतान्तु चतुर्गुणः प्रत्यक्षचारकाणान्तु चौरदण्डः स्मृतोबुधैः ॥ सत्वानां शस्यभक्षणे भ्रान्तानां वसतां तत्रैव चरित्वा नीतरात्रिकालानां प्रत्यक्षचारकाः क्षेत्रस्वामिनि पश्यत्येव बलेन चारकाः । नारदः समूलशस्यनाशे तु तत्स्वामी शस्यमाप्नुयात् । वधेन गोपोमुच्येत दण्डं स्वामिनि पातयेत् ॥ वधोऽत्र ताडनं । विष्णुः सर्व्वत्र स्वामिने विनष्टशस्यमूल्यञ्च ॥ सपालेन विपालेन वा पशुना शस्यचरणे पशुस्वामी क्षेत्रिणे नष्टशस्यमूल्यं राज्ञे च दण्डं दाप्यइत्यर्थः । नारदः गोभिस्तु भक्षितं शस्यं योनरः प्रतियाचते । सामन्तानुमतं देयं

धान्यं यत्तत्र वापितं ॥ गवत्रं गोमिना देयं धान्यं वै कर्षकाय च । एवं हि विनयः प्रोक्तो गवां प्रस्थावमर्द्दने ॥ गवत्रं धान्यस्तम्बः गोमी गोस्वामी तेन गवत्रं धान्यं वा क्षेत्रिणे देयमित्यर्थः । ग्राह्यमप्येतन्नरकहेतुत्वान्न ग्राह्यं । तथा चोशना गोभिर्विनाशितं धान्यं योनरः प्रतियाचते । पितरस्तस्य नाश्नन्ति नाश्नन्ति च दिवौकसः ॥ पालाधिष्ठानकाले पालस्य दण्डः नोचेत्स्वामिनएव तत्रैव दिग्दर्शनं विष्णुः अपालकायास्तत्स्वामी सपालायास्तु पालकः ॥ तत्रापवादमाह नारदः राजग्राहगृहीतो वा वज्राशनि हतोऽपि वा । अथ सर्पेण वा दष्टो वृक्षाद्वा पतितोभवेत् ॥ व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रुतः । न तत्र दोषः पालस्य न च दोषोऽस्ति गोमतां ॥ याज्ञवल्क्यः महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः । पालोयेषां न ते मोच्या दैवराजपरिप्लुताः ॥ महोक्षोवीजसेक्ता वृषः उत्सृष्टास्तु देवतोद्देन पशवः सूतिका नवप्रसूता आगन्तुकायामान्तरादागताः स्वयूथपरिभ्रष्टा वा पालोयेषां न विद्यतइत्यर्थः ते नापाल्याः सेनादिदर्शनाद्दुन्दुभ्यादिश्रवणाद्वा पलायिताः पशवोयदि क्षेत्रं चरन्ति तदा न दोषइत्यर्थः । मनुः अनिर्द्दशाहां गां सूतां वृषान्देवपशूंस्तथा । सपालान्वा विपालान्वा अदण्ड्यान्मनुरब्रवीत् ॥ वृषान् वीजसेक्तॄन् । उशना अदण्ड्याहस्तिनोऽश्वाश्च प्रजापाल्याहि ते स्मृताः । अदण्ड्याः काणकुण्ठाश्च वृषश्च कृतलक्षणः ॥ अदण्ड्यागन्तुका या गौः सूतिका व्यभिचारिणी । अदण्ड्याश्चोत्सवे

गावः श्राद्धकाले तथैव च ॥ अश्वा राजकीयास्तेषामेव प्रजापालकत्वात् । यत्तु अश्वमहिष्योदश्रेति गोतमेनोक्तं तदपि गोग्रस्तविषयमतो न विरोधः । कुण्ठः खञ्जः अत्र काणकुण्ठशब्दाभ्यामत्यन्ताक्षमउच्यते हतलक्षणः शूलाद्यङ्कितः व्यभिचारिणी अत्यन्तधावनशीला । पारिजाते तु अभिसारिणीति पठित्वा वृषस्यन्तीति विवृतं । शङ्खः चुङ्गपश्वोऽशक्या अश्वतरगजवाजिनश्च ॥ अशक्या अशक्यनिवारणाः अश्वतरोवसतरीति प्रसिद्धः । कात्यायनः अधमोत्तममध्यानां पशूनां चैव ताडने । स्वामी तु विवदेद्यत्र तत्र दण्डं प्रकल्पयेत् ॥ ताडकस्येति शेषः । अस्यापवादस्तेन सएव चेनारामविलीनेषु गृहेषु पशुराजिषु । ग्रहणं तत्प्रविष्टानां ताडनञ्च द्वहस्तिनि ॥ गृहादि प्रविष्टेषु पशुषु ताडनग्रहणयोर्न दोष इत्यर्थः ॥

अथ वाक्पारुष्यं तत्र नारदः देशजाति कुलादीनामाक्रोशन्यङ्गसंयुतं । यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥ आक्रोशउच्चैर्भाषणं न्यङ्गुअवद्यं ताभ्यां संयुतं यत्प्रतिकूलार्थकं वचः तद्वाक्पारुष्यमिति सामान्यलक्षणं मिताक्षरायेवं अन्यत्तु सकलमपि व्याख्यानसयुक्तं अश्लीलादेः प्रतिकूलार्थत्वासम्भवेन सामान्यलक्षणाव्याप्तत्वात् । तथा निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतं । गौरवानुक्रमात्तेषां दण्डोऽप्युक्तः क्रमाद्गुरुः ॥ साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गुसंज्ञितं । तापनोयैरपक्रोशैस्तीव्रमाहुर्मनीषिणः ॥

न्यङ्गुसंज्ञितं मेहनाद्युल्लेखवत् । बृहस्पतिः अभियोक्तिस्ताड नञ्च पारुष्यं द्विविधं स्मृतं । एककन्तु त्रिधा भिन्नं दण्डस्योक्त स्विलचणः ॥ देशकालकुलादीनां चेपः पापे नियोजनं । द्रव्यं विना तु प्रथमं वाक्पारुष्यं तदुच्यते ॥ भगिनीमातृ सम्बन्धमुपपातकशंसनं । पारुष्यं मध्यमं प्रोक्तं वाचिकं शास्त्र वेदिभिः ॥ अभक्ष्यापेयकथनं महापातकदूषणं । पारुष्यमु त्तमं प्रोक्तं तीव्रं मर्माभिघट्टनं ॥ द्रव्यं विना पदार्थं विना तेनासत्यं इदन्तु सर्व्वान्वयि तेनासत्यं पापाभिधानं प्रथमं असत्यमुपपातकाभिधानं द्वितीयं असत्यं महापातकाभिशंसन मुत्तमं वाक्पारुष्यमित्यर्थः । समानयोः समोदण्डोन्यूनस्य द्विगु णस्तु सः । उत्तमस्यार्द्धिकः प्रोक्तोवाक्पारुष्ये परस्परं ॥ याज्ञ वल्क्यः अर्द्धोऽधमेषु द्विगुणः परस्त्रीपूत्तमेषु च । अर्द्धता चापराधानुरूपदण्डस्य च अधमता । वर्णतोगुणतश्च । कात्याय नोशनसौ मोहात्प्रमादात्संहर्षात्प्रीत्या चोक्तं मयेति यत् । नाहमेवं पुनर्वच्ये दण्डार्द्धं तस्य कल्पयेत् । बृहस्पतिः समजा तिगुणानां तु वाक्पारुष्ये परस्परं । विनयोऽभिहितः शास्त्रे पणाअर्द्धत्रयोदश ॥ वाक्पारुष्येऽवधिभूतोयोदण्डस्तस्य हीने ऽर्द्धं उत्तमे द्विगुणतामाह विष्णुः सवर्णाक्रोशने द्वादशपणा दण्डः हीनवर्णाक्रोशने षट् पणादण्डः काणखञ्जादीनां तथा । याज्ञवल्क्यः अभिगन्तास्मि भगिनीं मातरं वा तवे ति ह । पणन्तु दापयेद्राजा पञ्चविंशतिकं दमं ॥ मनुः शतं ब्राह्मणमाक्रुश्य चत्रियोदण्डमर्हति । वैश्योऽप्यर्द्धशतं द्वे वा

शूद्रस्तु वधमर्हति ॥ अध्यर्द्धं सार्द्धं वधस्ताडनं । विप्रः पञ्चाशतं दण्ड्यः क्षत्रियस्याभिशंसने । वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशकोदमः ॥ वैश्ये शूद्रे अभिशंसनीये । ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्य्यो विजानता । ब्राह्मणे साहसः पूर्वः क्षत्रिये चैव मध्यमः ॥ इदं ब्राह्मणक्षत्रिययोः परस्परं पतनीयाक्रोशे विट्शूद्रयोरेवमेव । शूद्रानुवृत्तौ बृहस्पतिः धर्म्मोपदेशकर्त्ता च वेदोदाहरणान्वितः । आक्रोशकस्तु विप्राणां जिह्वाच्छेदेन दण्ड्यते ॥ तथा एकजातिर्द्विजातिन्तु वाचा दारुणया क्षिपन् । जिह्वायाश्छेदमाप्नोति जघन्यप्रभवो हि सः ॥ नामजातिग्रहं तेषामभिद्रोहेण कुर्व्वतः । निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥ धर्म्मोपदेशं दर्पेण द्विजानामस्य कुर्व्वतः । तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥ द्विजातिं त्रैवर्णिकं दारुणया पातकाद्यभिशंसनरूपयेति कल्पतरुः । द्विजानां कृते गौतमः शूद्रो द्विजातीनभिसन्धाय निहत्य च वाग्दण्डपारुष्याभ्यामङ्गं मोच्यो येनोपहन्यात् । तेनाक्रोशे जिह्वाच्छेदः अङ्गताडने सत्यङ्गं मोच्यः येनाङ्गेन ताडयेत्तस्यच्छेदः तथा अस्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रपूरणं उदाहरणे जिह्वाच्छेदः धारणे च शरीरभेदश्च ॥ मनुः श्रुतं देशञ्च जातिञ्च कर्म्म शारीरमेव च । वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमं ॥ त्वया नाधीतं न त्वमर्थावगन्ता यद्वि वा न त्वं ब्राह्मणवृत्ति वा न त्वया तपः कृतमिति वा त्वं दुष्कर्म्मेति वा वदन् सः कुर्वीत सदण्ड्यः । व्यासः पापोपपापवक्ता रोमहा

पातकसंज्ञकाः । आद्यमध्योत्तमान्दण्डान्दद्युरेते यथाक्रमं ॥ यथाक्रमं वक्तॄणामिति प्रथममध्यमोत्तमसाहसोदण्ड इत्यर्थः। नारदः अवक्रुश्य च राजानं धर्म्मे वा अव्यवस्थितं । जिह्वाच्छेदाद्भवेच्छुद्धिः सर्व्वस्वहरणेन च ॥ याज्ञवल्क्यः राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकं तथा । तन्मन्त्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेत् ॥ उशना यत्र नोक्तो दमः पूर्व्वैरानन्त्यात्तु महात्मभिः। तत्र कार्य्यं परिज्ञाय कर्त्तव्यं दण्डधारणं ॥ प्रपञ्चितमिदं मयानीतिचिन्तामणौ ॥

अथ दण्डपारुष्यं ॥ तत्र बृहस्पतिः भस्मादीनां प्रक्षेपणं ताडनञ्च करादिना । प्रथमं दण्डपारुष्यं दमः कार्य्योऽत्र माषिकः ॥ एषदण्डः समेषूक्तः परस्त्रीष्वधिकेषु च । द्विगुणस्त्रिगुणो ज्ञेयः प्राधान्यप्रेक्षया बुधैः ॥ ताडनमत्रोद्यमाद्यं समेषु जात्यादिभिः माषिको माषमितः । स्मर्त्तव्यं याज्ञवल्क्यः भस्मपङ्करजस्पर्शे दण्डोदशपणः स्मृतः । अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः ॥ समेष्वेव परस्त्रीषु द्विगुणस्तूत्तमेषु च । हीनेष्वर्द्धदमो मोहमदादिभिरदण्डनं । अमेध्यमश्रुप्रभृति पार्ष्णिश्चरणस्य पश्चाद्भागः निष्ठ्यूतं मुखश्लेष्मा मोहोऽज्ञानभावः मदो मद्यादिना आदिपदादुन्मादादि । कात्यायनः छर्द्दिमूत्रपुरीषाद्यैरापाद्ये स चतुर्गुणः । षड्गुणः कायमध्ये तु मूर्ध्नि त्वष्टगुणः स्मृतः ॥ वान्तशुक्रादिना समस्य परस्याधःकाये योजने दशपणश्चतुर्गुणः एवं मध्याङ्गादौ षड्गुणादिरित्यर्थः ॥ याज्ञवल्क्यः

पादकेशांशुककराकर्षणेषु पणान्दश । पीडाकर्षांशुकावेष्टपादन्यासे शतं दमः ॥ यमस्य हस्तपादकेशवस्त्रान्यतमाकर्षणे दश पणाः तस्यैव वस्त्रावेष्टननिष्ठुराकर्षणपूर्वकस्वचरणारोपणे शतं पणादण्डइत्यर्थः । कात्यायनः उद्गूरणेन हस्तस्य कार्य्योद्वादशकोदमः । सएव द्विगुणः प्रोक्तः पातने च द्विजातिषु ॥ समेष्विदं । बृहस्पतिः उद्यतेऽस्त्रशिलाकाष्ठे कर्त्तव्यः प्रथमोदमः । परस्पर हस्तपादे दश विंशतिकस्तथा ॥ उभयोरिदं हस्ते दश पादे विंशतिः काष्ठादौ प्रथमसाहसं इदमपि समयोरेव । विष्णुः हस्तेनोद्गूरयिता दश कार्षापणान् पादेन विंशतिं काष्ठेन प्रथमसाहसं शस्त्रेणोत्तमसाहसं ॥ उत्तमं प्रत्यधमश्चेच्छस्त्रमुद्यच्छति तदा सहस्रपणान्दण्ड्यः । याज्ञवल्क्यः उद्गूर्णे हस्तपादे तु दश विंशतिकौ दमौ । परस्परस्य सर्व्वेषां शस्त्रे मध्यमसाहसं ॥ अन्योऽन्यं ब्राह्मणेन ब्राह्मणं प्रति शस्त्रे उद्गूर्णे पणपञ्चशती प्रत्येकमुभयोर्दण्डः । मनुः पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति । पादेन प्रहरन् कोपात्पादच्छेदनमर्हति ॥ सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः । कट्यां कृताङ्कोनिर्व्वास्यः स्फिचं वास्यावकर्त्तयेत् । अवष्ठीवतोदर्पाद्द्वावोष्ठौ छेदयेन्नृपः । अवमूत्रयतोमेढ्रमवशर्द्धयतोगुदं ॥ केशेषु गृह्णतोहस्तौ छेदयेदविचारयन् । पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च ॥ ब्राह्मणविषये शूद्रस्य दण्डोऽयं । मुखश्लेष्मणा मूत्रेण

गुदशब्देन वा ब्राह्मणस्यापमाने यथाक्रममोष्ठादिच्छेदः । बृहस्पतिः मध्यमः शस्त्रसन्धाने संयोज्यः तुल्ययोर्द्वयोः । कार्य्यः क्षतानुरूपस्तु लग्ने घातदमो बुधैः ॥ इष्टकोपलकाष्ठाद्यैस्ताडयेत्तद्द्विमाषकः । द्विगुणः शोणितोद्भेदे दण्डः कार्य्यो मनीषिभिः ॥ शस्त्रप्रयोगे तु विष्णुः दण्ड्यः शोणितेन विना दुःखमुत्पादयिता द्वात्रिंशतं पणान् सह शोणितेन चतुःषष्टिं ॥ शस्त्रेणैवाधिकभेदने मनुः त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः । मांसभेत्ता तु षण्णिष्कान्प्रवास्यस्त्वस्थिभेदकः ॥ निष्कश्चत्वारः सुवर्णाः । बृहस्पतिः त्वग्भेदे प्रथमो दण्डो मांसभेदे तु मध्यमः । उत्तमस्त्वस्थिभेदे च घातके च प्रमापणं ॥ प्रमापणं मारणं । कर्णनासाकरच्छेदे दन्तभेदेऽङ्घ्रिभेदने । कर्त्तव्यो मध्यमो दण्डो द्विगुणः पतितेषु च ॥ पतितेष्विति स्वस्थानाद्विच्छिन्नेषु कर्णादिषु । कात्यायनः कर्णोष्ठघ्राणपादाक्षिजिह्वाशिश्नकरस्य च । छेदने चोत्तमो दण्डो भेदने मध्यमो भृगुः ॥ छेदने स्वस्थानाच्यवने भेदने विदारणे । याज्ञवल्क्यः करपाददन्तभङ्गे छेदने कर्णनासयोः । मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥ छेदने विदारणे व्रणोद्भेदे प्ररूढव्रणस्य पुनर्व्रणीकरणे तथा ताडितो यदा मृतकल्पोऽभूत् एतेषु प्रत्येकं पणपञ्चशती दण्डः । विष्णुः नेत्रस्कन्धबाहूसक्थिभङ्गेषु चोत्तमं उभयनेत्रभेदिनं राजा यावज्जीवं बन्धनान्न मोचयेत्तादृशमेव कुर्य्यात् ॥ पादमूलयोः सन्धिः सक्थिः तादृशं यादृशमनेन कृतवान् ।

धान्यनेस्तुः द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा । विप्रत्वे
न च शूद्रस्य जीवतोऽष्टशतो दमः ॥ अल्पपीडासमाधेयद्विने
त्रभेदने तथा अमुकसमये राजा नङ्क्ष्यतीत्यादेशकारि
णः तथा विप्रचिह्नेन यज्ञोपवीतधारणादिना जीविकां
कुर्व्वतः शूद्रस्य च दण्डोऽयं । एकस्मिन्नेवापराधे दण्ड
विकल्पाः पीडोत्कर्षापकर्षाभ्यां समाधेयाः । तदाह मनुः
मनुष्याणां पशूनां च दुःखाय प्रहृते सति । यथा यथा
महद्दुःखं दण्डं कुर्य्यात्तथा तथा ॥ दुःखाय दुःखमुद्दिश्य
तेन प्रमादकृते दोषो नास्तीत्यर्थः । नारदः येनाङ्गेनाऽ
वरो वर्णो ब्राह्मणस्यापराध्नुयात् । तदङ्गं तस्य छेत्तव्यमेवं
शुद्धिमवाप्नुयात् ॥ तथा राजनि प्रहरेद्यस्तु कृतागस्यपि
दुर्म्मतिः । शूल्यं तमग्नौ विपचेद्ब्रह्महत्याशतातिगं ॥ सोप
राधेऽपि राजनि कृतप्रहारं शूलमारोप्याग्नौ पाचयेदित्य
र्थः ब्राह्मणेतरविषयमेतत् । न जातु ब्राह्मणं हन्यात्सर्व्व
पापेष्ववस्थितमिति विशेषनिषेधात् । मनुः येन केनचिद
ङ्गेन हिंस्याच्छ्रेयांसमन्त्यजः । छेत्तव्यं तत्तदेवास्य तन्मनो
रनुशासनं ॥ पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन्कोपात्पादच्छेदनमर्हति ॥ श्रेयांसं त्रैवर्णिकं
अन्त्यजः शूद्रः । तथा सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्व्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥ कृता
ङ्को लोहेन स्फिचं श्रोण्येकदेशः । तथा अवनिष्ठीवतो दर्पाद्द्वा
वोष्ठौ छेदयेन्नृपः । अवमूत्रयतो मेढ्रमपशर्द्धयतो गुदं ॥ केशे

षु गृह्णतो हस्तौ छेदयेदविचारयन् । पादयोर्दाढिकायां
च ग्रीवायां वृषणेषु च ॥ त्रैवर्णिकोपरि दर्पात् श्लेष्माणं त्य
जतः शूद्रस्य ओष्ठौ तथा मूत्रं कुर्व्वतो मेहनं तथा गुदशब्दं
कुर्व्वतो गुदं तथा केशे पादे श्मश्रुणि ग्रीवायां वृषणे वा
धारयतो हस्तौ छिन्द्यादित्यर्थः । शूद्रस्येत्यनुवृत्तौ आपस्तम्बः
वाचि पथि शय्यायामासने च समीभवतो दण्डताडनं ॥ वाचि
युगपद्वादः पथि तुल्यवद्गमनं शय्यासनयोः सहोपवेशनं ।
कात्यायनः वाक्पारुष्ये यथैवोक्तः प्रतिलोमानुलोमतः । तथैव
दण्डपारुष्ये पात्यो दण्डो यथाक्रमं ॥ वृहस्पतिः अङ्गाव
पीडने चैव भेदने छेदने तथा । समुत्थानव्ययं दाप्यः
कलहापहृतञ्च यत् ॥ समुत्थानव्ययं सुस्थीकरणव्ययं । याज्ञ
वल्क्यः एकं घ्नतां बहूनाञ्च यथोक्ताद्द्विगुणो दमः । कलहा
पहृतं देयं दण्डश्च द्विगुणः स्मृतः ॥ द्विगुणो दमः प्रतिव्य
क्ति कलहापहृतं कलहेन युद्धेन लुण्ठितं । मनुः भार्य्या
पुत्रश्च दासश्च शिष्यो भ्राता सहोदरः । प्राप्तापराधा
स्ताड्याः स्युः रज्ज्वा वेणुदलेन वा ॥ पृष्ठतस्तु शरीरस्य नोत्तमा
ङ्गे कथञ्चन । अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्वि
षं ॥ यमः भार्य्या पुत्रश्च दासश्च दासी शिष्यश्च पञ्चमः ।
प्राप्तापराधास्ताड्याः स्युः रज्ज्वा वेणुदलेन वा ॥ अधस्तात्तु प्र
हर्त्तव्या नोत्तमाङ्गे कदाचन । अतोऽन्यथा प्रवृत्तस्तु यथोक्तं
दण्डमर्हति ॥ ब्रह्मचारीत्यनुवृत्तौ नारदः अनुशास्यः सगु
रुणा नचेदनुविधीयते । अवधेनाथ वा तन्त्र्या रज्ज्वा वेणुद

ङ्गेन वा ॥ अधमं न ताडयेदेनं नोत्तमाङ्गे न वक्षसि ॥ अत्र
श्चेन ताडनहेतुदण्डादिव्यतिरेकेण । गौतमः शिष्यशिष्टिरवधे
नाशक्तौ रज्जुवेणुदलाभ्यां तनूभ्यामन्येन घ्नन् राज्ञा शास्यः ॥
शिष्यानुवृत्तावापस्तम्बः अपराधेषु चैनं सततमुपालभेतातित्रा
सउपवासउदकोपस्पर्शनमिति दण्डाः यथामात्रमानिवृत्तेः ॥
उपालम्भो रूक्षवचनं अतित्रासोभीत्युत्पादनं उदकोपस्पर्शनं
पानीयसेचनं शीतकाले यथामात्रं तच्छक्त्यनुसारेण आनि
वृत्तेः अपराधस्येति शेषः । नारदः पुत्रापराधेन पिता ताड
यन्नेव दण्डभाक् । न सङ्कटे तु तत्स्वामी तेनैव प्रतिरोध
येत् ॥ याज्ञवल्क्यः शक्तोऽप्यमोक्षयन्स्वामी दंष्ट्रिणां शृङ्गिणां
तथा । प्रथमं साहसं दाप्यो विक्रुष्टे द्विगुणं तथा ॥ स्वादि
स्वामी शक्तः सन् स्वादिग्रस्तं न चेद्रक्षेत्तदा प्रथमं साह
सं स्वानमपसारयेदित्याद्युक्तोऽपि नो चेद्रक्षेत्तदा मध्यमं
दण्ड्य इत्यर्थः । कात्यायनः हेत्वादिभिर्न पश्येच्चेद्दण्डपारुष्य
कारणं । तदा साक्षिकृतं तत्र दिव्यं वा प्रतियोजयेत् ॥
साक्ष्यभावे च दिव्यं । नारदः पूर्वमाचारयेद्यस्तु नियतं स्या
त्स दोषभाक् । पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः ॥
आचारयेत्परुषं वदेत् । कात्यायनः आभीषणेन दण्डेन
प्रचरेद्यस्तु मानवः । पूर्वं वा पीडितो वाथ सदण्ड्यः परिकी
र्त्तितः ॥ आभीषणेन खड्गादिना । बृहस्पतिः आक्रुष्टस्तु यदा
क्रोशंस्ताडितः प्रतिताडयन् । हत्वाततायिनं चैव नापरा
धी भवेन्नरः ॥ वाक्पारुष्यादिना नीचोयः सत्तमभिलङ्घ

येत् । सएव ताडयंस्तस्य नान्वेष्टव्योमहीभुजा ॥ नीचः शूद्रादिः सत्त्वं ब्राह्मणादिकं । सएव ब्राह्मणादिः तस्य शूद्रादेः हिंसार्थे षष्ठी नान्वेष्टव्योन दण्ड्यइत्यर्थः । नारदः श्वपाकषण्डचाण्डालवेश्यावधकवृत्तिषु । हस्तिपव्रात्यदासेषु गुर्व्वाचार्य्यातिगेषु च ॥ मर्य्यादातिक्रमे सद्योघातएवानुशासनं । न च तद्दण्डपारुष्ये दोषमाहुर्मनीषिणः ॥ यएतेन्त्र तिवर्त्तेरन्नोत्तमस्तान्नृपं नयेत् । सएव विनयं कुर्य्यान्न तद्विनयभाङ्नृपः ॥ मला ह्येते मनुष्याणां धनमेषां मलात्मकं । अतस्तान् घातयेद्राजा नार्थदण्डैर्न दण्डयेत् ॥ श्वपाकेति शूद्रायां क्षत्रियाज्जातउग्रः उग्रात्क्षत्रियायां जातः क्षत्तुः क्षत्तुरुग्रायां जातः श्वपाकः षण्डः क्लीवः चाण्डालोब्राह्मण्यां शूद्राज्जातः वधकवृत्तिर्लुब्धकधीवरादिः हस्तिपोहस्त्यारोहकः व्रात्यः प्रसिद्धः दासश्चेटकः घातस्ताडनं तच्च यथापराधं। कात्यायनः अस्पृश्यधूर्त्तदासानां म्लेच्छानां पापकारिणां । प्रातिलोम्यप्रसूतानां ताडनं नार्थतोदमः ॥ पापकारिणो ऽतिशयेन प्रातिलोम्यप्रसूतानिषादादयः । विष्णुः अजाश्वोष्ट्रघाती छिन्नकरपादः कार्य्योविमांसविक्रयी च ग्रामपशुघाती च कार्षापणशतं दण्ड्यः पशुस्वामिनश्च तन्मूल्यं दद्यात् पशूनां पुंस्त्वोपघातकारी च अरण्यपशुघाती च पञ्चाशतं कार्षापणान् पक्षिमत्स्यघाती दश कार्षापणान् अतज्जीविना मेषदण्डः ॥ विमांसं अभक्ष्यमांसं । मनुः वनस्पतीनां सर्व्वेषामुपभोगोयथा यथा । तथा तथा दमः कार्य्योहिंसायां

मिति धारणा ॥ याज्ञवल्क्यः प्ररोहिशाखिनां शाखास्क न्धसर्व्वविदारणे । उपजीव्यद्रुमाणान्तु विंशतिर्द्विगुणोदमः ॥ चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये । जातद्रुमाणां द्विगुणाद्दमाद्‌वचेऽथ विश्रुते ॥ गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां । पूर्व्वस्मृतादर्द्धदण्डः स्थानेषूक्तेषु कर्त्तने ॥ शाखिनो वटादयः उपजीव्यद्रुमाः पिप्पलादयः सर्व्वविदारणं मूलच्छेदनं तथा चैषां वृक्षाणां शाखाच्छेदने विंशतिपणाः स्कन्धच्छेदने चत्वारिंशत्पणाः मूलच्छेदनेऽशीतिपणादण्डः गुल्मादौ तु दशपणात्मकोदमउक्तस्थानेषुच्छेदे कृते सर्व्वेवं वर्द्धतइत्यर्थः क्षुपा ह्रस्वशाखाशिफाः शाकोटकादयः । दण्डाइत्यनुवृत्तौ विष्णुः फलोपगमच्छेदी उत्तमसाहसं पुष्पोपगमद्रुमच्छेदी मध्यमं वल्लीगुल्मलताच्छेदी कार्षापणशतं तृणच्छेदर्द्धं सर्व्वे च स्वामिनां तदुत्पत्तिं । दद्युरिति शेषः ॥

अथ स्तेयं ॥ तत्र मनुः तेषां दोषानभिख्याप्य स्वे स्वे कर्म्मणि तत्त्वतः । कुर्व्वीत शासनं राजा सम्यक्सारापराधतः ॥ तेषां चौराणां प्रकरणात् अपहृतद्रव्यस्य सारानुसारेण शासनं राज्ञा कार्य्यमित्यर्थः । बृहस्पतिः संसर्गचिह्नलोप्त्रैश्च विज्ञातो राजपूरुषैः । प्रदाप्यापहृतं शास्योद मैः शास्त्रप्रचोदितैः ॥ संसर्गः प्रमितैश्चौरैः सह मिलनं चिह्नं चौरत्वलिङ्गं सन्धिखनित्रादि लोप्त्रं चोरितद्रव्यं एषामन्यतमेनाऽपि चौरत्वमवधार्य्य चोरितद्रव्यं तद्धाराद्रव्यस्वामिने प्रदाप्य राजा शास्त्रदृष्टेन दण्डेन तं दमयेदि

त्यर्थः । मनुः परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः । स्ते
नानां निग्रहादस्य यशो राष्ट्रं च वर्द्धते ॥ अभयस्य तु यो
दाता स पूज्यः सततं नृपः । सत्रं हि वर्द्धते तस्य सदैवा
भयदक्षिणं ॥ तथा अशासंस्तस्करान् यस्तु बलिं गृह्णाति
पार्थिवः । तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच्च परिहीयते ॥
परिहीयते स द्रव्यव्ययः । चौराश्च द्विविधाः प्रकाशाः अप्र
काशाश्च तत्र प्रकाशचौरा वणिगादयः अप्रकाशचौराः सन्धि
कारादयः । तत्राद्येषु व्यासः तुलामानविशेषेण लेख्येन खग
णेन च । अर्घस्य वृद्धिह्रासेन मुष्णन्ति वणिजो नरान् ॥
सद्रव्यसदृशैर्द्रव्यैर्हीनमूल्यैर्विमिश्रणं । कुर्वन्त्यौपयिकाश्चान्ये
पण्यानां परिवर्त्तने ॥ याज्ञवल्क्यः मानेन तुलया वापि
योंऽशमष्टममाहरेत् । दण्डं स दाप्यो द्विशतं वृद्धौ हानौ
च कल्पितं ॥ वाकारोऽनास्थायां तेन येन केनापि छद्मप्रका
रेण प्रकूटतुलादिना यः परद्रव्यस्याष्टमांशमपहरति स प
णशतद्वयं दण्डं दाप्यः यस्तु नवमांशं सोऽष्टभागन्यूनं द्विश
तं यस्तु सप्तमांशं सचाष्टभागं द्विशतं दाप्य इत्यर्थः । कात्या
यनः तुलामानप्रतीमानप्रतिरूपकलक्षितैः । चरन्नलक्षितै
र्वापि प्राप्नुयात्पूर्वसाहसं ॥ प्रतीमानं पालिमानेति प्रसिद्धं ।
एतैश्चरन् व्यवहरन् सार्द्धपणशतद्वयं दाप्यः एतच्चाष्टमांशा
धिकद्रव्यापहरणपक्षे तेन न याज्ञवल्क्योक्तद्विशतदण्डविरोधः ।
मनुः समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा । समाप्नु
याद्दमं पूर्वं नरो मध्यममेव वा ॥ समैः साधारणैर्वस्तु

भिर्विषमं त्रिलक्षणं वस्तु परिवर्त्तेन मूल्येन वा गृह्णन् पर
स्य अष्टमभागहानौ सार्द्धपणशतदण्डं पञ्चमादिभागहानौ
पञ्चपणशतं दण्डं दाप्य इत्यर्थः । तथा अबीजविक्रयी यस्तु
बीजोत्कृष्टा तथैव च । मर्यादाभेदकश्चैव प्राप्नुयाद्विकृतं
वधं ॥ अबीजं बीजतया यो विक्रीणीते यो वा परोप्तं क्षेत्रं
बलेनाहरति यो वा देशस्य जातेर्वा कुलस्य वा ग्रामस्य वा
राजलोकस्य वा मर्यादां स्थितिमतिक्रामति स कर्णादिच्छे
दनं प्राप्नोतीत्यर्थः । बृहस्पतिः प्रच्छन्नदोषं व्यामिश्रं पुनः
संस्कृतविक्रयी । पण्यं तद्द्विगुणं दाप्यो राजदण्डश्च तत्समं ॥
अनुप्तदोषं वाऽपद्रव्यमिश्रितं वा शाणादिना पुनर्नवीकृतं वा
यो विक्रीणीते स विक्रीतभाजनाद्द्विगुणं भाजनादिकं क्रेत्रे तद्वि
क्रीतवस्तुसमञ्च दण्डं राजनि दाप्य इत्यर्थः । याज्ञवल्क्यः
भेषजस्नेहलवणगन्धधान्यगुडादिषु । द्रव्येषु हीनं क्षिपतः
पणा दण्डस्तु षोडश ॥ यथोक्तं द्रव्यं विक्रीय अपद्रव्येण मिश्रीकृ
त्य यो विक्रीणीते तस्य षोडश पणा दण्ड इत्यर्थः । अत्र गुरुमूल्य
द्रव्येषु बृहस्पतिनोक्ता लघुमूल्यकेषु तु याज्ञवल्क्योक्ता व्यवस्था
इत्यविरोधः । याज्ञवल्क्यः मिथ्यावदन् परीमाणं शुल्कस्थाना
दपाक्रमन् । दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी ॥ पण्यस्य
परीमाणमतथ्यं वदन् क्रयादौ कर्त्तव्ये आपणं परिहरन्
सकपटं क्रयविक्रयं वा कुर्वन् मकृतपण्यादष्टगुणं दण्डं दाप्य इ
त्यर्थः । विष्णुः शुल्कस्थानमनाक्रमन् सर्व्वापहारमाप्नुयात् विक्र

यादौ कर्त्तव्ये आपणं परिहरन् सर्व्वस्वं दण्ड्य इत्यर्थः इदम
भ्यासे याज्ञवल्क्योक्तस्त्वनभ्यास इत्यविरोधः । शङ्खः कूटतु
लामानप्रतिमानव्यवहारे शारीरोऽङ्गच्छेदो वा ॥ कूटतुल
या कूटमानेन वा यो व्यवहरते बहुधा तस्य मुण्डनं यस्तु
तच्छीलस्तस्य कर्णाद्यन्यतमच्छेदः कार्य्य इत्यर्थः । अर्थलाघ
वगौरवाभ्यामत्र व्यवस्थेत्यन्ये । याज्ञवल्क्यः तुलाशासनमाना
नां कूटकृन्नाणकस्य च । एभिश्च व्यवहर्त्ता यः सदाप्योदम
मुत्तमं ॥ यस्तुलां वा राजपत्रादिकं वा ताम्रादिकं वा मुद्रां
वा कूटां निर्म्माति यो वा तेन व्यवहरति सपणसहस्रं दण्ड्य इत्य
र्थः । तथा अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकं । स नाणकपरी
क्षी तु दाप्य उत्तमसाहसं ॥ नाणको मुद्रा यो मुद्रापरीक्षको
दौरात्म्यादिना मन्दां मुद्रां भद्रां भद्रां वा मन्दां ब्रूते स सहस्रप
णान् दण्ड्य इत्यर्थः । दण्ड उत्तमसाहस इत्यनुवृत्तौ विष्णुः प्रति
रूपकविक्रायकस्य च ॥ प्रतिरूपकं कृतकमुक्तादि । याज्ञवल्क्यः
सम्भूय कुर्व्वतामर्घं सवाधं कारुशिल्पिनां । अर्घस्य हानिं वृद्धिं
च साहस्रो दण्ड उच्यते ॥ कारुः प्रतिमादिघटकः शिल्पी
चित्रकरः कारोः शिल्पिनो वा अतिपीडाकरमर्घं सम्भूय
कुर्व्वतां वणिजां तथा राजस्थापितस्य मूल्यस्य ह्रासं वृद्धिं वा
सम्भूय कुर्व्वतां तेषां पणसहस्रात्मको दण्ड इत्यर्थः । तथा
सम्भूय वणिजां पण्यमनर्घेणावरुन्धतां । विक्रीणतां वा विहि
ता दण्ड उत्तमसाहसः ॥ ये वणिजो बहुमूल्यमल्पमूल्येन छद्मा
दिना क्रीणन्ति ये वाल्पमूल्यं बहुमूल्येन विक्रीणन्ते ते पणसह

स्वं दण्ड्याद्दत्यर्थः । मनुः राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धा
नि यानि च । तानि निर्हरतोलोभात्सर्व्वहारं हरेन्नृपः ॥
यानि करितुरगादीनि राजयोग्यानि यानि वा राज्ञा
निवारितक्रयविक्रयाणि तानि राजाज्ञानाचरणेन विक्री
णानस्य तद्विक्रयप्राप्तं सकलमेव धनं राजा गृह्णीयादि
त्यर्थः । मनुः शुल्कस्थानेषु कुशलाः सर्व्वपण्यविचक्षणाः ।
कुर्य्युरर्घं यथापण्यं ततोविंशं नृपोहरेत् ॥ विष्णुः स्वदेश
पण्याच्छुल्कांशं दशममादद्यात् परदेशपण्याच विंशतितमं ॥
स्वदेशे क्रीत्वा विक्रीते यावती वृद्धिः प्राप्ता तस्यादशमं भागं
परदेशे क्रीत्वा स्वदेशे विक्रीते यावती वृद्धिस्तस्याविंशति
तमं भागं राजा गृह्णीयादिति वाक्ययोरर्थः । गोतमः
विंशतिभागः शुल्कं पण्ये मूलपुष्पौषधिमधुमांसतृणेन्धना
नान्तु षष्ठः मूलादीनां सप्तानामपि परदेशात्क्रीत्वानीय स्वदे
शे विक्रीतानां वृद्धेः षष्ठांशोराजग्राह्यइत्यर्थः । वशिष्ठः
शुल्के चापि मानवश्लोकमुदाहरन्ति न भिन्नकार्षापणमस्ति
शुल्कं न शिल्पवृत्तौ न शिशौ न दूते। न भैक्ष्यलब्धे न हताव
शेषे न श्रोत्रिये प्रव्रजिते न यज्ञे ॥ भिन्नोन्यूनः तेन कार्षापण
न्यूनमूल्ये पण्ये राजग्राह्यं नास्ति एवं शिल्पनिर्माणेन प्राप्ते तथा
वस्त्रादिमूल्ये तथा दौत्येन प्राप्ते तथा भिक्षालब्धे तथा चौर
हृतावशिष्टे पण्ये तथा श्रोत्रिये यतौ वा विक्रेतरि तथा यज्ञा
र्थमानीते राजग्राह्यं नास्तीत्यर्थः । विष्णुः उत्तमं साहस
दण्डोभिषङ्मिथ्याचरन्नुत्तमेषु मध्यमं मध्यमेषु प्रथमं तिर्य्यक्षु॥

व्यासः अनिच्छन्तमभूमज्ञं संयोज्य व्यसने नरं । अपकर्षन्ति तद्द्रव्यं वेश्याकितवशिल्पिनः ॥ अभूमज्ञं कृत्याकृत्यानभिज्ञं । एते विश्रम्भवञ्चका इति भावः । वृहस्पतिः अन्यायवादिनः सभ्यास्तथैवोत्कोचजीविनः । विश्रम्भवञ्चकाश्चैव निर्वास्याः सर्व्व एव ते ॥ याज्ञवल्क्यः उत्कोचजीविनो द्रव्यहीनान्कृत्वा विवासयेत् । तथा वसानस्त्रीन् पणान् दण्ड्यो रजकस्तु परांशुकं । विक्रयावक्रयाधानयाचितेषु पणान् दश ॥ अवक्रयो भाटकं आधानं बन्धकीकरणं । वृहस्पतिः दण्डाजिनादिना युक्तमात्मानं दर्शयन्ति ये । हिंसन्ति छद्मना नृणां वध्यास्ते राजपूरुषैः ॥ मनुः सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः । प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैः ॥ कण्टकः प्रकाशतस्करः । प्रवर्त्तमानमिति नित्यवृत्तौ लट् तेनान्यायाभ्यासे शास्तिरियमित्याशयः । याज्ञवल्क्यः कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी । अङ्गहीनः सकर्त्तव्यो दाप्यश्चोत्तमसाहसं ॥ असुवर्णे औषधादियोगात्सुवर्णभ्रममुत्पाद्य यः क्रयादिव्यवहारं करोति यश्च श्वादिमांसं हरिणादिमांसत्वेन प्रकाश्य विक्रीणीति स पणसहस्रं दण्डमादाय नासादन्तकरशून्यः कार्य्य इत्यर्थः । तथा अजातौ जातिकरणे विक्रेयोऽष्टगुणो दमः ॥ लघुमूल्यके वस्तुनि कौशलेन बहुमूल्यकवस्तुसादृश्यमुत्पाद्य विक्रीय प्रकृतमूल्यादधिकं यत्तल्लभते तदष्टगुणं दमं दाप्यः । तथा समुद्रपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमं । आधानं विक्रयं वापि न्यायतो दण्डकल्पना ॥ भिन्ने पणे तु पञ्चाशत्पणे तु शतमु

ध्यते। द्विपणे द्विशतोदण्डो मूल्यवृद्धौ च वृद्धिमान्॥ समुद्गः
समुद्गः सारभाण्डं सारभूतं पण्यं मृगमदादि। तथा च तुच्छं
समुद्गं पूर्णत्वेन प्रकाश्य कृत्रिमं वस्तु तात्त्विकत्वेन वा प्रकाश्य
न्यस्यतो विक्रीणानस्य वा दण्डः। तमेवाह भिन्नइति भिन्नं मूल्यं
अर्थात्पणात्तेनार्द्धपणमूल्यके वस्तुनि असत्येव वा वस्तुत्वेन प्रका
श्य न्यस्ते विक्रीते वा तथा तावत्येव काल्पनिके मृगमदादौ
तात्त्विकत्वेन प्रकाश्य न्यस्ते विक्रीते वा पञ्चाशत्पणाः। पणमूल्य
के तु पणशतं द्विपणमूल्यके पणशतद्वयमेव शतगुणो दण्ड इत्यर्थः।
वृहस्पतिः स्वल्पमूल्यन्तु संस्कृत्य नयन्ति बहुमूल्यतां। स्त्रीबाल
कान् वञ्चयन्ति दण्ड्या अर्थानुरूपतः॥ हेममुक्ताप्रवालाद्यं
कुर्व्वते कृत्रिमन्तु ये। क्रेत्रे मूल्यं प्रदाप्यास्ते राज्ञे च द्विगुणं दमं॥
सुगमं। याज्ञवल्क्यः अग्नौ सुवर्णमक्षीणं द्विपलं रजते शते।
अष्टौ त्रपुणि सीसे तु ताम्रे पञ्चदशायसि॥ सुवर्णं शुद्धसुवर्णं
अन्याहृतस्य चर्यित्वादिति तेन शुद्धसुवर्णं नक्तंदिनमपि ध्माय
माने क्षयो न भवति। तथा रजतपलशते पलद्वयमेव तथा
तावति शुद्धे त्रपुणि सीसे च अष्टपलमेव तथा तावति ताम्रे
पलपञ्चकं तादृशेऽयसि दशपलानि क्षीयन्तइत्यर्थः तथा च
ततोऽधिकं क्षयं वदन् दण्ड्य इत्यर्थः। याज्ञवल्क्यः शते दशपला
वृद्धिरौर्णे कार्प्पासिके तथा। मध्ये पञ्चपला ज्ञेया सूक्ष्मे तु त्रि
पला स्मृता। स्थूलसूत्रे कार्प्पासिके आविके वा शतपलमिते वस्त्र
नाय प्रयुक्ते उप्ते दशपलाधिको वा भवति मध्यविधसूत्रे पञ्च
पलाधिकं सूक्ष्मसूत्रे त्रिपलाधिकमित्यर्थः॥

अथाप्रकाशतस्करदण्डः॥ तत्र मनुः सन्धिं कृत्वा तु ये चौर्य्यं रात्रौ कुर्वन्ति तस्कराः। तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्। व्यासः सन्धिं छित्वाऽनेकविधं धनं प्राप्नोति वै गृहात्। प्रदाप्यं स्वामिने सर्व्वं हृतं शूले निवेशयेत्॥ बृहस्पतिः सन्धिच्छेदेऽसकृत् ये ताञ्छूलमारोपयेत्ततः। तथा पान्थमुषो वृक्षे गले बध्वावलम्बयेत्॥ सन्धिचौराश्चापहृतधनानि स्वामिने प्रदाप्य हस्तौ छित्वा तीक्ष्णे शूले निवेश्याः। वाटपाटचौरास्तु वृक्षादावुद्बन्धनीया इति वर्त्तुलार्थः। बृहस्पतिः मनुष्यहारिणो राज्ञा दग्धव्यास्तु कटाग्निना। स्त्रीहर्त्ता लौहशयने दग्धव्यो वा कटाग्निना॥ कटो वीरणः। एतत्तु कुलीनयोः स्त्रीपुंसयोर्हरणे द्रष्टव्यं। तदाह मनुः पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः। मुख्यानाञ्चैव रत्नानां हरणे वधमर्हति॥ मुख्यं मरकतादि। व्यासः नरहर्त्ता हस्तपादौ छित्वा स्थाप्यश्चतुष्पथे॥ इदन्तु मध्यविधपुरुषापहरणे। पुरुषं हरतः प्रोक्तो दण्ड उत्तमसाहसः॥ इदमधमपुरुषहरणे। सर्व्वस्वं हरतो नारीं कन्यान्तु हरतो वधः। इदमपकृष्टनारीहरणे। मनुः गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने। पशूनां हरणे चैव सद्यः कार्य्योऽर्द्धपादिकः॥ महापशूनां हरणे शस्त्राणामौषधस्य च। कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत्॥ छुरिका नासा भेदने रन्ध्रकरणे कालो युद्धादिः कार्य्यमारोहणादि तेन युद्धाद्यवसरे अश्वाद्यपहरणमतिदण्डाय। महापशवो हस्त्यश्वादयः।

नारदः । महापशून्स्तेनयतो दण्डउत्तमसाहसः । मध्यमो मध्यमपशून् पूर्वः क्षुद्रपशौ इति ॥ व्यवस्था विष्णुवाक्योक्ता । व्यासः अश्वहर्त्ता हस्तपादौ कटिं छित्वा प्रमाप्यते ॥ याज्ञवल्क्यः । बन्दिग्राहांस्तथा वाजिकुञ्जराणाञ्च हारिणः । प्रसह्य घातिनश्चैव शूलमारोपयेन्नरान् ॥ कोष्ठागारायुधागारदेवतागारभेदिनः । हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन् ॥ विष्णुः गोऽश्वोष्ट्रगजापहारकएककरचरणादिकः कार्य्यः अजाद्यपहार्य्येककरः ॥ करितुरगावत्रात्यन्तापकृष्टावुक्तौ । स्वाम्येव वाऽगुणवान् समयोवा न युद्धक्षेत्यतः शास्तिलाघवं । व्यासः पशुहर्त्तुरर्द्धपादं तीक्ष्णशस्त्रेण कर्त्तयेत् । तस्यैकपादं कुन्तकुद्दालादिना छिन्द्यादित्यर्थः । मनुः असन्धितानां सन्धाता सन्धितानां विमोक्षदः । दासाश्वरथहर्त्ता च प्राप्तः स्याच्चौरकिल्विषं ॥ अपहरणार्थमबद्धान् बध्नन् बद्धान्विमोचयन्वा दासाद्यन्यतमविनाशी वा चौरवच्छास्यः । मनुः अङ्गुली ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥ चौर्य्यार्थं बन्धनग्रन्थिं विमोचयतः प्रथमे विमोचनेऽङ्गुलि[illegible] । द्वितीये हस्तपादच्छेदः तृतीये वधः कार्य्यः । [illegible]वल्क्यः उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ ॥ यश्चौर्य्यार्थं परपशूंस्त्याजयति बन्धनविमोचनं वा तेषां करोति तस्याङ्गुष्ठतर्ज्जन्यौ छेद्ये इत्यर्थः । बृहस्पतिः धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः । शेषेप्येकादशगुणं दाप्यस्तस्य च

तद्रूनं ॥ प्रमाणस्थपुरुषस्य प्रमाणस्थकरचरणस्य द्वादश भिः प्रसृतिभिः कुडवोभवति चतुर्भिः कुडवैः प्रस्थः विंशत्या प्रस्थैः कुम्भइति रत्नाकरादयः । तादृशकुम्भाः पुरुवाहार मानेन खारीति मैथिलाः । ततोऽधिकं धान्यमपहरन् मार णीयः न्यूनन्त्वपहरन् तत्समं धान्यं स्वामिनि तदेकादशगुण ञ्च राजनि दण्डत्वेन दाप्यइत्यर्थः । अन्ये तु पलञ्च कुडवः प्रस्थः आढकोद्रोणएव च । धान्यमानेषु बोद्धव्याः क्रमशोऽ मी चतुर्गुणाः ॥ द्रोणैः षोडशभिः खारी विंशत्या कुम्भउ च्यते । कुम्भैस्तु दशभिर्वाहोधान्यसङ्ख्या प्रकीर्त्तिता ॥ विं शत्या द्रोणैरित्यन्वयः एतद्वाक्यानुसारेण कुम्भमाऽः । एतच्च वाहः खारी पूर्ववदिदं । पत्रिकस्यात्यये दण्डोभा गाद्दशगुणोभवेत् । ततोऽर्द्धदण्डोभृत्यानामज्ञानात्पत्रिकस्य च ॥ शस्यभागव्यवस्थया भूकर्षकस्य दोषेण शस्यनाशे स्वभागाद्दशगुणस्तस्य दण्डः तद्भृत्यदोषेण तन्नाशे स्वभा गात्पञ्चगुणः कर्षकस्य दण्डइत्यर्थः । अयञ्च दण्डोराजग्रा ह्यः । भूस्वामी तु तद्विनाशितं स्वं ग्राह्यं स्वस्य भागं ततो लभे इति द्रष्टव्यं । काष्ठभाण्डाद्युपक्रम्य नारदः तुला धरिममेयानां गणिमानाञ्चसर्वशः । एभिस्तूत्कृष्टमूल्यानां मूल्याद्दशगुणोदमः । तुलाधरिमं कर्पूरादि मेयं श्रीह्या दिः गणिमं पूगीफलप्रभृति एभिः काष्ठादिभिः तेन पूर्वो क्तकाष्ठाद्यपेक्षया अधिकमूल्यानां तुलाधरिममेयगणिमानां मन्यतमापहारे तन्मूल्यदशगुणो दण्ड इत्यर्थः । मनुः तुला

धरिममेयानां शताद्भ्यधिके वधः । सुवर्णरजतादीना मुत्तमानाञ्च वाससां ॥ पञ्चाशतस्त्वभ्यधिके हस्तच्छेदन मिष्यते । शेषेष्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥ हेमोरजतस्य वा शतपलाधिकस्य तथा वाससोवा शताधिकस्य हर्त्ता वध्यः पञ्चाशदधिकस्य तस्य हर्त्ताच्छिन्नहस्तः कार्य्यः । तदूनस्य हर्त्ता एकादशगुणं तन्मूल्यं दाप्यः स्वापहृतवस्तु दानन्तु कल्पयेपि । शङ्खः सुवर्णरजतापहारे शारीरो ऽङ्गच्छेदोवा यत्किञ्चित्स्वल्पं सुवर्णं रजतं वापहरन्नभ्यर्हित स्ताडनीयः तदूनश्छिन्नकर्णः कार्य्यः ॥ विष्णुः रत्नापहार्य्युत्तम साहसं ॥ अपकृष्टरत्नापहारी सहस्रं पणान्दण्ड्यः । अष्ट गुणं सीताद्रव्यापहरणे यथाकालं ॥ सीताद्रव्यंहलकुद्दालादि कं कृषिसमयेऽपहरन्नष्टाधिकं पणशतं दण्ड्यः हतञ्च दाप्यः । मनुः परिपूतेषु धान्येषु शाकमूलफलेषु च । निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ॥ निष्पुलाकीकृतेषु खलस्थेषु अल्पधान्येषु अपहृतेषु शाकमूलफलेषु वा तत्स्वामिसम्बन्ध शून्यः शतं तत्सम्बन्धवांस्तु पञ्चाशतं पणान्दण्ड्यः । तथा पुष्पे हरितधान्ये तु गुल्मवल्लीनगेषु च । अल्पेष्वपरिपूतेषु दण्डः स्यात्पञ्च कृष्णलाः ॥ कुसुमादौ हरितधान्ये घासरूपे तथा भारन्यूनेषु सपुलाकेषु खलस्थधान्येषु तथा गुल्मे लता यां वृक्षे वापहृतेषु सुवर्णमाषोदण्डः । व्यासः अल्पधान्याप हरणे चौरे तद्विकृतौ तथा । स्वामिने तत्समं दाप्योदण्डञ्च

द्विगुणं नृपे ॥ मनुः सूत्रकार्पासकिण्वानां गोमयस्य गुड़स्य च । दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ॥ वेणुवैणवभाण्डानां लवणानां तथैव च । मृण्मयानाञ्च हरणे मृदो भस्मन एव च ॥ मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च । मांसस्य मधुनश्चैव यच्चान्यत्पशुसम्भवं ॥ अन्येषामेवमादीनामद्यानामोदनस्य च । फलानाञ्चैव सर्व्वेषां हरणे द्विगुणो दमः ॥ इदमल्पसूत्रादिहरणे । यद्यैतान्युपक्लिप्तानि द्रव्याणि स्तेनयेन्नरः । तं शतं दण्डयेद्राजा यश्चाग्निञ्चोरयेद्गृहात् ॥ एतानि सूत्रादीनि उपभोगार्थं संस्कृतानि अग्निं श्रौतं स्मार्त्तं वा । नारदः काष्ठभाण्डतृणादीनां मृण्मयानान्तथैव च । वेणुवैणवभाण्डानां तथास्नाय्वस्थिचर्म्मणां ॥ शाकानामार्द्रमूलानां हरणे फलपुष्पयोः । गोरसेक्षुविकाराणां तथा लवणतैलयोः ॥ पक्वान्नानां कृतान्नानां मद्यानामोदनस्य च । सर्व्वेषामल्पमूल्यानां मूल्यात्पञ्चगुणो दमः ॥ इदं प्रचुरकाष्ठादिविषयं । मनुः यस्तु रज्जुघटं कूपाद्धरेद्भिन्द्याच्च यः प्रपां । सदण्डं प्राप्नुयान्माषं तच्च तस्मिन्समाहरेत् ॥ रज्जुघटमिति समाहारद्वन्द्वः रज्जुं घटं वा कूपाद्योहरति सकूपे तन्नियोजयेत् माषञ्च दण्डं प्रपाभेदे च दद्यात् । विष्णुः अनुक्तद्रव्याणामपहर्त्ता [illegible] दमं ॥ दाप्यइत्यनुषङ्गः नारदः साहसेषु यएवोक्तस्त्रिषु दण्डो मनीषिभिः । सएव दण्डः स्तेयेषु द्रव्येषु त्रिष्वनुक्रमात् ॥ अनुक्तविशेषेषूत्तममध्यमाधमेषु वस्तुषु इयं व्यवस्था । कात्यायनः येन येन पर

द्रोहं करोत्यङ्गेन तस्करः । छिन्द्यात्तत्तनृपस्तस्य न करोति यथा पुनः ॥ वृहस्पतिः तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलं । अनापृच्छंस्तु गृह्णानो हस्तच्छेदनमर्हति ॥ इदमप्युत्कृष्टस्वामिकतृणादिविषयं । गौतमः ब्राह्मणस्य न शारीरो दण्डः कर्म्मवियोगविख्यापनविवासनाङ्ककरणानि अवृत्तौ प्रायश्चित्ती सः ॥ कर्म्मवियोगश्चौरेण ब्राह्मणेन सह सद्भिः क्रिया न कर्त्तव्या विख्यापनं खरारोहणादिना चौरत्वं तस्य ख्यापनीयं विवासनं देशाद्बहिष्करणं अङ्ककरणं चौरचिह्नीकरणं अवृत्तौ प्रायश्चित्ती सः प्रकारान्तरेण जीवनाक्षमोब्राह्मणश्चौरोऽपि सन् हस्तच्छेदनादिना दण्ड्यः किन्तु हृतं वस्तु दत्वा चौर्य्यप्रायश्चित्तं कुर्य्यादित्यर्थः । आपस्तम्बः पुरुषवधस्तेयभूम्यादानेषु वधश्चक्षुर्निरोधस्त्वेतेषु ब्राह्मणस्य ॥ स्तेयं सुवर्णहरणं एतेषु त्रिषु ब्राह्मणेतरवधः ब्राह्मणस्य चक्षुरुत्पाटनं इदमधमब्राह्मणपरं । नारदः अन्यायोपात्तवित्तत्वाद्धनमेषां मलात्मकं। ततस्तान् घातयेद्राजा नार्थदण्डेन दण्डयेत् ॥ तान् ब्राह्मणेतरचौरान् । मुण्डः ब्राह्मणस्य तु मौण्ड्यमितरेषां खरयानं ॥ ब्राह्मणस्य यागादिपरस्य इतरेषां चचादीनां मध्यमानां ब्राह्मणानाञ्च । विष्णुः स्तेनाः सर्व्वापहृतं धनिकस्य धनं दाप्यास्ततस्तेषामभिहितदण्डप्रयोगः । याज्ञवल्क्यः चौरं प्रदाप्यापहृतं घातयेद्विविधैर्व्वधैः । सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ॥ चिह्नं ललाटे भगाद्यङ्कनं । इदं मध्यविध

ब्राह्मणपरं । ब्राह्मणाधिकारे कात्यायनः सहोढमसहोढं वा मत्वा गमितवाहवं । शुद्धाचिकृत्रावेद्य सर्व्वखेन वियो जयेत् ॥ अयस्मन्धानगुप्ताश्च सन्दभक्तागुणान्विताः । कुर्युः कर्म्माणि नृपतेराह्वत्योरिति कौशिकः ॥ होढं लोप्त्रं सर्व्वखेनेति इदन्तु वृत्तखाध्यायरहितधनवद्ब्राह्मणपरं । निगड बन्धनकिञ्चिद्भक्तदानराजदास्याचरणन्तु तादृशनिर्द्धनब्राह्म णपरं । वृहस्पतिः वृत्तखाध्यायवान् स्तेयी बन्धनात् क्लिश्य ते चिरं । स्वामिने तद्धनं दाप्यः प्रायश्चित्तं न कार्य्यते ॥ मनुः अष्टापाद्यन्तु शूद्रस्य स्तेये भवति किल्विषं । षोड शैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य तु ॥ ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् । द्विगुणा वा चतुःषष्टिस्तद्दोषगुण विद्धि सः ॥ तद्दोषगुणविदिति सर्व्वान्वितं तेन यत्र स्ते ये योदण्डः सस्तेयदोषगुणज्ञस्य शूद्रस्याष्टगुणः तादृश वैश्यस्य षोडशगुणः तादृशक्षत्रियस्य द्वात्रिंशद्गुणः तादृ शब्राह्मणस्य चतुःषष्टिगुणः ततोऽप्यधिकगुणस्य ब्राह्मणस्य शतगुणः ततोऽप्यधिकतरगुणस्य ब्राह्मणस्याष्टाविंशत्यधिकशत गुणइत्यर्थः ॥

अथ स्तेनातिदेशः ॥ तत्र मनुः योऽदत्तादायिनोहस्ता ल्लिप्सेत ब्राह्मणोधनं । याजनाध्यापनेनापि यथा स्तेनस्तथै वसः ॥ तथा अग्निदान् भक्तदांश्चैव तथा शस्त्रावकाशदान् । सन्निधातृंश्च मोषस्य हन्याच्चौरानिवेश्वरः ॥ अग्निरत्र चौ र्य्यानुकूलः भक्तं चौरभक्ष्यं शस्त्रं चौर्य्याङ्गं अवकाशश्चौ

रस्थानं सन्निधातॄंश्चौरचौरयितद्रव्ययोः सन्निधापकान् । या
ज्ञवल्क्यः भक्तावकाशाग्न्युदकं मन्त्रोपकरणव्ययान् । दत्वा
चौरस्य हन्तुर्व्वा जानतो दण्ड उत्तमः ॥ अग्न्युदकं चौर्य्यो
पष्टम्भकं मन्त्रश्चौर्य्योपायोपदेशः उपकरणं चौर्य्यसाधनं ख
नित्रादि व्ययोऽपहर्त्तुं गच्छतः पाथेयं जानतश्चौरं ज्ञा
त्वैवंकरणे उक्तदण्डः हन्तुरप्येवंकुर्व्वतामीदृशो दण्डः । ना
रदः भक्तावकाशदातारः स्तेनानां ये प्रसर्प्पतां । शक्ता
श्च ये उपेक्षन्ते तेऽपि तद्दोषभागिनः ॥ ये भक्ताद्यन्न
नमं चौराय ददति ये वा धारणक्षमा अपि चौरं जहति
तेऽपि चौरवद्दण्ड्याः । आक्रायका आदेशकास्तथावकाश
दायकाः । समदण्डाः स्मृताः सर्व्वे ये च प्रच्छादयन्ति
तान् ॥ ये चौरानाक्रयन्ति आदिशन्ति वा स्थाने स्थाप
यन्ति वा धनिकानुमतान् गोपयन्ति वा ते सर्व्वे चौरसमाः ।
कात्यायनः क्रेतारश्चौरभाण्डानां प्रतिग्राहिण एव च ।
समदण्डाः स्मृताह्येते ये च प्रच्छादयन्ति तान् ॥ चौरितद्रव्या
णां तथाज्ञातानां क्रेता ग्रहीता सङ्गोप्ता च चौरवद्दण्ड्या
इत्यर्थः । हन्यादित्यनुवृत्तौ विष्णुः प्रसह्यतस्कराणामव
काशभक्तप्रदांश्चान्यत्र राजाशक्तेः ॥ राजा च चौरनिवा
रणाक्षमस्तदा चौराय स्वरक्षार्थं भक्षणादिदानेऽपि न
दोष इत्यर्थः । मनुः राष्ट्रेषु रक्षाधिकृतान्सामन्तांश्चैव
देशितान् । अभ्यागतेषु मध्यस्थान् शिष्याच्चौरानिवद्रुतं ॥
देशावेक्षकस्याद्दृश एव सामन्तोऽप्यपेक्षायामुदासीनो भवंश्चौरव

दण्ड्य इत्यर्थः । तथा ग्रामघातेहिताभङ्गे पथि माषाभि
दर्शने । शक्तितोनाभिधावन्तोनिर्व्वास्याः सपरिच्छदाः ॥
ग्रामघाते ग्रामोपद्रवे ईहिताभङ्गे ईहितस्य शस्योत्पत्त्यनुकूल
बन्धादेर्विदारणे चौरितद्रव्यस्य चौरहस्तस्थस्याध्वनि दर्शने वा
यथाशक्ति तत्प्रतीकारमकुर्व्वाणोऽनियुक्तोपि सधनोदेशान्निः
सार्य्यः ॥ ॥

अथ चौर्य्यापवादः ॥ द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू
द्व च मूलके । आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥
क्षीणवृत्तिः पाथेयशून्यः । वानस्पत्यं मूलफलं दार्व्वाग्न्यर्थं
तथैव च । तृणञ्च गोभ्योग्रासार्थमस्तेयं मनुरब्रवीत् ॥ फला
नि अन्यापरिगृहीतानि । फलानि चागृहीतानीति गोतम
वचनात् । तथा होमाग्निसन्दीपनाय परेन्धनं तथा गो
ग्रासार्थं परतृणं ग्राह्यं । राजकृत्ये आपस्तम्बः ग्रामेषु नग
रेषु चार्य्यान् शुचीन्सत्यशीलान् प्रजागुप्तये निदध्यात् तेषां
पुरुषास्तथा गुणाएव स्युः सर्व्वतोयोजनं नगरं तस्करेभ्यो
रक्ष्यं क्रोशोग्रामेभ्यः ॥ ग्रामनगरयोः रक्षकाः साधुसहायाः
साधवः कार्य्याः तैश्च नगरात्परितोभूमौ योजनमितायां
नगरे च यच्चौरैरपहृतं तद्देयं एवं ग्रामरक्षकेण ग्रामे
क्रोशमिते तत्परिसरेऽपीत्यर्थः । कात्यायनः गृहेषु मुषि
तं राजा चौरग्राहांस्तु दापयेत् । आरक्षकांस्तु दिक्पाला
न्यदि चौरोन लभ्यते ॥ गृहेष्वित्युपलक्षणं यदि चौरो
ऽन्विष्यमाणोन लभ्यते तदा तद्गुणस्यायकदारा आरक्षक

देशपतिद्वारा चोरितद्रव्यं राजा दापयेदित्यर्थः । आरक्षकः
कोटालइति प्रसिद्धः देशपतिः तद्देशरक्षाधिकृतः । कात्या
यनः ग्रामान्तेषु हृतं द्रव्यं ग्रामाध्यक्षं प्रदापयेत् । विवीते स्वा
मिना देयं चैारोद्धर्त्ता विवीतके ॥ विवीतेऽरण्ये स्वामिना
राज्ञा चैारोद्धर्त्ता चैाराश्रयभूतेनाविवीतके चेत्रादैा ।
तथा स्वदेशे यस्य यत्किञ्चिद्धृतं देयं नृपेण तत् । गृह्णीया
त्तत्स्वयं नष्टं प्राप्तमन्विष्य पार्थिवः ॥ चैारैर्हृतं प्रयत्नेन स्वरूपं
प्रतिपादयेत् । तदभावे तु मूल्यं स्यादन्यथा किल्बिषी नृपः ॥ स्व
रूपं तदेव वस्तु । वृद्धमनुः यस्मादपहृतात्सर्व्वं द्रव्यात्स्वल्पन्तु
स्वामिना । तच्छेषमाप्नुयात्तस्मात्प्रत्यर्थे स्वामिना कृते ॥
मुषितद्रव्यादल्पं स्वामिना यस्मात्पुरुषात्सर्व्वं तच्छेषमपि स्वामी
ततएव प्राप्नुयात् किन्तु स्वामिना शेषांशे चैारत्विमते चैार
गतत्वेन शपथे कृते सतीत्यर्थः यदि तु चैारत्वाभिमतस्य शेषा
पहारे प्रमाणं नास्ति तदोक्तव्यवस्थेति द्रष्टव्यं । याज्ञवल्क्यः
शैाल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतं । अर्व्वाक् सम्वत्स
रात्स्वामी हरेत्तत्परतोनृपः ॥ शैाल्किकोरक्षाधिकारी
स्थानपालोदेशपतिः अनायत्तो वाकारः नष्टं अनवधा
नगतं अपहृतं चैारेण तेनायमर्थः नष्टमपहृतं वा वस्तु केना
पि तदस्वामिना समानीतं राज्ञा वर्षपर्य्यन्तं धारयितव्यं
तदभ्यन्तरे स्वामी चेदभ्येति तदा सएव नोचेद्वर्षोपरि तदशेषं
राजा गृह्णीयादित्यर्थः । मनुः प्रणष्टाधिगतं द्रव्यं तिष्ठे
द्युक्तैरधिष्ठितं । यांस्तत्र चैारान् गृह्णीयात्तान्राजेभेन

घातयेत् ॥ तत्र राजपुरुषैः रक्ष्यमाणे धने द्रुमेन हस्तिना ॥

अथ साहसं ॥ तत्र नारदः सहसा क्रियते कर्म यत्किञ्चिद्ब लदर्पितैः। तत्साहसमिति प्रोक्तं सहोबलमिहोच्यते ॥ तथा तस्यैव भेदः स्तेयं स्याद्विशेषस्तत्र कीर्त्यते। आधिः साहसमाक्रम्य स्तेयमाधिश्छलेन तु ॥ रक्षितुर्ज्ञाने सत्येव बलेन आधिः पीडनं यत्तत्साहसं छलेन तज्ज्ञानावरणेन यथाधिर्थत्यी डनं तत् स्तेयमित्यर्थः। तद्विभजते स एव फलमूलोदका दीनां क्षेत्रोपकरणस्य च। भङ्गाक्षेपावमर्द्दाद्यैरधमं साहसं स्मृतं ॥ पशूनामन्नपानानां गृहोपकरणस्य च। एतेनैव प्रकारेण मध्यमं साहसं स्मृतं ॥ व्यापादो विषशस्त्राद्यैः परदा राभिमर्षणं। प्राणापरोधि यच्चान्यदुक्तमुत्तमसाहसं ॥ अत्रा ह मनुः क्षेत्रोपकरणं सेतुं पुष्पमूलफलानि च। विनाश यन् हरन्दण्ड्यः शताद्यमनुरूपतः ॥ पशुवस्त्रान्नपानानि गृ होपकरणन्तथा। हिंसयंश्चोरयन्दाप्योद्विशताद्यं दमन्तथा ॥ उत्तमे स एव स्त्रीपुंगोहेमरत्नानि देवविप्रधनन्तथा। कौशेयञ्चोत्तमद्रव्यमेषां मूल्यसमोदमः ॥ द्विगुणोवा कल्प नीयः पुरुषापेक्षया नृपैः। हर्त्ता वा घातनीयः स्यात्प्रसङ्गवि निवृत्तये ॥ क्षेत्रोपकरणं हलादि गृहोपकरणं शिलापट्टादि शताद्यं शतावरं। नारदः तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः। मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्च शतावरः ॥ वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥ स्यातां संव्यवहार्यौ तौ धृतदण्डौ तु पूर्वयोः

धृतदण्डोप्यसंभाष्योज्ञेयउत्तमसाहसे ॥ तदयं सङ्क्षेपः । अन्य
स्य धनस्यापहरणे विनाशने वा शताद्योदमः । चेत्रसेना
देश्चौर्य्येण साहसेन वा विनाशने विनाशितधनं चौरः सा
हसी वा धनस्वामिनि दाप्यः । हीनपुरुषस्तु द्विगुणं दण्ड्यः
उत्तमसाहसी तु दण्डे न विशोधितोऽपि न व्यवहारादि
रूपसम्बन्धवान् स्कार्य्यइति । मनुः द्रव्याणि हिंसाद्योयस्य
ज्ञानतोऽज्ञानतोपि वा । सतस्योत्पादयेत्तुष्टिं राज्ञेदद्याच्च
तत्समं ॥ याज्ञवल्क्यः सामान्यप्रभवद्रव्यहरणात्साहसं स्मृतं ।
तन्मूल्याद्विगुणोदण्डोनिह्नवे च चतुर्गुणः ॥ सामान्यप्रभवं
सामान्यप्रभुत्वविषयः परस्वमिति यावत् । तथा अवघाते
तथा भेदे छेदे कुड्याभिघातने । पणान्दाप्यः पञ्चदश विंश
तिन्तद्व्ययन्तथा ॥ परकीयकुड्यावघाते शिथिलीकरणे पञ्च
दश पणाः भेदे बन्धशिथिलीकरणे विंशतिः छेदे द्विधा कर
णे तथा विमर्द्दे अभिघातने उभयत्र चत्वारिंशत्पणादण्डः ।
तत्सज्जीकरणञ्च सतस्योत्पादयेत्तुष्टिमिति मनुवचनात् ।
चर्म्मचार्म्मिकभाण्डेषु काष्ठलोष्ट्रमयेऽपि च । मूल्यात्पञ्चगुणो
दण्डः पुष्पमूलफलेषु च ॥ चार्म्मिकमुपानदादि प्रथमचर्म्म
पदं स्पष्टार्थं काष्ठमयं तण्डुलादिमापणं लोष्ट्रमयं घटादि
एषु साहसविनाशितेषु स्वमूल्यपञ्चगुणोदण्डः । यस्तु पुष्पा
दौ शतावरोदण्डोमनूक्तः सोऽपि प्रशस्तपुष्पादिपरः ।
स्वामितोषस्तु सर्व्वत्र । कात्यायनः चतं भङ्गावमर्द्दौ वा

कुर्य्याद्द्रव्येषु योनरः। प्राप्नुयात्साहसं पूर्वं द्रव्यभाक् स्वाम्यु दाहृतः ॥ चतं किञ्चिन्नाशः भङ्गोऽर्द्धनाशः अवमर्द्दः सर्व्व नाशः द्रव्यमिह स्फटिकादि द्रव्यभाक् स्वामिने च स्फटि कादि देयमित्यर्थः। याज्ञवल्क्यः दुःखोत्पादि गृहे द्रव्यं चिपन् प्राणहरन्तथा। षोडशाद्यः पणान्दाप्योद्दितीयोमध्यमं दमं। दुःखोत्पादि कण्टकादि प्राणहरं सर्पादि परगृहे चिपन् आद्यः षोडशपणान्दितीयोमध्यमं साहसं दण्ड्य इत्यर्थः। विष्णुः गृहकुद्यादिभेत्ता मध्यमसाहसं तच योजयेत् ॥ परगृहभित्त्यादेरभिदारकोमध्यमसाहसं राज्ञा दण्ड्यः स्वभग्नञ्च भित्त्यादिकं सपूर्ववत्कुर्य्यादित्यर्थः। तथा गृहे पीडाकरं द्रव्यं प्रचिपन्पणशतं। पीडाचोत्कटाभि मता। याज्ञवल्क्यः अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्य्याप्रहार दः। सन्दिष्टस्याप्रदाता च समुद्रगृहभेदकः ॥ सामन्तकु लिकादीनामाज्ञानस्याप्यकारकः। पञ्चाशत्पणिकोदण्डएषा मिति विनिश्चयः ॥ स्वच्छन्दविधवागामी विक्रुष्टेऽनाभिधा वकः। अकारणेन विक्रोष्टा चाण्डालश्चोत्तमान् स्पृशन् ॥ शूद्रप्रव्रजितानाञ्च दैवे पैत्रे च भोजकः। अयुक्तं शपथं कु र्व्वन्नयोग्योयोग्यकर्म्मकृत् ॥ वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रति घातकृत्। साधारणस्यापलापी दासी गर्भविनाशकः ॥ पितापुत्रसुहृद्भ्रातृदम्पत्याचार्य्यशिष्यकाः। एषामपतितानाञ्च त्यागी च शतदण्डभाक् ॥ अर्घ्यः आचार्य्यादिस्तस्याक्रोश मतिक्रमं वा यः करोति प्रहारस्ताडनं सन्दिष्टं प्रस्थापितं

समुद्रं मुद्रासहितं गृहं सामन्ताः प्रतिवेशिनः कुलिकाः सकुल्याः मङ्गलादौ एतेषामनाह्वायकः एते पञ्चाशतं पणान्दण्ड्याः । स्वच्छन्देति अनियुक्तः सन्विधवाभिगन्ता अयन्तु अनियोगहेतुकोदण्डः व्यभिचारहेतुकस्त्वन्यएव विक्रुष्टे चौराद्याक्रान्तैराह्वाने कृते अनभिधायकः प्रतिवचनाप्रदाता अयुक्तं शपथं मातरमभिगच्छामीत्यादिरूपं अयोग्योऽक्षमः योग्यकर्म्म यागादि तेन योयत्कर्म कर्तुं न शक्नोति सचेत्तत्कर्त्तुं प्रवर्त्तते सदा दण्ड्यः वृषस्य पुंस्त्वं फलार्ज्जनं औषधादिना तदुपघाती साधारणेति अन्यसाधारणधनमसाधारणीकृत्य गृह्णन् पितापुत्रयोः सुहृदोर्भ्रात्रोश्च दम्पत्योराचार्य्यशिष्ययोर्म्मध्ये त्यागवीजदुष्कर्माभावेऽन्योन्यत्यागी एतेषां प्रत्येकं शतपणं दण्डः । मनुः न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति । त्यजन्नपतितानेतान्राज्ञा दण्ड्यः शतानि षट् ॥ स्त्री भार्य्या त्यागोविहितभरणपोषणाद्यकरणं । एतानेव प्रकृत्य शङ्खः त्यजेत्कामाद्द्विशतं दण्डं प्राप्नुयात् । अत्र याज्ञवल्क्योक्तो दण्डोऽविदुषोरन्योऽन्यत्यागे मनूक्तस्त्वविदुषैव कामादेकतरस्य विदुषस्त्यागे शङ्खोक्तस्तु कामादविदुषैकतरत्यागइति सम्प्रदायः । एवं विदुषोरन्योऽन्यत्यागेयूह्यं । शङ्खः मातापित्रोर्गुरोरुस्यातिक्रमेऽङ्गच्छेदः ॥ अतिक्रमस्ताडनं येनाङ्गेन ताडयेत्तच्छेदइत्यर्थः । विष्णुः अभक्ष्येण ब्राह्मणं दूषयितुः षोडश सुवर्णाञ्जात्यपहारिणा शतं सुरया वध्यः

क्षत्रियं दूषयितुस्तदर्द्धं वैश्यं दूषयितुस्तदर्द्धं ॥ अभक्ष्यं विष्ठादि जात्यपहारि लशुनादि सुरा प्रसिद्धैव । तदर्द्धं तदर्द्धमित्यनयोरव्यवहितस्तत्पदार्थः । इदमुत्कृष्टादिब्राह्मणपरं । याज्ञवल्क्यः द्विजं प्रदूष्याभक्ष्येण दण्डउत्तमसाहसः । क्षत्रियं मध्यमोवैश्यं प्रथमः शूद्रमार्द्धिकं ॥ शूद्रस्याभक्ष्यं कपिलादुग्धादि आर्द्धिकं पणानां सपादं शतं । इदमनुत्कृष्टब्राह्मणादिपरं । मनुः अभक्ष्यमथवापेयं वैश्यादीन् प्राशयेद्विजान् । जघन्यमध्यमोत्कृष्टान्दण्डानाऊर्ध्वयाक्रमं ॥ पणाः शूद्रे भवेद्दण्डः चतुःपञ्चाशदेव तु ॥ इदमत्यधमशूद्रविषयं । अन्यथा याज्ञवल्क्यविषयवत् । विष्णुः जातिध्वंशकरस्याभक्ष्यस्य भक्षयिता विवास्यः । स्वयं लशुनादि भोक्ता ब्राह्मणोदेशाद्वहिष्कार्य्य इत्यर्थः । याज्ञवल्क्यः जारञ्चौरेत्यभिवदन्दाप्यः पञ्चशतं दमं । उपजीव्यधनं मुञ्चंस्तदेवाष्टगुणीकृतं ॥ कुलाकीर्त्तिभयात्स्वरूपतोजारं चौरत्वेन विनिर्द्दिश्य जारापकृतं कुर्व्वञ्जनः पणानां पञ्चशतीं उत्कोचामादाय त्यजन्पणानां पञ्चशतीमष्टगुणामित्यर्थः । उत्कोचाष्टगुणमिति लभ्ये । तथा मृताङ्गलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा । राजयानासनारोढुर्द्दण्डोमध्यमसाहसः ॥ मृताङ्गलग्नं मृतकम्बलादि तत्तथात्वेनाप्रकाश्य विक्रेतुः राजयानाद्यारोहणं राजाज्ञां विनेत्यर्थः । मनुः अभिचारेषु सर्व्वेषु कर्त्तव्यो द्विशतोदमः । मूलकर्म्मणि चानाप्ते कृत्यासु विविधासु च ॥ अदूषितानां द्रव्याणां दूषणे भेदने तथा । मणीना

अपवेधे तु दण्डः प्रथमसाहसः ॥ यो लोभादधमोजात्या
जीवेदुत्कृष्टकर्मभिः । तं राजा निर्द्धनं कृत्वा चिप्रमेव प्रवास
येत् ॥ अभीति अनपराधं प्रति श्येनादियागकर्त्तुः भैषज्य
कर्म्म चानाप्ततया कुर्व्वतः स्वायोग्यामुच्चाटनादिरूपाञ्च
कृत्यां कुर्व्वतोद्विशतोदमः यः सद्द्रव्यमसद्द्रव्यमेलनेन मन्दी
करोति भेदनानर्हं मण्यादि वा भिनत्ति । वेधार्हमपि
मुक्तादि मन्दप्रदेशे विद्धति तस्य सार्द्धद्विशतरूपोदण्डः
यस्तु शूद्रादिः यज्ञादिचर्य्यया जीवति तस्य सर्व्वस्वहर
णविवासने दमः । याज्ञवल्क्यः विप्रत्वेन तु शूद्रस्य जी
वतोऽष्टशतोदमः ॥ विप्रत्वेन विप्रलिङ्गधारणेन जीविकां
कुर्व्वतः । मनुः सङ्क्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः ।
प्रतिकुर्य्याच्च तत्सर्व्वं दद्यात्पञ्च शतानि तु ॥ सङ्क्रमः साकम
इति प्रसिद्धः ध्वजोदेवस्य गरुडध्वजादिः यष्टिर्हट्टादि
चिह्नीभूता प्रतिमा देवस्य एतदन्यतमस्य योविनाशनं क
रोति सपञ्च शतानि दण्ड्यः । कात्यायनः हरेच्छिन्द्याद्दहे
च्चापि देवानां प्रतिमां यदि । तद्वृहस्यैव योभिन्द्यात्प्रा
प्नुयात्पूर्वसाहसं ॥ विष्णुः अभक्ष्यस्याविक्रेयस्य च विक्रयी
देवप्रतिमाभेदकश्चोत्तमसाहसं दण्ड्यः ॥ अत्र प्रतिमोत्क
र्षापकर्षाभ्यां तद्धनोत्कर्षापकर्षाभ्यां वा दण्डविकल्पः ।
शङ्खः आराम प्रतिमाकूपसङ्क्रमध्वजसेतुनिपानभङ्गेषु तत्समु
त्थानं प्रतिमासंस्कारोऽष्टशतञ्च ॥ निपानं कूपादिसमीपे
पश्वादिजलपानस्थानं अत्र एषां सप्तानामन्यतमभङ्गे कृते तत्क

र्त्तां आरामादेरभङ्गावस्थसमीकरणं कार्य्यं पणानामष्टशती च तस्य दण्ड इत्यर्थः । हन्यादित्यनुवृत्तौ विष्णुः सेतुभेदकृतः ॥ इदं महासेतुविषयं । शारीरोऽङ्गच्छेदो वेत्यनुवृत्तौ शङ्खः वापीतडागोदपानभेदे मार्गरसद्रव्यदूषणे दासीदाससम्प्रदानकरणे च ॥ मार्गस्य तीक्ष्णशलाकादिना रसद्रव्यस्य विषादिना अदास्यादासाय दानेन च दूषणे दुष्टीकरणे तत्कर्त्तुः प्रमापणमङ्गच्छेदो वा । याज्ञवल्क्यः विषाग्निदां स्त्रियञ्चैव पुरुषघ्नीमगर्भिणीं । सेतुभेदकरीञ्चाप्सु शिलां बध्वा प्रवेशयेत् ॥ विषदा अग्निदा पुरुषघ्नी सेतुभेत्री वा स्त्री अगर्भा चेत्तदा शिलां बध्वा अप्सु प्रवेश्या इत्यर्थः । तथा विप्रदुष्टां पतिगुरुनिजापत्यप्रमापणीं । विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत् ॥ विशेषतः प्रकर्षेण दोषवतीं तथा पत्युः पित्रादेरपत्यस्य वा मारणकर्त्रीं कर्णकरनासिकौष्ठच्छेदनपूर्वकं गोद्वारा मारयेत् । तथा क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः । राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥ क्षेत्रादीनां षण्णामन्यतमस्यापि दाहकः भूपभार्य्यागामी वा वीरणाग्निना दाहयितव्यः । मनुः प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकः । द्वाराणाञ्चैव भेत्तारं क्षिप्रमेव प्रमापयेत् ॥ नगराद्याश्रयस्य प्राचीरस्य परिखायाद्वारस्य वा विनाशकं त्वरया मारयेत् । राज्ञः कोषापहर्त्तॄंश्च प्रतिकूलेष्ववस्थितान् । घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान् ॥ याज्ञवल्क्यः सुवर्णशतमेकन्तु वधा

र्हीदण्डमर्हति । अङ्गच्छेदे तदर्द्धन्तु विवासे पञ्चविंशतिं ॥ वधार्हे अपराधे शक्तवधो ब्राह्मणः शतं सुवर्णान् दण्ड्यः एव मन्येपि । तथा ये कार्य्यिभ्योऽर्थमेवं हि गृह्णीयुः पापचेतसः । तेषां सर्व्वस्वमादाय राजा कुर्य्यात्प्रवासनं ॥ विनियुक्तास्तु कार्य्येषु हन्युः कार्य्याणि कार्य्यिणां । धनोष्मणा पच्यमानान्निस्वांस्तान् कारयेन्नृपः ॥ कार्य्यिभ्योव्यवहारिभ्यः कार्य्यिणामर्थिप्रत्यर्थिनां । याज्ञवल्क्यः ये राष्ट्राधिकृतास्तेषां चौरैर्ज्ञात्वा विचेष्टितं । साधून्सम्मानयेद्राजा विपरीतांस्तु घातयेत्॥ उत्कोचजीविनोद्रव्यहीनान् कृत्वा विवासयेत् । सदानमानसत्कारान् श्रोत्रियान्वासयेत्सदा ॥ तथा अवध्यं यश्च बध्नाति वध्यं यश्च विमुञ्चति । अप्राप्तव्यवहारश्च सदाप्योदममुत्तमं ॥ योऽधिकृतः अवध्यं निरपराधत्वेन निर्णीतं बध्नाति बध्यं सापराधत्वेन निर्णीतं त्यजति वा अपराधित्वेन निरपराधित्वेन वाऽनिर्णीतं बध्नाति त्यजति वा स सहस्रं पणान्दण्ड्यः। कात्यायनः राजक्रीडासु ये सक्ता राजवृत्त्युपजीविनः। अप्रियस्य च वक्तारोवधन्तेषां प्रकल्पयेत् ॥ प्रतिरूपस्य कर्त्तारः प्रेक्षकाः प्रकराश्च ये । राजार्थमोषकाश्चैव प्राप्नुयुर्व्विविधं वधं ॥ ये वा राजाज्ञां विना राजवेशानुकारिणः तथा स्वकर्त्तव्यराजकार्य्यविरोधेन नृत्यादिप्रेक्षकाः तथा प्रकराः ये दण्डाख्यं राजकरं स्वभावतोऽनतिशयमतिशयं कृत्वा गृह्णन्ति वा ये राजधनं चोरयन्ति ते सर्व्वे नानारूपैर्व्वधप्रकारैर्व्वध्याः । वध्या इत्यनुवृत्ते विष्णुः ये चाकुलीनाराज्यमभिकामयेयुः । अकुली

ना राज्ञोयत्कृतं तदप्रकृताः । याज्ञवल्क्यः न्यूनं वाप्यधिकं वापि लिखतोराजशासनं । पारदारिकचौरान्वा मुञ्चतो दण्डउत्तमः ॥ राजशासनं इदं देयमिदं ग्राह्यं इत्यादिकं । शङ्खः कूटशासनप्रयोगे राजशासनप्रतिषेधे कूटतुलामानेन व्यवहारे च शारीरोऽङ्गच्छेदोवा ॥ शासनमाज्ञां अकृतामपि कृतां कृत्वा प्रकाशयति वा राजाज्ञां वा अतिक्रामति कूटया तुलया कूटेन मानेन प्रस्थादिना व्यवहरति तस्य मारणमङ्गच्छेदोवा अपराधोत्कर्षापकर्षाभ्यामयं विकल्पः । अपराधस्यात्यपकर्षे कात्यायनः प्रमाणे न तु कूटेन मुद्रया वापि कूटया । कार्य्यन्तु साधयेद्योवै सदाप्योदण्डमुत्तमं ॥ उत्तमं पणसहस्रकरूपं । मनुः कूटशासनकर्तॄंश्च प्रकृतीनाञ्च दूषकान् । बालस्त्रीब्राह्मणघ्नांश्च हन्याद्विट्सेविनस्तथा ॥ शासनमिह राजादेशः प्रकृतिरमात्यः दूषकान् अविद्यमानदोषवादिनः द्विट्सेविनः राजविरोधिसेवकान् एतान्राजा हन्यादित्यर्थः । विष्णुः स्वाम्यमात्यसुहृत्कोशदण्डराष्ट्रदुर्गाणि प्रकृतयस्तद्दूषकान् हन्यात् । दण्डोऽत्र सेना एतत्सप्ताङ्गकं राज्यं एषामङ्गानामन्यतमस्यापि दूषकोवध्यः । याज्ञवल्क्यः शस्त्रावपाते गर्भस्य पातने चोत्तमोदमः । उत्तमोवाधमोवापि पुरुषस्त्रीप्रमापणे ॥ परद्रोहे शस्त्रपातनमात्रे तथा ब्राह्मणीतरगर्भपातने पणसहस्रं दण्डः उत्तमोवेति वधस्तत्रोत्कर्षापकर्षाभ्यां विकल्पोऽत्र । पशुना परिक्लेशेन पूर्वः स्यात् भेदनेन तु मध्यमः । प्रहारे

ण तु गर्भस्य पातने दण्ड उत्तमः ॥ परिक्लेशेन परिश्रमजननेन भेषजयोगेन प्रहारेण वा गर्भपातने प्रथममध्यमोत्तम साहसानि यथाक्रमं दण्डाः । बृहस्पतिः साहसं पञ्चधा प्रोक्तं वधस्तत्राधिकः स्मृतः । तत्कारिणोनार्थदमैः शास्या वध्याः प्रयत्नतः ॥ तत्कारिणोवधकारिणः । वधेऽपि विशेष माह सएव प्रकाशवधकाश्चे तु तथा चोपांशुघातकाः । राज्ञा सम्यग्वधं हित्वा हन्तव्याविविधैर्वधैः सम्यग्वधः शरच्छिरश्छेदः विविधोवधः अङ्गशास्तिपूर्विका प्राणशास्तिः । कात्यायनोऽपि व्यापादने तु तत्कारी वधश्चैतमवाप्नुयात् । तथा मित्रशास्त्रार्थलोभैर्वा राज्ञा लोकहितैषिणा । नमो क्तव्याः साहसिकाः सर्व्वभूतभयावहाः ॥ लोभाद्भयाद्वा यो राजा न हन्यात्पापकारिणः । तस्य प्रक्षोभ्यते राष्ट्रं राज्याच्च परिहीयते ॥ वन्ध्याग्निविषशस्त्रेण परान् यस्तु प्रमापयेत् ॥ क्रोधादिना निमित्तेन नरः साहसिकस्तु सः ॥ बौधायनः क्षत्रियादीनां ब्राह्मणवधे वधः सर्व्वस्वहरणञ्च तेषामेव तुल्यापकृष्टवधे यथावलमर्थरूपञ्च दण्डं कल्पयेत् क्षत्रियवधे गो सहस्रं वृषभाधिकं राज्ञउत्सृजेद्वैरनिर्य्यातनार्थं शतं वैश्ये दश शूद्रे वृषभश्चाधिकः शूद्रवधेन स्त्रीवधोगोवधश्च व्याख्यातो ऽन्यत्रात्रेय्या धेनोरनडुहोहत्वा चान्द्रायणञ्चरेदात्रेयीवधः क्षत्रियवधेन व्याख्यातः हंसभासवर्हिणचक्रवाकबलाकाका कोलूकमण्डूकनकुलभेरीकावशुनकुलादीनां वधः शूद्रवत् ॥

क्षत्रियादीनां त्रयाणामपि ब्राह्मणवधे सर्वस्वहरणं वधश्च तेषामेव क्षत्रियादीनामेव तुल्यः सजातीयः अपकृष्टो हीनजातीयः यथाबलं यथाशक्ति अर्थरूपं धनरूपं उत्तम साहसादिकं चकारात् शारीरं दण्डं कल्पयेत् क्षत्रियेति ब्राह्मणस्य तु क्षत्रियवधे सवृषभं गोसहस्रं वैश्यवधे सवृषं गोशतं शूद्रवधे सवृषं गोदशकं शूद्रवधेनेति रजस्वला न्यस्त्रीवधे धेन्वनडुहान्यगोवधे शूद्रवद्दण्डः आत्रेयी रजस्वला तस्यास्तु वधे क्षत्रियवधवद्दण्डः भेरीकः कुकुन्दरीति प्रसिद्धः बभ्रुः स्थलनकुलः नकुलोजलनकुलः । आदि पदेनावध्यास्तिर्य्यञ्चः । बृहस्पतिः एकस्य बहवो यत्र प्रहरन्ति रुषान्विताः । मर्म्मप्रहारदो यस्तु घातकः स उदाहृतः ॥ मर्म्म घाती तु यस्तेषां यथोक्तं दापयेद्दमं । आरम्भकृत्सहायाश्च दोषभाजस्तदर्द्धतः ॥ क्षतस्यास्य महत्त्वञ्च मर्म्मस्थानञ्च यत्नतः । सामर्थ्यञ्चानुबन्धञ्च ज्ञात्वा चिह्नैः प्रसाधयेत् ॥ यो घातकदण्ड उक्तः स इह मर्म्मघातिन एव आरम्भकृतः सहकारिणश्च प्रत्येकं तदर्द्धरूपः मर्म्मघातित्वनिश्चयार्थं क्षतस्येत्यादि तथा च क्षतस्य महत्त्वेन मर्म्मस्थानत्वेन वा सामर्थ्येन अभिभावकत्वादि रूपेणानुबन्धेन पौनःपुन्येन मर्म्मघातित्वमत्रसेयमित्यर्थः । नारदः अविशेषेण सर्व्वेषामेष दण्डविधिः स्मृतः । वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति ॥ शिरसो मुण्डनं दण्डस्तस्य निर्व्वासनं पुरात् । ललाटे चाभिशस्ताङ्कः प्रयाणं गर्द्दभेन च ॥ साहसचौर्य्ययोर्य्यमः न शारीरो ब्राह्मणस्य दण्डो भवति कर्हि

चित्। गुप्ते तु बन्धने बध्वा राजा भक्तं प्रदापयेत् ॥ अथवा बन्धनं रज्वा कर्म्म वा कारयेन्नृपः। मासार्द्धमासं कुर्व्वीत कार्य्यं विज्ञाय तत्वतः ॥ यथापराधं विप्रन्तु विकर्म्माण्यपि कारयेत् ॥ याज्ञवल्क्यः यः साहसं कारयति स दाप्योद्विगुणं दमं। यश्चैवमुक्काहन्दाता कारयेत्स चतुर्गुणं ॥ यश्चैवमिति एतदभियोगेन यत्तमिष्यति तदहं दाता त्वं तावत् कुर्व्वित्युक्का यः कारयति तस्य चतुर्गुणोदमः। कात्यायनः आरम्भकृत्सहायश्च तथा मार्गानुदेशकः। आश्रयः शस्त्रदाता च भक्तदाता विकर्म्मिणां ॥ युक्तोपदेशकश्चैव तथा नाशप्रवर्त्तकः। उपेक्षाकार्य्ययुक्तश्च दोषवक्तानुमोदकः ॥ अनिषेद्धा क्षमोयः स्यात्सर्व्वे ते कार्य्यकारिणः। यथाशक्त्यनुरूपन्तु दण्डमेषां प्रकल्पयेत् ॥ आरम्भेत्यादि अपरमक्रियाचिकीर्षुं ज्ञात्वा यस्तदुद्यमं तत्साहाय्यं वा करोति तस्य तत्कर्म्मानुकूलधर्म्मोपदेशं वा करोति अपकर्म्मिणः आश्रयभूतोवा तदनुकूलशस्त्रदाता वा भोजनदाता वा कृतापकर्म्मणस्त्राणाय तस्मै युक्तोपदेशं वा करोति अपकर्म्मकारिणि विषादर्पणेन तं परनाशाय प्रवर्त्तयति साहसिकादिना जने पीड्यमाने स्वयमक्षमोऽपि यः परद्वारापि न प्रतिकरोति अयुक्तोराज्ञाऽनियुक्तः सन्नियुक्तवत्पीडयति दोषवक्ता पीडनीयस्य दोषवक्ता अनुमोदकः पीडकस्यानुमन्ता क्षमः सन् पीडकस्याप्रतिषेद्धा एते त्रयोदशापि तदपराधकर्त्तार इव शक्त्यनुरूपं दण्ड्याः। नारदः अयक्तं साहसं कृत्वा प्रत्यासत्तिं

करोति यः । अथात्मयं वा सदखि तस्यार्द्धविनयः स्मृतः ॥ प्रत्यासत्तिं विनेतुः सहचारतां ब्रूयादिति स्वकृतमपराधं स्वयमेव प्रकाशयति । तथा गूहमानस्तु दौश्शील्यं यदि वा नः सजीवति । सभ्यास्तास्य न तुष्यन्ति तीव्रोदण्डस्तु पात्यते ॥ स्वयं कृतमपकर्म्म विनेत्रादिना दृष्टः सन्नपह्नुवानोऽपकर्म्मणैव जीविकां करोति तदा लघून्यप्यपकर्म्मणि तीव्रोदण्डस्तस्य कार्य्यइत्यर्थः । एवञ्च सापराधः शास्त्रोक्तं दण्डं यदि पणं करोति तदा पणमपि स्वकृतं दाप्यः ॥

अथ घातकान्वेषणं ॥ तत्र याज्ञवल्क्यः अविज्ञातहतस्याशु कलहं सुतबान्धवाः । प्रष्टव्यायोषितश्चास्य परपुंसि रताः पृथक् ॥ स्त्रीद्रव्यवृत्तिकामोवा केन वायं गतः सह । तत्प्रदेशसमासन्नं पृच्छेद्वापि जनं शनैः ॥ तत्प्रदेशसमासन्नं हननप्रदेशसमीपस्थं । वृहस्पतिः हतः संदृश्यते यत्र घातकस्तु न दृश्यते । पूर्ववैरानुमानेन ज्ञातव्यः स महीभुजा ॥ प्रतिवेश्यानुवेश्यौ च तन्मित्राणि च बान्धवाः । प्रष्टव्याराजपुरुषैः सामादिभिरुपक्रमैः ॥ विज्ञेयोऽसाधुसंसर्गाचिह्नैरोढेन वा नरः । एषोदिता घातकानां तस्कराणाञ्च भावना ॥ गृहीतः शङ्कया यस्तु न तत्कार्य्यं प्रपद्यते । शपथेन विशोद्धव्याः सर्व्ववादेष्वयं विधिः ॥ तत्कार्य्यं हननरूपं न प्रपद्यते दृष्टः सन्नानुमन्यते । तत्र व्यासः ज्ञात्वा तु घातकं सम्यक् ससहायं सबान्धवं । हन्याच्चित्रैर्व्वधोपायैरुद्वेगजनकैर्नृपः ॥ वृहस्पतिः दिव्यैर्व्विशुद्धोमोच्यः स्यादशुद्धोवधमर्हति । निग्रहानुग्रहाभ्यां

कीर्त्तिर्धर्म्मश्च वर्द्धते ॥ नियहेति असाधोर्निग्रहात्साधोश्चानु ग्रहाद्राज्ञः कीर्त्तिधर्म्मयोरुपचयो भवतीत्यर्थः ॥

अथ सङ्ग्रहणं ॥ तत्र व्यासः । सङ्ग्रहस्त्रिविधः प्रोक्तः प्रथमो मध्य उत्तमः । उक्तश्चेति स्वशास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥ अदेशकाले सम्भाषा अरण्ये च परस्त्रिया । अपाङ्गप्रेक्षणं हास्यं दूतीसम्प्रेषणं तथा ॥ स्पर्शोभूषणवस्त्राणां प्रथमः सङ्ग्रहः स्मृतः ॥ नारदः परस्त्रिया सहाकाले अदेशे पुरुषस्य तु । स्थान सम्भाषणामोदास्त्रयः सङ्ग्रहणक्रमाः ॥ नदीनां सङ्गमे तीर्थे आरामेषु वनेषु च । स्त्रीपुंसौ यत्समेयातां तच्च सङ्ग्रहणं स्मृतं । सङ्ग्रहणमिति सम्यग्गृह्यते तदनुरक्ततया प्रमीयते आशयो येन तत्सङ्ग्रहणं अनन्यथासिद्धपरस्त्रीसंलापादि तेन कर्म्मणा वचसा च परस्परमनुरक्तावनुमीयेते अनन्यथासिद्धत्व बलादेवाप्ततया ऋजुतया कार्य्यात्वत्यादिना अन्याभिस न्धिना वा कृतः संलापादिर्न संग्रहणं एतत्परमेव मनुवचन मपि । भिक्षुकावन्दिनश्चापि दीक्षिताः कारवस्तथा । सम्भा षणं गृहे स्त्रीभिः कुर्य्युरप्रतिवारिताः ॥ अदेशेत्यादि अदेशे निर्जनादौ अकाले रात्र्यादौ स्थानमवस्थितिः आमोदः परीहासः । तथा च येन व्यापारेण अत्यासङ्गकृतेन चित्तं स्खलितमनुमीयते तदाद्यसङ्ग्रहणमिति वर्त्तुलार्थः । मध्यमे बृहस्पतिः प्रेषणं गन्धमाल्यानां फलमद्यान्नवाससां । सम्भा षणञ्चैव रहसि मध्यमं सङ्ग्रहं विदुः ॥ व्यासः प्रेषणं गन्ध माल्यानां धूपभूषणवाससां । प्रलोभणञ्चान्नपानैः मध्यमः

सङ्ग्रहः स्मृतः ॥ सम्भाषणमिह पूर्वापेक्षयाऽतिशयितमभिमतं गन्धेत्यादि अस्य द्रव्यव्ययरूपतया पूर्वापेक्षया अधिकत्व मितिभावः । उत्तमे बृहस्पतिः । एकशय्यासनं क्रीडा चुम्बनालिङ्गनं तथा । एतत्सङ्ग्रहणं प्रोक्तं उत्तमं शास्त्रवेदिभिः ॥ व्यासः शय्यासने विविक्ते तु परस्परमपाश्रयः । केशाकेशि ग्रहश्चैव ज्ञेयउत्तमसङ्ग्रहः ॥ उपकारक्रियाकेलिः स्पर्शोभूषण वाससां । सह शय्यासनञ्चैव सर्व्वं सङ्ग्रहणं स्मृतं ॥ स्त्रियं स्पृशत्य देशे यः स्पृष्टोवा मर्षयेत्तया । परस्परस्यानुमते सर्व्वं सङ्ग्रहणं स्मृतं ॥ उपकारक्रिया हिताचरणक्रिया उपचारेति क्वचित्पाठः तत्र ताम्बूलादि प्रेषणमर्थः केलिः नर्म्म सङ्ग्रहणं उत्तम मिति शेषः अदेशे स्तनादौ । नारदः दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं वदेत् । पूर्वं मयेयं भुक्तेति तच्च सङ्ग्रहणं स्मृतं ॥ पादौ यस्यापि गृह्णीयात् वेश्यां वस्त्राञ्चलेऽपि वा तिष्ठ तिष्ठेति वा ब्रूयात्सर्व्वं सङ्ग्रहणं स्मृतं ॥ वेश्यामित्युपलक्षणं । स्वदारव्यतिरिक्तायां स्त्रियामीदृशचेष्टस्य व्यवहारः सङ्ग्रहण मित्यर्थः । भूतोपकारयुक्तस्य जवेनास्थानसङ्गतः । कण्ठ केशाद्यवग्राही कर्णनासाकरादिषु ॥ एकस्थानासनाहारः सङ्ग्रहोनवधा स्मृतः ॥ बृहस्पतिः चयाणामपि चैतेषां प्रथमो मध्यउत्तमः । विनयः कल्पनीयः स्यादधिकोद्रविणाधिके ॥ एषु त्रिषु सङ्ग्रहेषु यथाक्रमं प्रथममध्यमोत्तमसाहसादण्डाः । अधिकधनस्याधिकोपि दण्डइत्यर्थः । मनुः परपत्न्या तु पुरुषः सम्भाषां योजयन्रहः । पूर्व्वमाचारितोदोषैः प्राप्नुया

त्पूर्वसाहसं ॥ यया सह पूर्वं यस्याभिशापोवृत्तः तया सहा रहस्यपि औचितीवादाधिकमालापमात्रं कुर्वाणः पूर्वसाहसं दण्ड्यइत्यर्थः । तथा यस्त्वनाचारितः पूर्वमभिभाषेत कारणात् । न दोषं प्राप्नुयात्किञ्चित् न हि तस्य व्यतिक्रमः ॥ अनाचारितस्य निमित्तवशादौचितीवादादधिकेऽप्यालापे न दोषइत्यर्थः । अनाचारितस्यापि निर्ज्जने परस्त्रिया सह संलापे दोषएवेत्याह सएव । परस्त्रियं योऽभिवदेत्तीर्थेऽरण्येगृहेऽपि वा । नदीनामपि सम्भेदे ससङ्ग्रहणमाप्नुयात् ॥ मनुः न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाप्नुयात् । निषिद्धोभाषमाणस्तु सुवर्णं दण्डमर्हति ॥ निषिद्धस्तस्याः पत्यादिना निवारितः । याज्ञवल्क्यः स्त्री निषेधे शतं दद्याद्द्विशतन्तु दमं पुमान् । प्रतिषेधे तयोर्द्दण्डोयथा सङ्ग्रहणे तथा ॥ स्त्र्येव चेन्निवारितापि अन्यपुरुषेण सहालपति तदा शतं पणान् दद्यात् । पुरुषएव चेन्निवारितः परस्त्रिया सहालपति तदा द्विशतं पणान्दद्यात्. उभावपि निवारितौ चेत् परस्परमालपतः तदा तौ प्रत्येकं प्रथमसाहसं दद्यावित्यर्थः । मनुः किञ्चिदेव हि दाप्यः स्यात्सम्भाषां ताभिराचरन् । प्रेष्यासु चैकभक्तासु रहः प्रव्रजितासु च ॥ एकपुरुषाश्रितया स्वप्रेष्यया तापस्या वा रहसि सहालपने किञ्चिदेव सुवर्णान्न्यूनं दमं दाप्यइत्यर्थः । शङ्खः येन येनाङ्गेनापराधं कुर्य्यात्तत्तस्य छेत्तव्यमष्टसहस्रं वा दण्डोऽन्यत्र ब्राह्मणाददण्ड्याहि ब्राह्मणाः ॥ शारीरदण्डानर्हाब्राह्मणाः । मनुः परदाराभि

सर्वे च प्रवृत्तांस्त्रीन्महीपतिः । उद्वेजनकरैर्दण्डैश्चिह्नयित्वा प्रवासयेत् ॥ त्रीन् ब्राह्मणेतरान् उद्वेजनकरैः कर्णनासाच्छेदनरूपैः । प्रतिलोमसङ्ग्रहे तु सएव । अब्राह्मणः सङ्ग्रहणे प्राणान्तं दण्डमर्हति । यस्तु सञ्चारकस्तत्र पुरुषः सतथा भवेत् ॥ पारदारिकवद्दण्ड्यो यश्च स्यादवकाशदः ॥ सञ्चारकः अभिसारयिता अवकाशदः अभिसारस्थानदाता । अनियतवर्णभर्तृकाणान्तु सङ्ग्रहणे दण्डोनायमित्याह मनुः नैष चारणदारेषु विधिर्नात्मोपजीविषु । सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ॥ चारणोनटः भार्य्यापुत्रः स्वकीयास्त्रेयादिस्मरणादात्मा भार्य्या तेनात्मानं भार्य्यां जीवनार्थमुपजीवतीत्यात्मोपजीवी शैलूषादिः । एतौ हि स्वस्त्रियमप्यलङ्कृत्य व्यभिचारयतोऽतोनैतत्सङ्गे दण्डः । अभिगमदण्डस्त्वत्रापि स तु बन्धक्यभिगमप्रकरणे वक्ष्यति । नारदः नाथवत्या परगृहे संयुक्तस्य स्त्रिया सह । दुष्टं सङ्ग्रहणं तज्ज्ञैर्नागतायाः स्वयं गृहे ॥ नाथवत्या स्यात्सङ्ग्रहणं दुष्टं दण्ड्यतावीजं यदि सैव सङ्ग्रहीतुर्गृहे स्वेच्छया समागत्य सङ्ग्राहयति तदा तदपि न दुष्टमित्यर्थः । विष्णुः अदुष्टत्यक्तदारस्य क्लीवस्य चाक्षमस्य च । स्वेच्छानुपेयुषोदारान्न दोषः साहसे भवेत् ॥ पतित्यक्तान्वा क्लीवपतिकान्वा अक्षमपतिकान्वा परदारान् स्वेच्छान् तद्गृहेऽपि सङ्गृह्णतोऽभिगच्छतोवा न दण्डइत्यर्थः ॥

अथाभिगमदण्डः ॥ तत्र मनुः योऽकामां दूषयेत्कन्यां स सद्योवधमर्हति । सकामां दूषयंस्तुल्योन वधं प्राप्नुयान्नरः ॥

अनिच्छन्तीं कन्यामभिगच्छन् तत्सवर्णो वध्यो नत्विच्छन्तमित्य र्थः। उत्तमां भजमानस्तु जघन्यो वधमर्हति। शुल्कं दद्यात्सेवमा नः समदिच्छेत्पिता यदि॥ उत्कृष्टवर्णा कन्यामिच्छन्तीमनिच्छ न्तीं वाऽधमवर्णोऽभिगच्छन्वध्यः तस्यास्तत्पितुरेच्छया गच्छन् तत्सवर्णः शुल्कं तत्पित्रे दाप्यः। किन्तु सा दत्तशुल्का तेनैव वि वाह्येति। तदाह नारदः सकामायान्तु कन्यायां सवर्णेनाप्यति क्रमः किन्त्वलङ्कृत्य सत्कृत्य स एवैनां समुद्वहेत्॥ मनुः समां शु ल्कमाभरणं द्विगुणं स्त्रीधनञ्च दत्वा प्रतिपद्येत्॥ समां कन्यां स्वयंवासितां शुल्काभरणस्त्रीधनानि द्विगुणानि दत्वा स वर्णां विवाहयेदित्यर्थः। अभिगत्य तु यः कन्यां कुर्याद्दर्पेण मानवः। तस्याशुकर्त्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतं। सवर्णा मनिच्छन्तीं योनावङ्गुलिप्रक्षेपेण योमैथुनवतीं कुर्यात्तस्या ङ्गुलिद्वयच्छेदः पणशतषट् दण्डश्चेत्यर्थः। सकामां दूषयंस्तुल्यो नाङ्गुलीच्छेदमाप्नुयात्। द्विशतन्तु दमं दाप्यः प्रसङ्गविनि वृत्तये॥ सकामामिच्छन्तीं दूषयन्योनावङ्गुलिप्रक्षेपेण रमयन् तुल्यः सवर्णः। नारदः कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत्। जघन्यं सेवमानान्तु संयतां वासयेद्गृहे॥ कन्यैव कन्यां या कुर्यात्तस्याः स्याद्विशतोदमः। शुल्कञ्च द्विगुणं दद्या त् शिफाश्चैवाप्नुयाद्दश॥ कुर्याद्योनावङ्गुलिप्रक्षेपेण दूषयेत् शिफाः प्रहारान्। या तु कन्यां प्रकुर्यात् स्त्री सा सद्योमौण्ड्य मर्हति। अङ्गुल्योरेव चच्छेदं खरेणोद्वहनन्तथा॥ या पुनः

स्त्री कन्यां तद्योनावङ्गुलिप्रक्षेपेण दूषयित्वा तत्क्षणादेव शिर
सो मुण्डनं तदभ्यासेऽङ्गुल्योच्छेदनं गर्दभेन च राजमार्गगमनम
र्हतीत्यर्थः। याज्ञवल्क्यः अलङ्कृतां हरन् कन्यामुत्तमं ह्यन्यथा
धमं। दण्डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः ॥ सकामा
मनुलोमाश्च न दण्डस्त्वन्यथा दमः। दूषणेतु करच्छेदउत्त
मायां वधस्तथा। अलङ्कृतां अन्यस्मै दातुं प्रसाधितवतीं
उत्तमं उत्तमसाहसं अनलङ्कृता चेत्तदाधमं प्रथमसा
हसं उत्तमासु वधोहीनवर्णस्य अन्यथेति तस्या अका
मत्वे। तथाह भर्त्तारं लङ्घयेद्यातु स्त्री ज्ञातिबलदर्प्पिता ॥
तां श्वभिः खादयेद्राजा संस्थाने बहु संस्थिते ॥ भ्रात्रादिबा
न्धवादिदर्प्पेण या पतिमवमन्य व्यभिचरेत्तां राजा लोकमध्ये
कुक्कुरैः खादयेदित्यर्थः। पुमांसं दाहयेत्तञ्च शयने तप्तआयसे।
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥ तञ्चानन्तरोक्तं
व्यभिचारं धनदर्प्पेण तदभिगन्तारं लौहमये तप्ते शयने शाय
यित्वा जीवन्तमेव दाहयेत्। मारणाधिकृताः पुरुषास्तत्र
तद्दाहक्षमाणि काष्ठानि क्षिपेयुरित्यर्थः। मनुः अगुप्तां
क्षत्रियां वैश्यां शूद्रां वा ब्राह्मणोव्रजन्। शतानि पञ्च द
ण्ड्यः स्यात्सहस्रन्त्वन्त्यजस्त्रियं ॥ अन्त्यजोरजकचर्म्मकारादिः।
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणोदमः। व्रात्यया सह संवा
से चाण्डाल्या तावदेव तु ॥ आदौ परस्त्रीगमनदोषेण दुष्टस्य
ततः संवत्सरोपरि पुनस्तस्यामेवाभिशस्तस्य प्रथमदमाद्द्वि
गुणोदमः। व्रात्ययेत्यादि व्रात्या व्रात्यजाता व्रात्यस्य

दुष्टधर्म्माचारः । अवसन्नकर्म्मधर्म्माचारोव्रात्यइति हारीत वचनात् । व्रात्या अतिक्रान्तविवाहकालकन्येति हलायुधः । व्रात्यागमने चाण्डालीगमने च दण्डः सहस्रपणरूपः । सएव पुनर्गमने द्विगुणः कार्य्यः । तेन सर्व्वस्यैव सजातीयव्यभिचाराभ्यासे द्वितीये प्रथमदण्डद्वैगुण्यमित्यर्थः । याज्ञवल्क्यः अन्त्याभिगमने त्वङ्कयित्वा कुबन्धेन तु प्रवासयेत् । शूद्रस्तथाङ्कएव स्यादन्त्यस्यार्य्यागमे वधः ॥ अङ्कबन्धः अशिरस्कपुरुषाकारोऽङ्कः तेनाङ्कयित्वा त्रैवर्णिकं निर्व्वासयेत् । शूद्रोऽङ्कएव इत्येवकारेण निर्व्वासनमात्रनिषेधः तेनान्त्यागमने वधोनोर विरोधः । अन्त्यस्य चाण्डालस्य आर्य्यागमने त्रैवर्णिकस्त्रीगमने वधः । शूद्रोगुप्तामगुप्तां वा द्विजातिस्त्रियमाविशन् । अगुप्तामङ्गसर्व्वस्वैर्गुप्तां सर्व्वेण हीयते ॥ शूद्रस्यागुप्तत्रैवर्णिकस्त्रीगमने एकाङ्गच्छेदः सर्व्वस्वहरणञ्च एकाङ्गञ्चात्र शिश्नरूपं । आर्य्यास्वभिगमने लिङ्गोद्धारः सर्व्वस्वहरणं गुप्ता चेद्वधोधिकइति गौतमवचनात् । गुप्तागमने तु वधसहितं पूर्व्वोक्तं सर्व्वमित्यर्थः ॥ वैश्यः सहस्रं दण्ड्यः स्यात्संवत्सरनिरोधतः । सहस्रं क्षत्रियोदण्ड्योमौण्ड्यं मूत्रेण चार्हति ॥ वैश्यस्य गुप्तब्राह्मणीगमने संवत्सरबन्धनादनन्तरं पणसहस्रं दण्डः क्षत्रियस्य एतद्गमने सएव दण्डः खरमूत्रेण च शिरोमुण्डनं । ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ । वैश्यं पञ्चशतं कुर्य्यात्क्षत्रियन्तु सहस्रिणं ॥ सुगमं वैश्यस्यायं दण्डह्रासः शूद्रातुल्यायाब्राह्मण्यागमने अन्यस्यास्तु गमने क्षत्रियत्र

दण्डः । उभावपि च तावेव ब्राह्मण्या गुप्तया सह । विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥ तौ क्षत्रियवैश्यौ ब्राह्मण्या गुणवत्या अतोवैश्यः सहस्रं दण्ड्यः स्यादित्यादिना न विरोधः । शूद्रवदिति सर्वस्वदण्डलिङ्गच्छेदवधवन्तौ कार्य्यावित्यर्थः । कटाग्निना दाहपक्षे तु । वैश्योलोहितदर्भैः क्षत्रियः शरपत्रैरावेष्य इति वशिष्ठवचनात्तत्तृणवेष्टितौ तौ दाह्यावित्यर्थः । सहस्रं ब्राह्मणोदण्ड्योगुप्तां विप्रां बलाद्व्रजन् । शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥ मौण्ड्यं प्राणान्तिकोदण्डोब्राह्मणस्य विधीयते । इतरेषान्तु वर्णानां दण्डः प्राणान्तिकोभवेत् ॥ प्राणान्तिकोदमोब्राह्मणस्य मुण्डनमेव स्यादितरेषान्तु वधएव । न जातु ब्राह्मणं हन्यात्सर्वपापे स्ववस्थितं । राष्ट्रादेनं वहिः कुर्य्यात्समग्रधनमक्षतं ॥ इदन्तु निर्वासनमसकृत्ताद्दशापराधकरणे । न ब्राह्मणवधाद्भूयान् धर्म्मोविद्यते भुवि । तस्मादस्य वधं राजा मनसापि न चिन्तयेत् ॥ व्यासः । वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियोव्रजेत् । योब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥ तौ दण्ड्यौ पञ्च शतसहस्रपणरूपौ । अयञ्च दण्डह्रासः गुणवद्वैश्यस्य निर्गुणक्षत्रियागमनेऽन्यथाद्वावपि सहस्रं दण्ड्यौ ॥ सहस्रं ब्राह्मणोदण्डं दाप्योगुप्ते तु ते व्रजन् । शूद्रायां क्षत्रियविशोः सहस्रोवै भवेद्दमः ॥ ते क्षत्रियावैश्ये शूद्रायां गुप्तायां । क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः । मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्रियोदममेव वा ॥ क्षत्रियस्तु गुप्तक्षत्रियागामी

खरमूत्रेण स्तिमितकेशो मुण्डनीयः । अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् । शतानि पञ्च दण्ड्यः स्यात् सहस्रं त्वन्त्यजस्त्रियं ॥ शूद्रामप्यगुप्तामेव । अन्तेभवोऽन्त्यः शूद्रस्तस्माज्जातश्चाण्डालादिः तत्स्त्रीगमने ब्राह्मणस्य पण सहस्ररूपो दण्डः । न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति । त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ॥ स्पष्टं । ऋत्विजन्तु त्यजेद्याज्यो याज्यञ्चर्त्विक् त्यजेद्यदि । शक्तं कर्म्मण्यदुष्टञ्च तयोर्द्दण्डः शतं शतं ॥ निर्द्दोषपरिहर्त्तुः कर्म्मणि कर्म्मणि पणानां शतं दण्डः । दास्यन्तु कारयेल्लोभाद्ब्राह्मणः संस्कृतान्द्विजान् । अनिच्छतः प्रभुत्वेन राज्ञा दण्ड्यः शतानि षट् ॥ दास्यं दासकृत्यं पादप्रक्षालनादि । मात्स्ये यस्तु सञ्चारकस्तत्र पुरुषस्य तथा भवेत् । पारदारिकवद्दण्ड्यो य स्तयोरवकाशदः ॥ स्त्रियं पुरुषं वा अभिसारं प्रति सञ्चारयति यस्तु तयोरभिसारस्थानं ददाति तौ पारदारिकवद्दण्ड्यावित्यर्थः । बृहस्पतिः सहसाकामयेद्यस्तु धनं तस्याखिलं हरेत् । उत्कृत्य लिङ्गवृषणौ भ्रामयेद्गर्द्दभे न तु ॥ छद्मना कामयेद्यस्तु तस्य सर्व्वहरो दमः । अङ्कयित्वा भगाङ्केन पुरान्निर्व्वासयेत्ततः ॥ दमोन्तिमः समायान्तु हीनायामार्द्धिकः स्मृतः । पुंसः कार्य्योधिकायान्तु गमने सम्प्रमापणं ॥ यः सहसा बलेन परस्त्रियमनिच्छन्तीं अभिगच्छति तस्य सर्व्वस्वमादाय लिङ्गवृषणौ च छित्वा गर्द्दभारूढं तं भ्रामयेत् । यस्तु छद्मना छलेन परस्त्रियमनिच्छन्तीमभि

गच्छति तस्य सर्व्वस्वमादाय भगाङ्केनाङ्कयित्वा पुरनिर्व्वासनं दण्डः। यस्तु बलच्छलं विहाय दूतादि द्वारा समानजातीयां परस्त्रियमभिगच्छति तस्यान्तिमउत्तमसाहसो दण्डः। बलच्छलं विहाय दूतादिप्रेषणेन प्रबोध्य हीनामन्यपूर्वां शूद्रामभिगच्छतोमध्यमसाहसोदण्डः। उत्कृष्टजातीयान्तु यथातथाभिगच्छतो मारणं दण्डइत्यर्थः। मनुः गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्य्यं ब्रह्महन्यशिराः पुमान्॥ स्तेयं हिरण्यचौर्य्यं। याज्ञवल्क्यः सजातावुत्तमोदण्डश्चानुलोम्ये च मध्यमः। प्रातिलोम्ये वधः पुंसोनार्य्याः कर्णादिकर्त्तनं॥ कर्णादीत्यादिशब्दः केशादिपरः तेन वृहस्पतिवाक्येऽपि पुंसः प्रमापणं स्त्रियाः कर्णकेशच्छेदनमिति द्रष्टव्यं। विष्णुः गोगमने वान्त्यागमने वा वधः उत्तमागमने च॥ अन्त्या अस्पृश्या। नारदः माता मातृस्वसा श्वश्रूः मातुलानी पितृस्वसा। पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा॥ दुहिताचार्य्यभार्य्या च सगोत्रा शरणागता। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा तु या॥ आसामन्यतमां गत्वा गुरुतल्पगउच्यते। शिश्नस्योत्कर्त्तनात्तत्र नान्योदण्डोविधीयते॥ मातात्र जननीव्यतिरिक्ता पितृपत्नी आसां विंशतेरन्यतमागमने शिश्नच्छेदः गुप्तविषयमेतत्। याज्ञवल्क्यः पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि। आचार्य्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः॥ छित्वा लिङ्गं वधस्तस्य सकामायाः स्त्रियास्तथा॥ आसां षण्णां मध्ये या यथोक्तांमभि

योगिनं सकामा रमयति तत्रापि लिङ्गच्छेदनपूर्वकोवधः। आपस्तम्बः नाश्यआर्य्यः शूद्रायां ॥ शूद्रायामनन्यपूर्वायां कृताभिगमआर्य्योब्राह्मणोनाश्योनिर्व्वास्यः। शूद्रस्येत्यनुवृत्तौ गौतमः आर्य्यस्त्र्यभिगमने लिङ्गोद्धारः सर्व्वस्वहरणं गुप्ता चेद्वधोऽधिकः॥ आर्य्यस्त्री त्रैवर्णिकस्त्री। आपस्तम्बः वध्यः शूद्रआर्य्यायां दारांश्चास्यावकर्षयेत् ॥ अस्य उक्तव्यभिचारवतः शूद्रस्य दारान् भार्य्यां आकर्षयेत् दासीं कुर्य्यादित्यर्थः। एतस्य वधप्रकारमाह बौधायनः शूद्रं कटाग्निना दहेत् द्विजस्त्रीगमनइति ॥ कटोवीरणं ब्राह्मणीगन्तारमित्यनुवृत्तौ यमः शूद्रन्तु घातयेद्राजा शयाने तप्तआयसे। दहेच्च पापकृत्तं च काष्ठैः पर्णैस्तृणैस्तथा ॥ हारीतः श्रेयसः शयनशायिनं राजा बध्वा श्वभिः खादयेत् काष्ठैस्तैनं दहेत् ॥ श्रेयसउत्कृष्टवर्णस्य शयनशायिनं स्त्रीगामिनं। गौतमः श्वभिस्तु खादयेद्राजा हीनवर्णगमे स्त्रियं॥ वशिष्ठः शूद्रश्चेद्ब्राह्मणीं गच्छेत्तं वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वापनं कृत्वा सर्प्पिषाभ्युच्य नग्नां खरमारोप्य महापथमनुव्राजयेत् पूता भवतीति विज्ञायते वैश्यश्चेत् ब्राह्मणीं गच्छेत्तं लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वापनं कृत्वा सर्प्पिषाभ्युच्य नग्नां खरमारोप्य महापथमनुव्राजयेत् पूता भवतीति विज्ञायते: राजन्यश्चेद्ब्राह्मणीमभिगच्छेत्तं शरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वापनं कृत्वा सर्प्पिषाभ्युच्य नग्नां खरमारोप्य महापथ

मनुज्ञाजयेत् पूताभवतीति विज्ञायते एवं वैश्योरान्यार्था मैथुन माचरन् शूद्रस्तु राजन्यावैश्ययोः ॥ मदापयोराजपथः । यमः वृषलं सेवते या तु ब्राह्मणी मदमोहिता ॥ तां श्वभिः खादयेद्राजा संस्थाने बध्यघातिनां ॥ वैश्यं वा क्षत्रियं वापि ब्राह्मणी सेवते तु या । शिरसोमुण्डनं तस्याः प्रयाणं गर्द्दभेन च ॥ बध्यघातिनां सूनानियुक्तचाण्डालानां । वृहस्पतिः गृहमागत्य या नारी पुंसोङ्गस्पर्शनादिना । कामयेत्तत्र सा दण्ड्या नरस्यार्द्धदमः स्मृतः ॥ छिन्ननासोष्ठकर्णां तां परिभ्राम्याप्सु मज्जयेत् । खादयेद्वा सारमेयैः संस्थाने बहुसंस्थिते ॥ इत्यादित्यनुवृत्तौ विष्णुः स्त्रियमसक्तभर्त्तृकां पत्यानुपभुक्तां तदतिक्रामणी ॥ मिलितश्चेदं हननिमित्तं । धनदण्डे कात्यायनः नास्वतन्त्राः स्त्रियोग्राह्याः पुमांस्तत्रापराध्यति । प्रभुणा शासनीयास्तारजा तु पुरुषं नयेत् ॥ यास्या दण्डार्थं धर्त्तव्या किन्तु राजा तत्पतिपुरुषं प्रति तां प्रापयेत् अर्थात्तत्पतिदारा तद्दण्डं गृह्णीयादिति तात्पर्य्यं । कात्यायनः प्रोषितस्वामिका नारी प्रापिता यद्यभिग्रहे । तावत्सा बन्धने स्थाप्या यावत्स्यादागतः प्रभुः ॥ अभिग्रहोऽभिसारः । मात्स्ये बलात्संदूषयेद्यस्तु परभार्य्यां कर्थचन । वधोदण्डोभवेत्तस्य नापराधोभवेत्स्त्रियाः ॥

अथ वेश्याद्यभिगमनदण्डः ॥ तत्र व्यासः परावरुद्धागमने पञ्चाशत्पणिकोदमः । प्रसह्य वेश्यागमने दण्डोदशपणः स्मृतः ॥ परावरुद्धा व्यभिचारिण्यात्र केनचिन्नियतेन जारेण धृता ।

याज्ञवल्क्यः प्रसह्य दास्यागमने दण्डोदशपणः स्मृतः । बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक् ॥ अयोनौ गच्छतस्तां वा पुरुषं वापि मेहतः । चत्वारिंशत्पणोदण्डस्तथा प्रव्रजितागमे ॥ असौ दासी यद्यकामा सती नैरन्तर्य्येण बहुभिर्गम्यते तदा तेषां प्रत्येकं चतुर्विंशति पणात्मकोदण्डः अयोनौ स्त्रियामुखादौ गच्छतोमेढ्रप्रवेशनं कुर्व्वतः पुरुषं मेहतः अतिरागेण पुरुषमभिगच्छतः प्रव्रजिता तापसी । नारदः पश्चयोनावतिक्रामन् विनेयः स दमं शतं । मध्यमं साहसं गोषु तदेवान्त्यावसायिषु ॥ अतिक्रामन्मैथुनं कुर्व्वन् पणशतं दण्ड्यः । तथा सुवर्णन्तु भवेद्दण्ड्यो गां व्रजन्मनुजोत्तमः ॥ मध्यमं साहसमिदं वैश्यक्षत्रयोः शूद्रस्य गोमगने पूर्व्ववधाभिधानात् मनुजोत्तमस्य ब्राह्मणस्यापि सुवर्णरूपदण्डाभिधानात् । तथा वेश्यागामी द्विजोदण्ड्योवेश्याशुल्कसमं पणं ॥ यद्वेश्यागमने शुल्कं पञ्चाशत्पणरूपं तावानेव वेश्यागामिनोब्राह्मणस्य दण्डः । बहुभिर्भुक्तपूर्व्वा या तां गच्छेद्योनराधमः । तस्य वेश्यावदिच्छन्ति दण्डनं न तु दारवत् ॥ दारवत्कुलस्त्रीवत् । नारदः अगम्यागामिनः शास्तिर्दण्डोराज्ञा प्रकीर्त्तितः । प्रायश्चित्तविधानन्तु पापराशेर्विशोधनं ॥ यत्तु राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । निर्म्मलाः स्वर्गमायान्ति सन्तः सुकृतिनोयथा ॥ इति तत्प्रायश्चित्तरूपदण्डपरं प्रकरणात् । अतएव कल्पतरौ सुवर्णस्तेये मुषलाघातप्रकरण एव तल्लिखितमिति ॥

अथ स्त्रीपुरुषधर्म्मः ॥ तत्र याज्ञवल्क्यः रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः ॥ विन्नां विवाहितां तेषां पुत्राणां । बृहस्पतिः अप्रयच्छन्पिता काले पतिश्चानुपयन्नृतौ । पुत्रश्चाभक्ष्यदो मातुर्गर्ह्यो दण्ड्यश्च धर्म्मतः ॥ नैता रूपं प्रतीक्षन्ते नासां वयसि संस्थितिः । अरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ साशङ्का बालभावे तु यौवनेऽभिमुखी भवेत् ॥ तृणवन्मन्यते नारी वृद्धभावे स्वकं पतिं ॥ स्वकामे वर्त्तमाना सा स्नेहे नारी निवारिता । अपथ्या तु भवेत्पश्चाद्यथा व्याधिरुपेक्षितः ॥ तथा शय्यासनमलङ्कारं कामं क्रोधमनार्ज्जवं । द्रोहभावं कुचर्य्यां च स्त्रीभ्यो मनुरकल्पयत् ॥ एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्ग्गजं । परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति ॥ मनुः पिताचार्य्यः सुहृन्माता भार्य्या पुत्रः पुरोहितः । नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्म्मे न तिष्ठति ॥ कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः । तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा ॥ कार्षापणं ताम्रकर्षं स्वदण्डश्च राज्ञाप्सु प्रक्षेपणीयः । ईशो दण्डस्य वरुणइति गोतमवचनात् । मनुः ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति । अपह्नवे तु द्विगुणं तन्मोरनुशासनं ॥ ऋणइति शते अपलप्य करणेन ऋणमभ्युपगच्छन् पणशतात् पञ्चपणान् । करणेप्यपलपन् प्रमाणेन ऋणस्थैर्य्ये दशपणान्दण्ड्यइत्यर्थः । साह्यधिकारे मनुः लोभात्सहस्रं दण्ड्यस्तु मोहात्पूर्व्वन्तु साहसं । भयाद्वे मध्यमं दण्ड्यो मैत्र्या

त्पूर्वं चतुर्गुणं ॥ कामाद्दशगुणं पूर्वं क्रोधात्तु द्विगुणं परं । अज्ञा
नाद्द्वे शते पूर्णे बालिश्याच्छतमेव च ॥ एतानाहुः कूट
साक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः । धर्मस्य व्यभिचारार्थमधर्म्म
नियमाय च ॥ कौटसाक्ष्यन्तु कुर्व्वाणांस्त्रीन्वर्णान्धार्म्मिको
नृपः । प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत् ॥ लोभा
न्मिथ्यानिगदे पणसहस्रं मोहान्निगदे सार्द्धपणशतद्वयं
भयान्निगदे पञ्चपणशतानि मैत्रान्निगदे पणसहस्रं कामात्त
त्स्त्रीरमणादीच्छारूपात्तन्निगदे सार्द्धपणसहस्रद्वयं क्रो
धात्तन्निगदे पणसहस्रद्वयं अज्ञानात्तन्निगदे पणशतद्वयं
बालिश्यादनवधानरूपात्तन्निगदे पणशतं कूटसाक्षी दण्ड्य इ
त्यर्थः कौटसाक्ष्यमिति असकृत्कूटं निगदतां क्षत्रादीनां
त्रयाणामपि साक्षिणां यथोक्तदण्डानन्तरं देशान्निष्कासनं
तादृशस्यादण्ड्यस्य तु समग्रधनसहितस्यैव ब्राह्मणस्य देशा
न्निःसारणमात्रमित्यर्थः । मनुः पणानां द्वे शते सार्द्धे प्रथमः
साहसः स्मृतः । मध्यमः पञ्च विज्ञेयः सहस्रं त्वेव चोत्तमः ॥
तथा ताम्रिकः कार्षिकः पणः । तथा अवहार्य्योभवेच्चैव स्वा
न्वयः षट्शतं दमं । निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकि
ल्बिषं ॥ अनेन विधिना शास्यः कुर्व्वन्नस्वामिविक्रयं । अज्ञानाज्ज्ञा
नपूर्वन्तु चौरवद्दण्डमर्हति ॥ अवहार्य्योदाप्यः स्वान्वयःस्वामिवं
श्यः निरन्वयस्तदन्यः अनपसरः अपसरति द्रव्यमस्मातोऽन्यत्र या
ति येन तत्प्रतिग्रहक्रियादि तद्रहितः चौरकिल्बिषं चौरवद्दण्डं ।
अनेनेत्यादि स्वान्वयस्यापि ज्ञानपूर्वकं आढ्यधनविक्रये चौर

वहदण्डइत्यर्थः । तथा धर्म्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनं । पश्चाच्च न तथा तत्स्यान्न देयं तस्य तद्भवेत् ॥ यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः । राज्ञा दाप्यः सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः ॥ पश्चादिति याचकस्य धर्म्मकर्म्माणि नाकरोत् धनञ्च गृहीतं तदा परावर्त्त्य दाप्यः यदि च प्रतिश्रुतं तद्याचते तदा न देयं यदि तु गृह्णीयात्तदा सुवर्णं दण्ड्यइत्यर्थः ॥

अथ दायविभागः ॥ तत्र मुख्यकालमाह मनुः ऊर्द्ध पितुश्च मातुश्च समेत्य भ्रातरः समं । भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥ समं तुल्यं न तु विंशोद्धारादिना यावत् । न च प्रमीतपितृविभागमुपक्रम्यैव मनुना विंशोद्धारादिकथनात्कथं तुल्यांशतेति वाच्यं तस्य गुणवज्ज्येष्ठपरत्वात् विंशोद्धाराकाङ्क्षिज्येष्ठपरत्वाद्वा । ननु यद्धनं पितुः स्वातन्त्र्यविषयस्तत्तत्काले तद्विच्छयैव विभागइति । तद्विभागः पितुरूर्द्धमित्यस्तु मातुरूर्द्धमिति कथं मातुस्तत्रास्वत्वात् न च विभागमुपक्रम्य अस्वतन्त्राः पितृमन्तोमातुरप्येवमवस्थिताया इति शङ्खवचनादस्त्वेवमिति वाच्यं अस्य गुणवन्मातृस्तुतिपरत्वात् न हि अस्वामिनोऽप्यपेक्षा युक्तिमतीति चेन्नैवं पैतृकमित्यत्रैकशेषेण मातृधनस्याप्युपस्थितेः मातृधनएव तदूर्द्धगमनापेक्षायाश्चौचित्यात् । अथ पितर्य्यूर्द्ध गते पुत्राविभजेयुर्द्धनं पितुः । मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयाः ॥ इति नारदवचनेन मातृधने दुहितॄणां तदभावे दौहित्राणामे

व ग्रहणाधिकारबोधनान्न पुत्रस्य ग्रहणाधिकारइति चेन्न अस्यान्ययोगव्यवच्छेदाभावात्। अतएव जनन्यां संस्थितायाञ्च समं सर्व्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः॥ इति मनुरपि समुच्चयमेवाह एवञ्च पितुः स्वात्मविषयधनं पितरि प्रमीते विभजनीयं सति तु तस्मिन्न्वणीयं। तदुक्तं शङ्खेन नाकामे पितरि रिक्थभागोवृद्धे विपरीतचेतसि रोगिणि वेति॥ विपरीतचेतसि विप्लुतान्तःकरणे धर्मे तु तस्मिन् जीवति च तदिच्छयैव विभजनीयमिति वक्ष्यते। अथ वा मृते पितरि ज्येष्ठं पुरस्कृत्य वसेयुस्तदाह मनुः ज्येष्ठएव तु गृह्णीयात्पित्र्यं धनमशेषतः। शेषास्तमुपजीवेयुर्यथैव पितरं तथा॥ योवाशक्तस्तं पुरस्कुर्य्युस्तदाह नारदः बिभृयाद्वेच्छतः सर्व्वान् ज्येष्ठोभ्राता यथा पिता। भ्राता शक्तः कनिष्ठोवा शक्त्यपेक्षा कुले स्थितिः॥ धर्म्मार्थं वा विभजेरंस्तदाह मनुः एवं सह वसेयुर्वा पृथग्वा धर्म्मकाम्यया। पृथग्विवर्द्धते धर्म्मस्तस्माद्धर्म्या पृथक्क्रिया॥ कथं विभागे धर्म्मवृद्धिस्तत्रवृहस्पतिः एकपाकेन वसतां पितृदेवद्विजार्च्चनं। एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे॥ असाधारणीभूतेन विभक्तेन धनेन भ्रात्रन्तरनैरपेक्ष्येण स्वमाचेच्छयेष्टाद्यनुष्ठानेन विभागे धर्म्मवृद्धिः॥

अथ जीवत्पितृकविभागः तत्र पुत्रान् विभजेरन्नित्यधिकारे नारदः मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते रमणे चापि पितर्य्युपरतस्पृहे॥ प्रत्तासु विवाहितासु

रमणे पितृरतिसामर्थ्ये उपरतस्पृहे विषयस्पृहाशून्ये। याज्ञवल्क्यः विभागञ्चेत्पिता कुर्य्यात्स्वेच्छया विभजेत्सुतान्। ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः॥ इयञ्च स्वेच्छा स्वार्ज्जिते। तदाह विष्णुः पिता चेत्पुत्रान्विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे॥ स्वयमुपात्तं स्वार्ज्जितमित्यर्थः। तद्वत्स्वाभ्युद्धृतमपीति मनुवचनानुरोधात् तत्र पितृद्रव्यानुपश्लेषस्तन्त्रं तदुपश्लेषार्जितस्य तु तद्वत्साधारण्यमेव। तथा च पित्रा पूर्व्वपुरुषद्रव्यानुपश्लेषेण यदर्जितं तस्य समविभागे विषमविभागे चाविभागे पितैव प्रभुः सएव विभागस्तदिच्छाबलादेव अनीशताप्यत्रैव पुत्राणां। तदाह मनुः पैतृकन्तु पिता द्रव्यमनवाप्तं यदाप्नुयात्। न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्ज्जितं॥ पितृद्रव्यमपि परग्रस्तं यत्पित्राभ्युद्धृतं यच्च स्वयमर्ज्जितं तदुभयत्र पितुरिच्छयैव पुत्राणां भागो न त्वनिच्छयेत्यर्थः। तथा पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्ज्जितं विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः स्मृतं॥ प्रदानं स्वेच्छया कुर्य्याद्भागञ्चैव ततोधनात्। तदभावे तु तनयाः समांशाः परिकीर्त्तिताः॥ हृतं परैरपहृतं पितामहेन चाशक्त्या नोद्धृतं पित्रा तदुद्धृतं यच्च पित्रा विद्याद्यर्ज्जितं तस्य विभागे दाने च पितुरेव इच्छा तन्त्रं। एवञ्च विद्याप्राप्ते तथा प्राचीनधनानुपश्लेषेण शौर्य्येण प्रकारान्तरेण वार्ज्जिते तथा तदनुपश्लेषेणाभ्युद्धृते च धने पितुरिच्छयैव दानविभागादिरिति। एवंविधएव धने ज्येष्ठायाधिकदाने स्वभागाधिककरणे च पितु

रिच्छा । एवंविधद्रव्यएव याज्ञवल्क्योक्तासमांशितापि । विभा
गञ्चेत्पिता कुर्य्यात्स्वेच्छया विभजेत्सुतान् । ज्येष्ठं वा श्रेष्ठभागे
न सर्व्वे वा स्युः समांशिनः ॥ इति वचनस्य पितृस्वातन्त्र्यविष
यमेव धनमधिकृत्य प्रवृत्तत्वात् । अत्रैव समांशकरणपक्षे विशेष
माह सएव यदि कुर्य्यात्समानंशान्पत्न्यः कार्य्याः समांशिकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥ अत्रोपक्रमे
पितुर्विभागकर्तृत्वेनोपस्थितत्वात् तत्प्रतियोगिकमेव पत्नीत्व
मवगम्यते समांशिकाइति याभ्यः स्त्रीधनं दत्तं तत्समधनवत्यो
ऽन्या अपि पत्न्यः पित्रा कार्य्याः यदा तु स्वयमधिकं गृह्णाति पु
त्रेभ्यः किञ्चिद्ददाति तदा स्वभागादेव तावद्धनं पत्न्या ताभ्योदेयं ।
अतएव यदि कुर्य्यात्समानंशानिति समांशकरणपक्षएव पृथ
ग्दानमुक्तं । हारीतः स्वल्पेन वा संविभज्य भूयिष्ठमादाय
वसेद्यद्युपदश्येत्पुनस्तेभ्योगृह्णीयात् ॥ उपदश्येन्निर्द्धनोभवेदित्य
र्थः इदमपि स्वार्ज्जितपरं । द्वावंशौ प्रतिपद्येत विभजन्नात्म
नः पिता ॥ शङ्खलिखितौ स यद्येकपुत्रः स्याद्द्वावंशावात्मनः
कुर्य्याद्द्विपदचतुष्पदेषु रूपमधिकं वृषभोज्येष्ठाय गृहं यवीय
सेऽन्यत्र पितुरवस्थानात् ॥ रूपं वस्तु तथा च पितामहद्वयं
दासेषु श्रेष्ठमेकं एवं पशुष्वपि गृह्णीयात् एकोवृषः सगुणज्ये
ष्ठाय पितृस्थानातिरिक्तञ्च गृहं सगुणकनिष्ठाय देयं । इ
दञ्च पितुरंशद्वयमेकपुत्रत्वे वचनयोरेकमूलत्वकल्पनालाघवात्
पितुरस्वार्ज्जितधनविषयमेतत् स्वार्ज्जिते तु स्वेच्छया विभज
नीयएकपुत्रत्वस्याप्रयोजकत्वात् एकपदश्चेदं ज्येष्ठवाचि न तु

मङ्कावाचीति अन्यथा ज्येष्ठाय यवीयस इति विरुध्यते तस्मा त्सगुणज्येष्ठकनिष्ठावुक्तोद्धारभाजो कार्य्यौ अन्ये पुत्राधनेषु स मांशाः पिता तु सोद्धारद्व्यंशभागिति सङ्क्षेपः। आपस्तम्बः एकधनेन ज्येष्ठं तोषयित्वा जीवत्पुत्रेभ्योविभजेत्समं ॥ जीवत्य दान्मृतस्य पत्न्याभागोनास्ति तत्पुत्रस्य तु सोऽस्ति आत्मा वै पुत्रइत्यभिधानात् वाक्यान्तराच्च । जीवन्निति तु रत्नाकरे पाठः सच न युक्तः विभागकर्तृतयैव जीवनस्य प्राप्तत्वेन निर र्थकत्वात् एकधनेन श्रेष्ठधनेन । ज्येष्ठे देवलः वह्निर्वर्षेषु चा रिव्याद्यमजे पूर्वजन्मतः । यस्य जातस्य यमयोः पश्यन्ति प्र थमं मुखं ॥ सन्तानः पितरश्चैव तस्मिन् ज्येष्ठं प्रतिष्ठितं ॥ यस्य सवर्णाजातस्य मुखं प्रथमं पश्यन्ति तस्मिन्सन्तानः प्रतिष्ठितः । पितरः प्रतिष्ठिताः ज्येष्ठञ्च प्रतिष्ठितमित्यर्थः तेन पितुः प्रथमापत्यं पुमान् ज्येष्ठः पतिसवर्णायान्तु पश्चादुत्प न्नोऽपि ज्येष्ठः । तदुक्तं मनुना सदृशस्त्रीषुजातानां पुत्राणामवि शेषतः । न मातृतोज्यैष्ठ्यमस्ति जन्मतोज्यैष्ठ्यमुच्यते ॥ तेन नाना वर्णासु भार्य्यासु पतिसवर्णायां पश्चाज्जातोज्येष्ठइत्यर्थः । तथा योज्येष्ठोविनिकुर्व्वीत लोभाद्भ्रातॄन् यवीयसः । सोज्येष्ठः स्या दभागश्च नियन्तव्यश्च राजभिः ॥ मनुः ज्येष्ठस्य विंशउद्धारः सर्व्वद्रव्याच्च यद्वरं । ततोर्द्धं मध्यमस्य स्यात्तुरीयन्तु यवीय सः ॥ तथा सर्व्वेषां धनजातानामाददीताग्र्यमग्रजः । यच्चसा तिशयं किञ्चिद्दशतस्याप्नुयाद्वरं ॥ बोधायनः दशानाञ्चैकमु द्धरेज्ज्येष्ठः सममितरे विभजेरन् ॥ पितृरिक्थहराः पुत्राः

सर्व्व एव समांशिनः । विद्याकर्म्मयुतस्तेषामधिकं लब्धुमर्हति ॥ अयन्तु ज्येष्ठस्य गुणवत्तरत्वे विंशांशः गुणवत्त्वे तु किञ्चित्पारितोषिकं नातिरिक्तमिति वर्त्तुलार्थः । देवलः ज्येष्ठस्य दशमं भागं न्यायवृत्तस्य दापयेत् ॥ एतच्च ज्येष्ठस्याग्निवेदवत्त्वे अन्येषाञ्च निर्गुणत्वे इति हलायुधपारिजातौ । वृहस्पतिः समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः । तथैव ते पालनीयाः पतितास्ते स्युरन्यथा ॥ इदं पित्रर्जितपरं । मनुः भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्सह । न तत्र विषमं भागं पिता दद्यात्कथञ्चन ॥ इदं तुल्यव्यापारैर्भ्रातृभिरर्जिते अतो न विरोधः । वृहस्पतिः जन्मविद्यागुणज्येष्ठो द्व्यंशं दायादवाप्नुयात् । समांशभागिनस्त्वन्ये तेषां पितृसमस्तु सः ॥ इदं गुणवत्त्वमपि पितृवत्पालकज्येष्ठविषयं । तथा पितृरिक्थहराः पुत्राः सर्व्व एव समांशतः । विद्याकर्म्मयुतस्तेषामधिकं लब्धुमर्हति ॥ व्यासः साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधं । धनं शौर्य्यादिना प्राप्तं भ्रातरस्तच भागिनः ॥ तस्य भागद्वयं ज्ञेयं शेषास्तु समभागिनः ॥ शौर्य्यादिनाऽसाधारणोपायेनापि चेत्साधारणधनोपक्षेपेणार्ज्जयति तदार्ज्जको द्व्यंशभागित्यर्थः । वशिष्ठः येन चैषां स्वयमुपार्ज्जितं स द्व्यंशमाहरेत् ॥ इदमपि पूर्ववत् । याज्ञवल्क्यः सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः । अनेकपितृकाणान्तु पितृतो भागकल्पना ॥ सामान्येति सामान्यस्यार्थस्य कोऽपि भागी यदि कृषिवाणिज्यादिना वर्द्धनं करोति तदाऽपि तस्य

नांशाधिक्यमित्यर्थः इदन्त्वन्येषामप्येवंरूपत्वे अन्यथा वशिष्ठ विरोधः स्यादिति द्रष्टव्यं। अनेकेति यदि त्वविभक्तानामेव भ्रातॄणां प्रमीतानां प्रत्येकं बहवः पुत्राः कृष्यादिना साधारणधनं कुर्व्वन्ति तदा ते पितृवन्न प्रत्येकं भागभाजः किन्त्वेकजाः सर्व्वेपि स्वपितृमात्रभागभाज इत्यर्थः। नारदः कुटुम्बार्थेषु चोद्युक्तस्तत्कार्य्यं कुरुते तु यः। स भ्रातृभिर्बृहणीयो ग्रासाच्छादनवाहनैः॥ यः कृषिवाणिज्यादिना कुटुम्बार्थे व्यापृतस्तदाऽर्थं संवर्द्धयति स भाग्यन्तरसमभागं लभते स्वतस्तस्य ग्रासानुसारेणान्नवस्त्रादिना भागिभिर्वैलक्षण्येन पूरणं कर्त्तव्यमित्यर्थः। मनुः भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा। स निर्भाज्यः स्वकादंशात्किञ्चिद्दत्त्वोपजीवनं॥ यः स्वकर्म्मणा स्वव्यवसायेन जीवितुं शक्तः साधारणं धनं विभज्य न गृह्णीयात् किन्तु त्यजेत् स भ्रातृभिर्न्यूनहीनभागैः स्वस्वभागाद्धनमाकृष्य पूरणीय इत्यर्थः। पूर्व्वनारदवाक्यस्याप्ययमेवार्थ इति हलायुधः। प्रकाशकारस्तु येन भागिषु धनार्थं व्यापृतेषु आलस्यादिना न व्याप्रियते स व्यापारजनिताद्धनाद्बहिः कार्य्योमूलधनमात्रभागी कर्त्तव्य इत्यर्थकतया मनुवाक्यमिदं व्याख्यातवान्। कात्यायनः अविभक्तेऽनुजे प्रेते तत्सुतं रिक्थभागिनं। कुर्व्वीत जीवनं येन लब्धं नैव पितामहात्॥ लभेतांशं स पित्र्यं तु पितृव्यात्तस्य वा सुतात्। स एवांशस्तु सर्व्वेषां भ्रातॄणां न्यायतोभवेत्॥ लभेत तत्सुतोवापि निवृत्तिः परतोभवेत्॥ अनुजे भ्रातरि तत्सुतं भ्रातृजं जीवनं भागः कीदृशं भागं भ्रातृजो लभते इत्यपेक्षाया

माह पित्र्यमंशमिति तत्सुतः यस्य धनं विभज्यते तस्य प्रपौत्रः तथा च वृद्धिशोधनं पुत्रसङ्ख्यया विभजनीयं तेन पुत्रस्य योभागः स तेन तत्पुत्रैर्वा पौत्रैर्वा ग्राह्यः निवृत्तिरिति न तु तत्प्रपौत्रैरित्यर्थः इदं सहवासपरं। एवं च प्रमीतस्य पत्नी न भागभाक् अनभिधानात्। देवलः अविभक्तविभक्तानां कुल्यानां वसतां सह। भूयोदायविभागः स्यादाचतुर्थादिति स्थितिः॥ बीजिचतुर्थमभिव्याप्य दायभागः विभक्तानामपि संसर्ग्यादौ सह वासे सतोयं व्यवस्था वसतां सहेति स्वरसात्। वशिष्ठः अथ भ्रातृणां दायभागोयास्त्वानपत्याः स्त्रियस्तासां चापुत्रलाभात्॥ स्त्रिय इत्यत्रापि भ्रातृणामित्यन्वयः। तथा च विधवायाः शङ्कितपुत्रायाभ्रातृभार्य्यायाभागः कर्त्तव्यः तस्याः प्रसवे जाते स भागस्तत्पुत्रस्य पुत्रे त्वनुत्पन्ने सति स भागस्तस्याः देवरादिभिरेव ग्राह्य इत्यर्थः। पितुरित्यनुवृत्तौ वृहस्पतिः तदभावे तु जननी तनयांशसमांशिनी। समांशामातरस्तेषां तुरीयांशाश्च कन्यकाः॥ तदभावे पितुरभावे जननी पुत्रवती मातरः सपत्नीमातरोऽपुत्राः एताः सर्व्वाः पुत्रतुल्यभागा इत्यर्थ। एषां भागिनां भगिन्यश्चाविवाहिताविवाहार्थं भ्रात्रंशतुरीयांशभाज इत्यर्थः। नारदः येषां तु न कृताः पित्रा संस्कारविधयः क्रमात्। कर्त्तव्याभ्रातृभिस्तेषां पैतृकादेव तद्धनात्॥ अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः। अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः॥ संस्कारा उपनयनान्ताः। व्यासः अपुत्रास्तु पितुः पत्न्यः समांशाः प्रकीर्त्तिताः। पितामह्यश्च सर्व्वा स्वामातृतुल्याः प्रकीर्त्तिताः॥

याज्ञवल्क्यः पितुरूर्द्ध्वं विभजतां मातांश्यं समं लभेत् ॥ कात्यायनः प्रच्छादितन्तु यद्येन पुनरागत्य तत्समं । भजेरन् भ्रातृभिः सार्द्धमभावेऽपि हि तत्सुताः ॥ अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत् । पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुः ॥ येन्तं साधारणं त्यक्त्वा योऽन्यदेशं समाश्रितः । तद्वंशस्यागतस्यांशः प्रदातव्यो न संशयः ॥ तृतीयः पञ्चमो वापि सप्तमस्यापि यो भवेत् । जन्मनामपरिज्ञाने लभेतांशं क्रमागतं ॥ इदन्तु देशान्तरागतविषयं । यम्परम्परया मौलाः सामन्ताः स्वामिनं विदुः । तदन्वयस्यागतस्य दातव्या गोत्रजैर्मही ॥

अथ भागानर्हाः ॥ तत्र बृहस्पतिः सवर्णाश्चाप्यगुणवान्नार्हाः स्युः पैतृके धने । तत्पिण्डाः श्रोत्रिया ये धनन्तेषां विधीयते ॥ मनुः सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनं ॥ विकर्मस्था विरुद्धकर्मासक्ताः । शङ्खः अप्रायश्चितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते ॥ अप्रायश्चितः अत्युत्कटेन दोषेण ज्ञातिभिः कृतघटापवर्जनः पितृरिक्थग्रहणश्राद्धतर्पणेषु नाधिकारी भवतीत्यर्थः । मनुः अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा । उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥ सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिभिः । ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ॥ यद्यर्थिता तु दारैः स्यात् क्लीवादीनां कथञ्चन । तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति ॥ निरिन्द्रियाः पाणिपादादिरहिताः श्रौतस्मार्त्तक्रियानधिकारिणो दायानर्हा इति वर्त्तुलार्थः । तत्पुत्रादिस्तु पतितोत्पादितवर्ज्जं तदर्हः । याज्ञवल्क्यः

पतितस्तत्सुतः क्लीवः पङ्गुरुन्मत्तको जडः। अन्धोऽचिकित्स्यरोगा
र्त्ता भर्त्तव्यास्तु निरंशकाः ॥ अचिकित्स्यकुष्ठादिमन्तो दायानर्हाः
औरसः क्षेत्रजश्चैषां निर्दोषाभागहारिणः। सुताश्चैषां प्रभर्त्त
व्या यावन्नो भर्तृसात्कृताः ॥ पतितौरसाः पूर्वोत्पन्ना एव अन्यौ
रसा उत्तरजा अपि सुताः पुत्र्यः भर्तृसात्कृताः परिणीताः
क्लीवादेः पत्नीः मत्याह अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्त
यः। निर्व्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥ एषां क्लीवा
दीनां प्रतिकूला विषादिप्रदाः। नारदः पितृद्विट् पतितः
षण्डो यश्च स्यादौपपातिकः। औरसा अपि नैतेंऽशं लभेरन्
क्षेत्रजाः कुतः॥ पितृद्विट् पितरि जीवति तत्ताडनादिकृत् मृते
तच्छ्राद्धादिविमुखः। दीर्घतीव्रामयग्रस्ताजडोन्मत्तान्धपङ्गवः।
भर्त्तव्याः स्युः कुलस्यैते तत्पुत्रास्त्वंशभागिनः॥ दीर्घ यक्ष्मादि
तीव्रं कुष्ठादि जडो निर्विवेकः। देवलः मृते पितरि न क्लीव
कुष्ठ्युन्मत्तजडान्धकाः। पतितः पतितापत्यं लिङ्गी दायांशभा
गिनः॥ तेषां पतितवर्ज्जानां भक्तवस्त्रं प्रदीयते। तत्पुत्राः पि
तृदायांशं लभेरन्दोषवर्ज्जिताः॥ मृतद्रत्युपलक्षणं लिङ्गी
अतिशयेन कपटव्रतधारी दोषो भागानर्हताप्रयोजकः। वशिष्ठः
अनंशास्त्वाश्रमान्तरगताः॥ आश्रमान्तरं गार्हस्थात्। कात्याय
नः अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते। प्रव्रज्यावसितश्चैव
न रिक्थं तेषु कर्हिचित्॥ सवर्णाप्रक्रमेण विवाहः शास्त्रीयः
तदतिक्रमोढाया अपि सगोत्रायाः पुत्रः तथा प्रव्रज्यां गृही
त्वा ततो भ्रष्टः एते भागानर्हा इत्यर्थः तत्राद्ये विशेषमाह स

एव अक्रमोढासुतस्तृक्थी सवर्णश्च यदा पितुः ॥ अक्रमोढासुतः पितुः सवर्णो भागभागित्यर्थः तदयं सङ्क्षेपः विरुद्धकर्म्मासक्तः उत्कटदोषेणापप्रायश्चित्तः पतितः क्लीवः तथा अप्रतिक्रियं आन्ध्यं बाधिर्य्यमौन्मत्त्यं जडत्वं मूकत्वं पाणिपादादिहीनत्वं वा येषां ते तथा कुष्ठादिमान् पितृद्विट् राजयक्ष्मी अतिशयेन कपट व्रतधारी आश्रमान्तरगतश्च एते भागानर्हाः एतेषां पुत्राः पतितजनितवर्ज्जं भागानर्हत्वप्रयोजकदोषरहिताः सन्तो भागभाजएव ॥

अथासंस्कृतसंस्कारः ॥ तत्र व्यासः असंस्कृतास्तु ये तत्र पैतृकादेव तद्धनात् । संस्कार्य्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च तथा विधाः ॥ नारदः अविद्यमाने पित्रर्थे स्वांशादुद्धृत्य वा पुनः । अवश्यकार्य्याः संस्काराः भ्रातृभिः पूर्वसंस्कृतैः ॥ याज्ञवल्क्यः असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैः । भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं ॥ मनुः स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् । स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः । स्वेभ्योभ्रातृभ्यस्तेन कन्याभ्यस्तत्सजातीयभ्रातृभागाच्चतुर्थभागमाकृष्य भ्रातरोदद्युरित्यर्थः । अत्र चतुर्थभागदानमविवक्षितं किन्तु यावता संस्कारोनिर्व्वहति तावद्देयं । अनूढानान्तु कन्यानां स्ववित्तानुरूपेण संस्कारं कुर्य्यादिति विष्णुवचनात् । रत्नाकरादयोप्येवं ॥

अथ विभाज्यं ॥ तत्र कात्यायनः पैतामहञ्च पित्र्यञ्च यत्किञ्चित्स्वयमर्ज्जितं । दायादानां विभागे तु सर्व्वमेतद्विभ

ज्यते ॥ स्वयमर्ज्जितं पितृद्रव्योपश्लेषेण । नारदः यच्छिष्टं पितृदायेभ्योदत्त्वर्णं पैतृकं ततः । भ्रातृभिस्तद्विभक्तव्यमृणी न स्याद्यथा पिता ॥ पितृदायः पित्रा दातुमङ्गीकृतः एवञ्च पित्र्यं यत्तत्परिशोध्य पश्चाच्छेषं वण्टनीयमित्यर्थः ॥

अथाविभाज्यं ॥ तत्र मनुः विद्याधनन्तु यद्यस्य तत्तस्यैव धनं भवेत् । मैत्रमौद्वाहिकञ्चैव माधुपर्क्किकमेव च ॥ मैत्रं मित्रत्वपुरस्कारेण यल्लब्धं औद्वाहिकं वक्ष्यते माधुपर्क्किकं मधुपर्ककाले पूज्यतया लब्धं अर्हणादि । मनुविष्णू अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्ज्जितं । स्वयमीहितलब्धञ्च नाकामो दातुमर्हति ॥ श्रमः सेवादिः ईहितं कृष्यादि उपलक्षणञ्चैतत् साधारणधनानुपश्लेषेणार्ज्जितमर्ज्जकस्यासाधारणं भवतीत्यर्थः । व्यासः पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकं । तस्य तन्नापहर्त्तव्यं मात्रा दत्तञ्च यद्भवेत् ॥ तथा अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनं । दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ अनुपश्लेषार्ज्जितञ्च विद्यार्ज्जितञ्च द्वयमप्यविभाज्यमित्यर्थः विद्ययापि साधारणधनानुपश्लेषेण यदर्ज्जितं तदेवाविभाज्यमिति प्रकाशकारः । तन्न उभयोपादानानर्थक्यापत्तेः । रत्नाकरादयोऽप्येवं । मनुः वैद्योऽवैद्याय नाकामो दद्यादंशं स्वतोधनात् । पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदाहृतं ॥ इति नारदवचनेनापि पितृद्रव्योपश्लेषेण विद्ययाप्यर्ज्जितं विभाज्यमेवेत्यवसीयते इति चेत्सत्यं किन्तु यत्र विद्यार्ज्जनेऽपि धनार्ज्जनवत्साधारणोपश्लेषस्तद्विषयं अतएव तदनुपश्लेषेण विद्यार्ज्जने सति धनार्ज्जने

साधरणानुपक्षेपोपक्षेपावपुरस्कृत्यैवाविभाज्यमाह कात्यायनः
परभक्तप्रदानेन प्राप्तविद्यो यदान्यतः । तया लब्धधनं यत्तु
विद्याप्राप्तं तदुच्यते ॥ अन्यतः स्वदायादभिन्नात् । तदुक्तमनेनैव
कुले विनीतविद्यानां भ्रातृभिः पितृतस्तथा । शौर्य्यप्राप्तं तु यद्वित्तं
तद्विभाज्यं बृहस्पतिः ॥ विद्यात्र शस्त्रशास्त्रयोः तेन पित्रादितः
स्वदायादात् शास्त्रं शस्त्रं वाधीत्य तेन यदर्ज्जयति तत्र भ्रातृन्त
राणामपि भाग इत्यर्थः । उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकं ।
विद्याधनन्तु तद्विद्याद्विभागे न विभज्यते ॥ शिष्यादार्त्विज्यतः
प्रश्नात्सन्दिग्धप्रश्ननिर्णयात् । स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्य
यनाच्च यत् । विद्याधनन्तु तत्प्राहुर्विभागे न विभज्यते ॥ शिल्पि
ष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत् । विद्याप्रतिज्ञया लब्धमे
तद्विद्याधनं भृगुः ॥ आर्त्विज्यतः वरणाभरणादितः प्रश्नात्स्वक
नात् कृतप्रश्नस्य च निर्णयात् शास्त्रार्थसन्देहे स्वज्ञानशंसनात्
प्राध्यापनाद्दक्षविद्यत्वात् शिल्पार्ज्जितमपि विद्यार्ज्जितवत् अल्प
मूल्येनैव यद्गुरु द्रव्यं विक्रेत्रा क्रेतरि पुरुषेऽविद्ययादत्तं तत्रा
प्यधिकभागः क्रेतुरसाधारणः । अहमेवैनां विद्यां वेद्मीत्यादि
विद्याप्रतिज्ञा । कात्यायनः नाविद्यानान्तु वैद्येन देयं विद्या
धनं क्वचित् । समविद्याधिकानान्तु देयं वैद्येन तद्धनं ॥ अत्र सम
विद्यत्वमधिकविद्यत्वं वा न दानप्रयोजकं वाक्यस्यादृष्टार्थत्वाप
त्तेः किन्तु तदर्ज्जितमिश्रणं । कात्यायनः कुटुम्बं बिभृयाद्भ्रातुर्यो
विद्यामधिगच्छतः । भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि स
न् ॥ तदर्थं यद्भूपः परपिण्डोपजीवनेन परतोऽधीतेन शास्त्रेण

शस्त्रेण वा विद्योपादानकाले दायादैरपेक्ष्यमाणकुटुम्बकेन साधारणं धनमाश्रित्यापि यद्धनमर्ज्जितं तद्विद्यार्ज्जितमविभाज्यं ॥ यादृशशौर्य्यधनमविभाज्यं तदाह स एव आरुह्य संशयं यत्र प्रसभं कर्म्म कुर्व्वते। तस्मिन् कर्म्मणि तुष्टेन प्रसादः स्वामिना कृतः ॥ तत्र लब्धञ्च यत्किञ्चिद्धनं शौर्य्येण तद्भवेत्। ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तद्भवेत् ॥ सङ्ग्रामादाहृतं यत्तु विजित्य द्विषतां बलं। स्वाम्यर्थे जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते ॥ यादृशमौद्वाहिकमसाधारणं तदाह स एव यल्लब्धं लाभकाले तु स्वजात्या कन्यया सह। कन्यागतन्तु तद्वित्तमेतद्वृत्तिकरम्परं ॥ वैवाहिकन्तु तद्विद्याद्भार्य्यया यत्सहागतं। धनमेवंविधं सर्व्वं विज्ञेयं धर्म्मसाधकं ॥

अथ भागकल्पना ॥ तत्र मनुः अविद्यानान्तु सर्व्वेषामीहातश्चेद्धनं भवेत्। समस्तत्र विभागः स्यादपित्र्य इति धारणा ॥ ईहा कृष्यादिः समोऽविषमः तेन विंशोद्धारादिरपि नात्रास्ति। स्वयमर्ज्जितमित्यनुवृत्तौ गौतमः अविद्याः समं विभजेरन् ॥ वशिष्ठः येन चैषां स्वयमुत्पादितं स्यात्स द्व्यंशमाहरेत्॥ यदा बहूनां भ्रातॄणां मध्ये साधारणधनमाश्रित्य एक एव कृष्यादिनार्ज्जयति तदा तस्य द्वावंशौ शेषाणामेकैकः। अतः साधारणं समाश्रित्य यत्किञ्चिदाहनायुधं। शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः॥ तस्य भागद्वयं देयं शेषास्तु समभागिनः॥ आदिपदस्य प्रकारवाचितया बहुव्रीहेश्चास्य तद्गुणसंविज्ञान

तथा च असाधारणोपायविद्यापरिग्रहः । नन्वसाधारणधनाश्रयणेनापि विद्याशौर्य्यादिना यदर्ज्जितं तदविभाज्यमिति प्रागुक्तं अनेन विरुध्येतेति चेन्न तस्य कात्यायनपरिभाषितविद्याशौर्य्यादिपरत्वात् अस्य तु तदितरप्रकारकविद्योपष्टम्भमात्रपरत्वात् ॥

अथ स्त्रीधनविभागे प्रस्तोतव्ये प्रथमं तावत् स्त्रीधनलक्षणमेवोच्यते ॥ तत्र पञ्चतु मनुकात्यायनौ अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतितः स्त्रियै । मातृभ्रातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं ॥ षड्विधमिति न्यूनव्यवच्छेदपरं । तत्र त्रिविधे कात्यायनः विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ । तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितं ॥ दीयते येन केनापि सङ्कोचकाभावात् तथा यत्पुनर्लभते नारी नीयमाना हि पैतृकात् । अध्यावाहनिकं नाम स्त्रीधनं समुदाहृतं ॥ द्विरागमन काले यत्कृतोऽप्यवाप्तं तदध्यावाहनिकमित्यर्थः । तथा प्रीत्या दत्तन्तु यत्किञ्चित् श्वश्वा वा श्वशुरेण वा । पादवन्दनिकं यत्तु लावण्यार्ज्जितमुच्यते ॥ लावण्यं शीलनैपुण्यादि तथा च पादप्रणतायै शीलादिमत्यै वा स्त्रियै श्वशुरादिना दत्तं तृतीयं स्त्रीधनमित्यर्थः । मात्रादिदत्तन्तु त्रयं व्यक्तमेव । आधिवेदनिकं सप्तमं तदाह याज्ञवल्क्यः अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं । न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं ॥ द्वितीयेन भर्त्तुर्विवाहेन प्रथमभार्य्या अधिविन्ना भवति तस्यै पत्याऽधिवेदनकाले यद्दत्तं तदाधिवेदनिकं ॥ विष्णुः पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकं शुल्कमन्वा

धेयकमिति स्त्रीधनलक्षणं ॥ तत्राद्यानि षडुक्तानि । शुल्के कात्याचनः गृहोपस्करवाह्यानां दोह्याभरणकर्म्मिणां । मूल्यं लब्धञ्च यत्किञ्चिच्छुल्कं तत्परिकीर्त्तितं ॥ गृहोपस्करादिकरणेनाधिना स्त्रिया गृहपतितो यल्लब्धं तच्छुल्कमित्यर्थः । तथा विवाहात्परतो यत्तु लब्धं भर्त्तृकुलात् स्त्रिया । अन्वाधेयन्तु तत्प्रोक्तं यल्लब्धं स्वकुलात्तथा ॥ एवं स्त्रीधनानि भवन्ति एतदेव स्त्रीणां सौदायिकं तथा च कात्यायनः ऊढया कन्यया वापि पत्युः पितृगृहे तथा । भ्रातुश्च काशात्पित्रोर्वा लब्धं सौदायिकं भवेत्॥ पत्युरित्यत्रापि गृहइति सम्बन्धः । सार्द्धमित्यपपाठः भ्रातुरित्युपलक्षणं तेन कन्यया वा ऊढया वा पितृतो वा तत्कुलतो वा पतिकुलतो वा यल्लब्धं तत्सर्व्वं तस्याः सौदायिकमित्यर्थः । वक्ष्यमाणवृत्त्यादिकमप्येतत्पक्षः । तद्विनियोगमाह सएव सौदायिकं धनंप्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते । यस्मात्तदानृशंस्यार्थं तैर्द्दत्तं तत्प्रजीवनं ॥ सौदायिके सदा स्त्रीणां स्वातन्त्र्यंपरिकीर्त्तितं । विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥ पतिकुलदत्तस्थावरेष्वपि स्त्रिया दानादौ स्वातन्त्र्यमित्यर्थः । सौदायिके आपस्तम्बः अलङ्कारोभार्य्यायाः ज्ञातिधनञ्चेत्येके ॥ भार्य्यायाः स्वमिति शेषः ज्ञातिधनं विवाहादौ ज्ञातिलब्धं पितृकुलात्पतिकुलाद्वा । अलङ्कारे मनुर्विष्णू पत्यौ जीवति यः कश्चिदलङ्कारो धृतोभवेत् । न तम्भजेरन्दायादाः भजमानाः पतन्ति ते ॥ पत्युरदत्तोऽपि तदनुज्ञया परिहितोऽलङ्कारस्तावतैव भार्य्यायाः स्त्रीधनंभवतीति मेधातिथिः । तस्मिंस्तु स्थावरे जङ्गमे च पतिकुले

लब्धे दानविक्रययोः स्त्रीणां स्वातन्त्र्यं पूर्वलिखितकात्यायनवचनस्वरसात्। नारदः भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृतेऽपि तत्। सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते॥ एवञ्च भर्तृदत्ते जङ्गमे परं स्त्रिया दानादौ स्वातन्त्र्यं न तु स्थावरेऽपीति। एवञ्च सौदायिके व्यवस्था सिद्धा। कात्यायनः भर्तृदायंमृते पत्यौ विन्यसेत् स्त्री यथेष्टतः। विद्यमाने तु संरक्षेत्क्षपयेत्तत्कुलेऽन्यथा॥ अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणात्क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः॥ भर्तृदायो भर्तृधनं तच्च तस्मिन्नसति ग्राहकान्तराभावात् स्त्रीस्वत्वास्पदीभूतं तस्मिन्सति तदनुज्ञया स्त्रीस्वत्वास्पदीभूतञ्च। तत्रादौ आह भर्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतइति। इदन्तु स्थावरेतरपरं। स्थावरे त्वाह भुञ्जीतामरणात्क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुरिति॥ क्षान्ता अनतिव्ययिनी अपुत्रेत्यादि तदधिकारप्रयोजकविशेषणं। द्वितीये त्वाह विद्यमाने तु संरक्षेदिति सति पत्यौ तद्धनं रक्षेदित्यर्थः। अन्यथेति पतिधनाभावपक्षे विधवा पतिकुल एव कालं नयेदित्यर्थः। एवञ्च मृतस्य पत्युः स्थावरे भार्य्यासङ्क्रान्तेऽपि न तस्यादानादौ स्वातन्त्र्यं आकाङ्क्षातौल्यात् अन्यथा तत्र कीदृशी व्यवस्था इत्याकाङ्क्षाऽपूर्णैव तिष्ठेत्। अत एवास्य वचनस्य सौदायिकप्रकरणस्थानविरोधोऽप्यपास्तः प्रकरणापेक्षया आकाङ्क्षाया बलवत्त्वात् यथा पतिदत्ते स्थावरे वचनाद्दानादौ स्त्रीणामनधिकारस्तथा पत्युः स्थावरेऽपि स्त्रीसङ्क्रान्ते। एवमेव प्रकाशरत्नाकरौ। एवं पुत्रद्वारा स्त्रीसङ्क्रान्ते

पित्र्यावरे अन्वाध्याकाङ्क्षात्वात्साक्षाद्वचनस्य चाश्रुतेः । प्रकृते तु देवलः वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं लभेत् । भोक्त्री तत्स्वयमेवेदं पतिर्नार्हत्यनापदि ॥ वृत्तिर्वृत्त्यर्थं दत्तं धनं आभरणमलङ्कारः शुल्कं विवाहार्थितया कन्यायै दत्तं लाभो बन्धुभ्यो लब्धं एतत्सर्वं स्त्रीधनं । तथा वृथादाने च भोगे च स्त्रियै दद्यात्सवृद्धिकं । पुत्रार्त्तिहरणे चापि स्त्रीधनं भोक्तुमर्हति ॥ स्त्रीणामननुमत्या तद्धनस्य वृथादानभोगौ न कार्यौ पुत्रप्रतीकारार्थं कार्यावेवेत्यर्थः । तदनुमत्या त्वनापद्यपि तद्ग्राह्यमित्याह स एव तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकं मूल्यमेव स दाप्यः स्याद्यदा स धनवान् भवेत् ॥ व्याधितं व्यसनस्थञ्च धनिकैश्चोपपीडितं । ज्ञात्वा निसृष्टं यत्प्रीत्या दद्यात्स्वेच्छया हि सः ॥ व्याध्यादिग्रस्तस्य स्यादिकं दृष्ट्वा स्त्रिया यत्स्वधनं प्रयुक्तं तत्स्वेच्छया प्रत्यादिद्यादित्यर्थः । याज्ञवल्क्यः दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके गृहीतं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति ॥ सम्प्रतिरोधक इति व्याधिविशेषणं कार्यानुष्ठानबाधकइति तदर्थः । तथावश्यकधर्मानुष्ठानस्य प्रकारान्तरेण कर्त्तुमशक्तस्य निर्वाहार्थं पत्या यद्भार्यायाः स्त्रीधनं गृहीतं तन्न देयमित्यर्थः । अस्यापवादमाह कात्यायनः अथ चेत्स द्विभार्यः स्यान्न च तां भजते पुनः । प्रीत्या निसृष्टमपि चेत्प्रतिदाप्यः स तद्बलात् ॥ ग्रासाच्छादनवासानामाच्छेदो यत्र च योषितः । तत्र स्वमाददीत स्त्री विभागं रिक्थिनां तथा ॥ लिखितश्चेति धर्मोऽयं प्राप्ते भर्तृकुले वसेत् । व्याधिता प्रेतकाले तु गच्छेद्बन्धुजनं ततः ॥ अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका ।

व्यभिचारवती या च स्त्रीधनं न च सार्हति ॥ भर्त्रा प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैः । तिष्ठेद्भर्तृकुले या तु न सा पितृकुले वसेत् ॥ भजतइत्यादि यदि कृतावपि पतिस्तां न भजते यदि वा ग्रासाच्छादनानि न ददाति तदा तस्मै व्याध्यादिनिस्तारार्थमपि स्त्रिया दत्तं स्वधनं बलादपि ग्राह्यमित्यर्थः प्राप्तइत्यादि तस्मिन्धने प्राप्तेऽपि सा भर्तृकुलएव वसेत् न तु पितृकुलं यायादित्यर्थः। अपकारेत्यादि एतादृश्याः स्त्रीधनमप्याच्छिद्य बान्धवैर्ग्राह्यमित्यर्थः। भर्त्रेति सुगमं ॥

अथ स्त्रीधनविभागः ॥ तत्र मनुः जनन्यांसं स्थितायान्तु समं सर्व्वे सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः ॥ यास्तासां स्युर्दुहितरस्तासामपि यथांशतः । मातामह्याधनात्किञ्चित्प्रदेयं प्रीतिपूर्वकं ॥ सममविषमांशं सनाभयः सहोदराः भगिन्यः कुमार्य्यएव समांशास्तदाह बृहस्पतिः स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी । अप्रत्ता चेत्समूढा तु लभते मानमात्रकं ॥ अपत्यानां पुत्राणां तदंशिनीति विशेषाश्रुत्या समत्वलाभः समूढा विवाहिता मानमात्रकं द्रव्यानुसारेण किञ्चित् । गौतमः स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च ॥ अप्रतिष्ठिता अनपत्या निर्धनभर्तृका दुर्भगाचेति रत्नाकरादयः एताअपुत्रा अपि पुत्रवन्मातृधनभाजः। मनुः मातुश्च यौतुकं यत्स्यात्कुमारीभागएव सः ॥ यौतुकं विवाहकाले पित्रादितोलब्धं। वशिष्ठः मातुः पारिणाय्यं स्त्रियो विभजेरन् ॥ पारिणाय्यं परिच्छेदादर्शकङ्कतिकादि । याज्ञवल्क्यः मातुर्दुहितरः शेषमृणात्ताभ्यऋतेऽन्वयः ॥

मातुर्धनं तद्दणाच्छेषं तद्दणशोधनावशेषं दुहितरोभजेरन् ताभ्य
ऋते दुहितॄणामभावेऽन्वयः दौहित्रीदौहित्रौ मनुवचनानुरो
धात्। ब्राह्म्यादिवैवाहिकं परिच्छदादिकञ्च यन्मातुर्धनं तद्वि
षयमेतत्। कात्यायनः दुहितॄणामभावे तु ऋक्थम्पुत्रेषु तद्भवे
त्। बन्धुदत्तन्तु बन्धूनामभावे भर्तृगामि तत्॥ भगिन्योबान्ध
वैः सार्द्धं विभजेयुः सभर्तृकाः। स्त्रीधनस्येति धर्मोयं विभाग
स्तु प्रकीर्त्तितः॥ दुहितॄणामिति पारिणाय्यं विवाहकाले यौतुक
लब्धं पितृदत्तञ्च यन्मातुर्धनं तत्तस्याः पुत्र्यभावे पुत्रगामि भव
तीत्यर्थः तदतिरिक्तन्तु स्त्रीधनं तस्याअभावे पुत्रीपुत्रोभयगामि
इत्युक्तमेव प्राक् बन्धूदत्तमिति पित्रतिरिक्तेन दत्तं यत्तद्भ्रातृभ
गिन्योः किन्तु कन्या तत्समांशा निवाहिता तु किञ्चिद्भागभागि
नीति भगिन्यइत्यादेरर्थः अभावे पुत्रीपुत्राद्यभावे स्त्रियाधनं
प्रतिगामीत्यर्थः। मनुः ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनं।
अतीतायामप्रजायां भर्तुरेव तदिष्यते ॥ यत्त्वस्याः स्याद्धनं कि
ञ्चिद्विवाहेष्वासुरादिषु। अतीतायामप्रजायां मातापित्रो
स्तदिष्यते॥ अप्रजायामनपत्यायां। गौतमः भगिनीशुल्कं सोद
र्य्याणामूर्द्ध्वं मातुः पूर्वं चेत्येके ॥ आसुरादिविवाहत्रयलब्धविष
यमेतत्। बौधायनः ऋक्थं मृतायाः कन्यायागृह्णीयुः सोदराः
स्वयं। तदभावे भवेन्मातुस्तदभावे भवेत्पितुः ॥

अथ गुप्तप्राप्तविभागः॥ तत्र याज्ञवल्क्यः अन्योन्यापहृतं द्रव्यं
विभक्ते यच्च दृश्यते। तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥
अत्राविभक्तत्वादेव विभागे प्राप्ते वचनारम्भोऽत्र चौर्य्यदोषाभा

वं ज्ञापयतीति हलायुधः। कात्यायनः अन्योन्यापहृतं द्रव्यं दुर्विभक्तञ्च यद्भवेत्। पश्चात्प्राप्तञ्च विभजेत्समभागेन तद्भृगुः ॥ बन्धूनामविभक्तानां भोगं नैव प्रदापयेत् ॥ समभागेन पूर्वोक्तसमभागेन भोगं गुप्तसाधारणधनभोगं भोक्ता न दाप्य इत्यर्थः ॥

अथ वर्णसमवायविभागः ॥ तत्र मनुः चतुरोऽंशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः। वैश्यापुत्रो हरेदंशमेकमंशं शूद्रासुतो हरेत् ॥ भारते अष्टधा तु धनं कार्यं क्षत्रियस्य युधिष्ठिर। क्षत्रियाया हरेत्पुत्रश्चतुरोंऽशान्पितुर्धनात् ॥ युद्धाभिचारिकं यच्च पितुरासीद्धरेच्च तत्। वैश्यापुत्रस्तु भागांस्त्रीन् शूद्रापुत्रस्तथाष्टमं ॥ तथा पञ्चधा तु धनं कार्यं वैश्यस्य भरतर्षभ। वैश्यापुत्रेण हर्त्तव्याश्चत्वारोंऽशाः पितुर्धनात् ॥ पञ्चमस्तु भवेद्भागः शूद्रापुत्रस्य भारत ॥ ब्राह्मणस्य चतुर्भार्य्यत्वे क्षत्रियस्य त्रिभार्य्यत्वे वैश्यस्य द्विभार्य्यत्वे इयं व्यवस्था। यदि तु नैवं तदा या भार्य्या नाभूत्तत्पुत्रोचितो भागो दशसु अष्टसु पञ्चसु न कर्त्तव्यः। युद्धाभिचारिकं अश्वखड्गादि। तथाह विष्णुः अथ चेच्छूद्रापुत्रवर्ज्जं ब्राह्मणस्य पुत्रास्तदा नवधा धनं विभजेयुः क्षत्रियादावप्येवं ॥ बृहस्पतिः न प्रतिग्रहभूर्देया क्षत्रियायाः सुताय वै। यद्यप्यस्य पिता दद्यात्मृते विप्रासुतो हरेत् ॥ वृद्धमनुः ब्रह्मदायागतां भूमिं हरेयुर्ब्राह्मणीसुताः। गृहं द्विजातयः सर्व्वे तथा चैनं क्रमागतं ॥ ब्रह्मदायागतां याजनाध्यापनप्रतिग्रहलब्धां द्विजातयस्त्रैवर्णिकाः। शङ्खः शूद्रापुत्रोऽभागी यदेवास्य पिता दद्यात्तदेव भागस्तस्य गोमिथुनं चापरं दद्यात् कृष्णायसं कृष्णधान्यं तिलवर्ज्जं ॥

मनुः यद्यपि स्यात्सपुत्रोवा यद्यपुत्रोऽपि वा भवेत् । नाधिकं दश
माद्दद्याच्छूद्रापुत्राय धर्मतः ॥ ब्राह्मणक्षत्रियविशां शूद्रापुत्रोन
रिक्थभाक् । यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत् ॥ सपुत्रो
विद्यमानत्रैवर्णिकरूपपुत्रः अपुत्रस्तद्रहितः न रिक्थभाक् पित्रनु
ग्रहेऽपि न दशमांशातिरिक्तरिक्थभागिति कल्पतरुः । अत्यन्त
सगुणऊढशूद्रापुत्रोऽपि न रिक्थभागिति पारिजातः । बृहस्प
तिः अनपत्यस्य शुश्रूषुर्गुणवान् शूद्रयोनिजः । लभेताजीवनं
शेषं सपिण्डाः समवाप्नुयुः ॥ अनपत्यस्य पितुस्त्रैवर्णिकपुत्रशून्य
स्य सपिण्डाः सन्निहितास्तदभावे व्यवहिताअपि इदञ्चानूढाशू
द्रापुत्रपरं अपरिगृहीतस्त्रीत्यधिकारात् । मनुः दास्यां वा दा
सदास्यां वा यः शूद्रस्य सुतोभवेत् । सोनुज्ञातोहरेदंशमिति
धर्मोव्यवस्थितः ॥ याज्ञवल्क्यः जातोऽपि दास्यां शूद्रेण काम
तोंशहरोभवेत् । मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिनं ॥
शूद्रस्यानूढशूद्रापुत्रः पितुरिच्छया भागं लभते तदसत्वे तुऊ
ढापुत्रस्य वैमात्रेयस्य भागापेक्षयाऽर्द्धभागभागित्यर्थः । तथा
अभ्रातृकोहरेत्सर्व्वं दुहितॄणां सुताहते ॥ शूद्रस्योढापुत्रदौहि
त्रयोरभावे सकलमेव धनमनूढापुत्रोहरेदित्यर्थः । गोतमः
शूद्रापुत्रवत्प्रतिलोमासु ॥ शूद्रादिना वैश्यादिजातिषु स्त्री
षु जनितः शूद्रापुत्रवज्जीविकामूल्यं हलकुद्दालादि किञ्चिल्लभ
तइत्यर्थः ॥

अथ विभक्तजविभागः ॥ स च विभक्तजो द्विविधः विभागका

ले गर्भस्थस्तदनन्तरञ्च जातः तथाच याज्ञवल्क्यः विभक्तेषु सुतो जातः सवर्णाया विभागभाक् । दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् ॥ विभागभाग्विभागार्हो भवतीत्यर्थः दृश्या देति दृश्यमानाद्दृश्यादृश्योभयरूपाद्वा आयेन उत्तरोपचयेन व्ययेन उत्तरापचयेन विशोधितात् तेन व्ययितशेषादुद्धीष्यवृद्धिसहितात् प्रागप्राप्तधनात्तु भागं लभतइत्यर्थः । विकल्पश्चायं सगुणनिर्गुणविषयइति हलायुधः । विष्णुः पितृविभक्ताःपुत्राः विभागानन्तरोत्पन्नस्य भागं दद्युः ॥ अस्यापि पूर्ववदर्थः । द्वितीये मनुः ऊर्द्धं विभागाज्जातस्तु पित्र्यमेव धनं हरेत् । संसृष्टास्तेन वा येस्युर्विभजेत सतैः सह ॥ यथा भ्रातृभागङ्गर्भस्थः प्राप्नोति तथा नायं प्राप्नोतीत्येवकारेण द्योत्यते किन्तु पितृधनमेव लभते अत्रापि विशेषो यदि जीवत्येव पितरि तद्भागाद्ग्रहीतुमिच्छति पितापि च भागाकाङ्क्षेव तदा पितृभागे पितुर्विभक्तजस्य चांशौ कार्य्यौ पितरि प्रमीते तु तद्भागः समग्रो विभक्तजस्यैव पिता चेत्तु भ्राता स्वपुत्रैर्व्वा सह संसृष्टीभूतः प्रमीतस्तदा विभक्तजः पितुरंशं तेभ्यो लभतइति वाक्यार्थः । वृहस्पतिः पित्रा सह विभक्ता ये सापत्ना वा सहोदराः । जघन्यजाश्च ये तेषां पितृभागहरास्तु ते ॥ अनीशः पूर्ब्बजः पित्र्ये भ्रातृभागे विभक्तजः ॥ जघन्यजाइति विभक्तजाबहवोऽपि पितृभागं लभन्तइत्यर्थः पूर्ब्बजइति विभक्तः सन्नित्यर्थः । तथा पुत्रैःसह विभक्तेन पित्रा यत्स्वयमर्ज्जितं । विभक्तजस्य तत्सर्व्वमनीशाः पूर्ब्बजाः स्मृताः ॥ यथा धने तथार्णेऽपि दानाधानक्रयेषु च । परस्परमनीशास्ते मुक्ताशौचोदकक्रि

र्थाः ॥ तदयं सङ्क्षेपः विभागसमये गर्भस्थस्य विभागानन्तरमु त्पन्नस्य विभक्तैर्व्विभागिभिः स्वस्वभागेभ्यआकृष्य भागपूरणं कर्त्तव्यं तदन्यस्य तु विभक्तजस्य पितृधनभागितेति मन्वादिमत मिति स्थितमिति ॥

अथ पुत्राः ॥ तत्र यमः पुत्रास्तु द्वादश प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः । तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥ स्वयमुत्पादितस्त्वेको द्वितीयः क्षेत्रजः स्मृतः । तृतीयः पुत्रिकापुत्र इति धर्म्मविदो विदुः ॥ पौनर्भवश्चतुर्थश्च कानीनश्चैव पञ्चमः । गृहे च गूढउत्पन्नः षडेते पिण्डदाः स्मृताः ॥ अपविद्धः सहोढश्च दत्तः कृत्रिमएव च । पञ्चमः क्रीतकः पुत्रो यश्चोपनयते स्वयं ॥ इत्येते सङ्करोत्पन्नाः षडदायादबान्धवाः ॥ नारदः औरसः क्षेत्रजश्चैवं पुत्रिकापुत्रएव च । कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥ पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा । स्वयञ्चोपगतः पुत्रा द्वादशैते प्रकीर्त्तिताः ॥ तेषां षड्बन्धुदायादाः षडदायादबान्धवाः । पूर्वः पूर्वः स्मृतो ज्येष्ठो जघन्यो यो यउत्तरः ॥ क्रमादेते प्रवर्त्तन्ते मृते पितरि तद्धने ज्यायसो ज्यायसोऽभावे जघन्यो यो यआप्नुयात् ॥ पूर्वपूर्वाभावे उत्तरोत्तरेषां द्रविणार्हत्वमित्यर्थः । मनुः पुत्रान्द्वादश यानाह नृणां स्वायम्भुवो मनुः । तेषां षड्बन्धुदायादाः षडदायादबान्धवाः ॥ औरसः क्षेत्रजश्चैव दत्तः कृत्रिमएव च । गूढोत्पन्नोऽपविद्धश्च दायादाबान्धवाश्च षट् ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयन्दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ बौधायनः

औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ। गूढजं चापविद्धञ्च रिक्थभाजं प्रचक्षते॥ कानीनञ्च सहोढञ्च क्रीतं पौनर्भवन्तथा। स्वयन्दत्तं निषादञ्च गोत्रभाजं प्रचक्षते॥ औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नापविद्धसहोढपौनर्भवदत्तकस्वयमुपागतक्षत्तकक्रीतकानभिधाय देवलः एते द्वादश पुत्रास्तु सन्तत्यर्थमुदाहृताः। आत्मजाः परजाश्चैव लब्धा याद्दृच्छिकास्तथा॥ तेषां षडबन्धुदायादाः पूर्वेऽन्ये पितुरेव षट्। विशेषश्चापि पुत्राणामानुपूर्व्या विशिष्यते॥ सर्व्वेषमौरसा ह्येते पुत्रा दायहराः स्मृताः। औरसे पुनरुत्पन्ने तेषु ज्यैष्ठं न विद्यते॥ तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः। हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः॥ औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढदत्तकक्रीतस्वयमुपागतापविद्धयत्रक्वचनोत्पादितानभिधाय विष्णुः एषां पूर्वः पूर्वः श्रेयान्स एव दायहरः सचान्यान्बिभृयात्॥ औरसः प्रथमः क्षेत्रजो द्वितीयः पुत्रिकापुत्रस्तृतीयः पौनर्भवश्चतुर्थः कानीनः पञ्चमः गूढोत्पन्नः षष्ठः सहोढः सप्तमः दत्तोऽष्टमः क्रीतो नवमः स्वयमुपागतो दशमः अपविद्ध एकादशः पारशवो द्वादशः। कृत्रिमो द्वादशः पारशवस्थादशद्रुत्यन्ये। विवादे विष्णुरप्येवं। औरसक्षेत्रजपुत्रिकापुत्रगूढोत्पन्नकानीनपौनर्भवदत्तक्रीतकृत्रिमस्वयमुपागतसहोढापविद्धाः पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः॥ याज्ञवल्क्यः औरसो धर्म्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्नउत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो

मातामहस्ततोमतः॥ अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृ
तः। दद्यान्माता पिता वा यं सपुत्रोदत्तकोभवेत्। क्रीतश्चताभ्यां
विक्रीतः कृत्रिमः स्यात्स्वयंकृतः। दत्तात्मा तु स्वयं दत्तोग
र्भविन्नः सहोढजः॥ उत्सृष्टोगृह्यते यस्तु सोऽपविद्धोभवेत्सुतः॥
पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः॥ धर्मपत्नी दृष्टप
रिणीतसवर्णा तस्यां स्वयमुत्पादितः परिणीतसवर्णायां स्वयमु
त्पादितश्चौरसइति तल्लक्षणात्। द्वितीयः पुत्रिकापुत्रः। तृती
यः क्षेत्रजः स च क्षेत्रिणः पुत्रेच्छायां क्षेत्रिणः बीजिनस्तदिच्छा
यां बीजिनः उभयोस्तदिच्छायामुभयोयः। गूढोत्पन्नश्चतुर्थः स
च मातृजातीयउद्वोढु सुतः। कानीनः पञ्चमः स च मातामह
स्यापुत्रत्वे मातामहस्य मातृवोढुरपुत्रत्वे तस्य सुतः। पौनर्भवः
षष्ठः स च पुनर्वोढः सुतः। दत्तक सप्तमः स च गृहीतुः सुतः।
क्रीतोऽष्टमः स च मात्रा पित्रा वा धनमादाय दत्तोऽपुत्रत्वेन स्वी
कृतः क्रेतुः पुत्रः। स्वयंकृतोनवमः स चापुत्रत्वेन पुत्रीयता पुत्रस्य
जनकामः प्रेम्णसम्प्रतिपत्तिभ्यां कृतस्तथाकर्तुः पुत्रः। स्वयंदत्तोद
शमः स च मातापितृहीनः क्रोधादिना त्यक्तोवा यस्मिन् स्वेच्छ
या पुत्रत्वेनात्मानमर्पयति तस्य पुत्रः। सहोढएकादशः स च ग
र्भिणी यापरिणीयते तस्यामुत्पन्नोवोढुः सुतः। अपविद्धोद्वा
दशः स च मातापितृभ्यां तयोरन्यतरेण वा दारिद्र्यादिना त्य
क्तोयेन पुत्रत्वेन धृतस्तस्य पुत्रः। बृहस्पतिः एकएवौरसः पुत्रोध
नस्वामी प्रकीर्त्तितः। तत्तुल्या पुत्रिका प्रोक्ता भर्त्तव्यास्तपरे
सुताः॥ मनुः एकएवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। शेषाणा

शानृशंस्यार्थं प्रदद्यात्तु प्रजीवनं ॥ आनृशंस्यं दया प्रजीवनं भर्णं । प्रथमस्तु पुत्रिकापुत्रः पश्चाज्जाते औरसे तत्समांशभाक् । तदाह स एव पुत्रिकायां कृतायान्तु यदि पुत्रोऽनुजायते । समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः ॥ कात्यायनः उत्पन्ने त्वौरसे पुत्रे तृतीयांशहराः स्मृताः । सवर्णा असवर्णास्तु ग्रासाच्छादनभागिनः ॥ इदं तृतीयांशहरत्वं क्षेत्रजस्य । समस्तधनभोक्ता स्यादौरसोऽपि जघन्यजः । त्रिभागं क्षेत्रजोभुङ्क्ते चतुर्थं पुत्रिकासुतः ॥ इति ब्रह्मपुराणैकमूलत्वात् अत्युत्कृष्टगुणदत्तकविषयमित्यन्ये । पुत्रं प्रकृत्य वशिष्ठः तस्मिंश्चेत्प्रतिगृहीते औरसउत्पद्यते स चतुर्थभागभागी स्याद्यदि नाभ्युदयिकेषु प्रयुक्तः स्यात् ॥ तस्मिन्पुत्रे सति प्रतिगृहीतुः पुत्रः यदि स्यात् प्रयुक्तं प्रभूतधनमिति शेषः यदि औरसेन आभ्युदयिकेषु यज्ञेषु प्रयुक्त न स्यात् । अत्र मन्वादिभिः सर्वैरेव पुत्रान्तरसत्वेऽपि औरसस्यैव सकलपितृधनहारकत्वमुक्तं तैरेव च तेषामपि तत्तांशभागित्वमुक्तं अयञ्च विरोधः औरसस्य सगुणत्वे तेनैव सकलस्वत्वं ग्राह्यं तस्य निर्गुणत्वेऽन्येषां च सगुणत्वे यथोक्तभागेन ग्राह्यमिति समाधेयः । एवं दत्तकस्यैव क्षेत्रजस्यैव वा न्यूनाधिकांशग्रहणमपि नानामुन्युक्तं तस्यैवैकस्य सगुणत्वनिर्गुणत्वाभ्यां समाधेयं । यत्तु आह्नेऽपि क्रमेणाधिकारबोधकयोर्विष्णुयाज्ञवल्क्ययोर्विरोधः सोऽपि सगुणत्वनिर्गुणत्वाभ्यां विकल्पेन वा समाधेयइति । एकमातृकयोर्भिन्नपितृकयोस्तु विभागे विष्णुः अनेकपितृकाणान्तु पितृतोभागकल्पना । यस्य यत्पैतृकं रिक्थं स तद्गृह्णीत नेतरः । अदु

श्चास्तु सर्व्वं एव श्राद्धचिन्तामणौ प्रपञ्चिताः नेह वितन्यन्ते । शा स्त्रोक्तरीतिं विना ये पुत्रास्ते पुत्राभासत्वान्न रिक्थभाजइति ॥

अथापुत्रधनग्रहणाधिकारः ॥ तत्रविष्णुः अनपत्यस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे मातृगामि तदभा वे पितृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगामि तद भावे बन्धुगामि तदभावे सकुल्यगामि तदभावे सहाध्यायिगा मि तदभावे ब्राह्मणधनवर्ज्जं राजगामीति ॥ बन्धुश्च सपिण्डः सकुल्यः सगोत्रः । बृहन्मनुः सपिण्डता तु पुरुषे सप्तमे विनिवर्त्त ते । समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात् ॥ जन्मनामस्मृतेरे के तत्परं गोत्रमुच्यते । अनपत्यस्य पुत्रपौत्रप्रपौत्रहीनस्य पुत्रः पौत्रः प्रपौत्रो वा इत्यादिना अमीषां पाठक्रमेणैव स्वधाधिकारे सिद्धे तत्समानशीलस्य रिक्थग्रहणस्यापि तथैवाधिकारसिद्धेः ॥

एवञ्च प्रपौत्राभावे पत्न्यधिकारः । अत्रैव वृद्धमनुः अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता । पत्न्येव दद्यात्तत्पिण्डं कृत्स्न मंशं लभेत सा ॥ बृहस्पतिरपि सकुल्यैर्विद्यमानैस्तु पितृमातृसना भिभिः । अपुत्रस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥ पूर्वप्रमीता ग्निहोत्रं मृते भर्त्तरि तद्धनं । विन्देत्पतिव्रता नारी धर्म्मएष स नातनः ॥ जङ्गमं स्थावरं हेम कुप्यं धान्यं रसाम्बरं । आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकं ॥ पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान् । पूजयेत्कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः ॥ तत्सपिण्डाबान्धवाये तस्याः स्युः परिपंथिनः । हिंस्यु र्धनानि तान्राजा चौरदण्डेन शासयेत् ॥ आद्यपरिसङ्ख्यानस्य

रसात् तस्य प्रेतस्य प्रेतश्राद्धानि मास्याब्दिकानि च कुर्य्यात् यव
च्चाखिलं गृह्णीयादिति वर्त्तुलार्थः इदञ्च विभक्तपतिधनपरं ।
पतिव्रता साध्वी नतु पतिव्रतैव अनुमरणपर्य्यन्तेव पतिव्रतात्वनि
श्चया धनग्रहणाभावापत्तेः । तथा च साध्वी भार्य्या पत्युः प्रयो
गपर्य्यन्ताभावे तद्धनार्हा ।

अविभागे तु मनुः । भ्रातृभार्य्याणां स्नुषाणाञ्च न्यायत-
श्चानामनपत्यानां पिण्डमात्रं गुरुर्दद्याज्जीवानि वासांसि वि
ज्ञतानि ॥ हारीतः विधवा यौवनस्था च नारी भवति कर्कशा
आयुषः क्षपणार्थञ्च दातव्यं स्त्रीधनं सदा ॥ संसृष्टिभाव्यापर
मिदमिति बालरूपः । अविभक्तप्रमीते पत्यौ तस्यांश एव नाभूत्
किमियं गृह्णाति नच इयमेवांशप्रतियोगिनी प्रापकाभावात्
नचैतान्येव वाक्यानि प्रापकानि एषां विभक्तधनपरत्वेनाप्युपप
त्तेः । अतएव भ्रातॄणां दायभागीयाश्चानपत्याः स्त्रियस्तासा
माऽपुत्रलाभादिति वशिष्ठसूत्रं । भ्रातृभार्य्यायां विधवायां
सत्याञ्चितगर्भायां तद्देवरादीनां विभागे प्रक्रान्ते तस्या अपि
शङ्कितपुत्रप्रसवायां भागश्चाप्रसवं स्थाप्यः तस्याः पुत्रेऽनुत्पन्ने
देवरादिभिर्ग्राह्य इति रत्नाकरादौ व्याख्यातं । भारते स्त्रीणां
स्वपतिदायस्तु उपभोगफलः स्मृतः । नापहारं स्त्रियः कुर्य्युः पति
वित्तात्कथञ्चन ॥ अपहारमैच्छिकदानविक्रयादि ॥

पत्न्यभावे दुहितृगामि लिखितविष्णुवचनात् । नारदोऽ
पि पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनात् । पुत्रश्च दुहिता चो
भौ पितुः सन्तानकारकौ ॥ मनुरपि यथैवा । त्मा तथा पुत्रः पुत्रे

स्य दुहिता समा । तस्यामात्मनि जीवन्त्यां कथमन्यो धनं हरेत् ॥ बृहस्पतिरपि अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणां । तस्याः पितृधनन्त्वन्यः कथं गृह्णीत मानवः ॥ यादृशी सा पितृरिक्थग्राहिणी तामाह स एव सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता । कृताकृता वाऽपुत्रस्य पितुर्धनहरी तु सा ॥ अपुत्रस्य कुमारी स्वक्थं गृह्णीयात्तदभावे चोढा चेति पराशरवचनात्तथैवात्र क्रमइति वाचस्पतिः नचैतत्सर्व्वं पुत्रिकाविषयं अकृतेति वचनेनाकृताभिसन्धिकृता सा तु कृतैवैतत्परमिति वाच्यं तस्याः पुत्रत्वेऽपि पुत्रसमधनग्रहणाधिकारस्य मनुना विहितत्वादिति ॥

तदभावे मातृगामि विष्णूक्तेः । बृहस्पतिरपि भार्य्यासुतविहीनस्य तनयस्य मृतस्य तु । माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया ॥ तदनुज्ञया मातुरनुज्ञया मातृपदमत्र पितुरप्युपलक्षणं तेन तदनुज्ञया मातापित्रोरनुज्ञयेति पारिजातः । बृहस्पतिः यथा पितृधने स्वाम्यं तस्याः सत्स्वपि बन्धुषु । तथैव तत्सुतोपीष्टे मातृमातामहे धने ॥ मनुः दौहित्रोह्यखिलं रिक्थमपुत्रस्य पितुर्हरेत् । स एव दद्याद्द्वौ पिण्डौ पित्रे मातामहाय च ॥ एतत्तु द्वयं मातापितृद्वयाभावे पत्नीदुहितरइत्यादिक्रमानुरोधात् मनुरपि अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् । मातर्य्यपि च वृत्तायां पितुर्माता हरेद्धनं ॥ दुहितृन्तशून्यस्य धनं माता हरेत सकुल्यान्तशून्यस्य धनं पितामही हरेदित्यर्थः मात्रभावे पित्राद्यधिकारस्य व्यवस्थापितत्वात् ॥

मात्रभावे पितृगामि विष्णुवचनात् । अत्रैव मनुरपि पिता हरेदपुत्रस्य ऋक्थं भ्रातर एव वा ॥

भ्रात्रधिकारोविष्णुवचनादेव । अत्रैव गौतमः प्रेतानां धनं ज्येष्ठभ्रातुरिति ॥

मनुः अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेत् ॥ आपस्तम्बः अपुत्रधनाधिकारी आसन्नसपिण्डस्तदभावे व्यवहितस्तदभावे आचार्यस्तदभावेऽन्तेवासी । याज्ञवल्क्यः पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो गोत्रजो बन्धुः शिष्यस्सब्रह्मचारिणः ॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः । स्वर्यातस्य ह्यपुत्रस्य सर्व्ववर्णेष्वयं विधिः ॥ पितरौ वित्यत्र क्रमाकाङ्क्षायामादौ माता तदभावे पिता विष्णुस्मृत्येकमूलत्वात् तत्सुतो भ्रातृपुत्रः अपुत्रस्य पुत्रपौत्रप्रपौत्रशून्यस्य । कात्यायनः विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत् । भ्राता वा जननी वापि माता वा तत्पितुः क्रमात् ॥ पित्रर्ज्जितं पिता भ्रात्रार्ज्जितं भ्रातादिरिति व्यवस्थितोविकल्पः । पैठीनसिः अपुत्रस्य स्वर्यातस्य भ्रातृगामि धनं तदभावे पितरौ लभेतां ॥ देवलः ततोदायमपुत्रस्य विभजेरन्सहोदराः । तुल्यादुहितरोवापि ध्रियमाणः पितापि वा ॥ सवर्णाभ्रातरोमाता भार्या चेति यथाक्रमं । एषामभावे गृह्णीयुः सकुल्याः सहवासिनः ॥ तुल्याः सहोदराएव सवर्णाभ्रातरोच वैमात्रेयाः । अत्र च देवलोक्तक्रमेण सह विष्णुयाज्ञवल्क्योक्तक्रमयोर्व्विरोधमाशङ्क्य यथाक्रममिति पदं देवलीयं याज्ञवल्क्योक्तक्रमानतिक्रमेणेति हलायुधेन व्याख्यातं । देवल

श्चनलिखनानन्तरं विष्णुयाज्ञवल्क्योक्तवचने लिखितवतः कल्प तरुकृतोऽप्येवमेवाशयः । एतत्तु न मनोरमं न हि लोक क्रममुल्लङ्घ्य परोक्तक्रमोयथाक्रममिति लोकस्यार्थोभवितुम र्हतीति उपस्थितं विहायानुपस्थितपरिग्रहगौरवात् एवमपि पैठीनसिवचनविरोधापरीहाराच्च । तस्मात्पूर्वपुरुषार्ज्जितध ने विष्णुयाज्ञवल्क्योक्तक्रमस्तदन्यधने तु पैठीनस्युक्तक्रमइ ति रत्नाकरः । बौधायनः सपिण्डाभावे सकुल्यः तदभावे आ चार्य्यः अन्तेवासी ऋत्विग्वा हरेत् तदभावे राजा ॥

सगोत्रजाभावे बन्धुः याज्ञवल्क्यवचनात् स च स्वबन्धुः पितृ बन्धुर्मातृबन्धुः । आत्मपितुः स्वसुः पुत्राः आत्ममातुः स्वसुः सु ताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥ पितुः तुः स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञे याः पितृबान्धवाः ॥ मातुः पितुः स्वसुः पुत्रामातुर्मातुः सुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेयामातृबान्धवाः ॥ एतेषां क्रमेणाधिकारः । वाक्यरूपोप्येवं ॥

ब्राह्मणधनवर्ज्जं राज्ञा ग्राह्यं तदाह मनुः अहार्य्यं ब्राह्मण धनं राज्ञा नित्यमिति स्थितिः । इतरेषां तु वर्णानां सर्व्वाभा वे हरेन्नृपः ॥ देवलः सर्व्वथादायकं राजा हरेद्ब्रह्मस्ववर्ज्जितं । अदायकन्तु ब्रह्मस्वं श्रोत्रियेभ्यः प्रदापयेत् ॥ अदायकं दायाद शून्यं । बृहस्पतिः येऽपुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्ज्जि ताः । तेषां धनहरोराजा सर्व्वस्याधिपतिर्हि सः ॥ बौधायनः ब्र ह्मस्वं पुत्रपौत्रघ्नं हन्यादेकाकिनं विषं । तस्माद्राजा ब्राह्मणस्वं ना

ददीत कथञ्चन ॥ शङ्खलिखितौ परिषद्गामि श्रोत्रियद्रव्यं न तु राजगामि ॥ परिषदो ब्राह्मणाः ॥

तदयं सङ्क्षेपः। पुत्त्रस्तदभावे पौत्त्रस्तदभावे प्रपौत्त्रस्तदभावे साध्वी भार्य्या तदभावे दुहिता तदभावे माता तदभावे पिता तदभावे दौहित्त्रस्तदभावे भ्राता तदभावे तत्पुत्त्रस्तदभावे आसन्नसपिण्डस्तदभावे यथाक्रमं व्यवहितसपिण्डस्तदभावे आसन्नसकुल्यस्तदभावे व्यवहितसकुल्यस्तदभावे मातुलादिः सर्व्वाभावे ब्राह्मणधनवर्ज्जं राजगामि ब्राह्मणधने तु ब्राह्मणान्तर एव धनग्रहणाधिकारीति ॥

याज्ञवल्क्यः वानप्रस्थयतिब्रह्मचारिणामृक्थभागिनः। क्रमेणाचार्य्यसच्छिष्यधर्म्मभ्रात्रेकतीर्थिनः ॥ क्रमेण प्रतिलोमक्रमेण तेन ब्रह्मचारिणोगुरुकुलस्थस्याचार्य्यः यतेः सच्छिष्यः वानप्रस्थस्य भ्रातृत्वेनानुमतोऽपरोवानप्रस्थ एव। यद्यपि अनंशाआश्रमान्तरगताइति वानप्रस्थयतिनोर्न पैतामहादिधनसम्भवस्तथापि वानप्रस्थस्य वार्षिकसञ्चयः। यतेस्तु कौपीनाद्येव धनमिति। शङ्खः न हार्य्यं स्त्रीधनं राज्ञा तथा बालधनानि च। नार्य्याः षडागमं वित्तं बालानां पैतृकं धनं ॥ षडागमं अध्यग्नीत्यादि परिभाषितं। मनुः बालदायागतं रिक्थं तावद्राजानुपालयेत्। यावत्स्यात्स समावृत्तोयावच्चातीतशैशवः ॥

अथ संसृष्टधनविभागः॥ तत्र वृहस्पतिः विभक्तोयः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या स तु संसृष्ट उच्यते ॥ अस्माकमेकतमस्यापि स्वं सर्व्वेषामस्माकं स्वमित्यभ्युपगम

स्यावत्संसर्गः स च व्यवहारादीनामनन्यथासिद्धत्वाद्व्यवहाराद वगम्यते तेषां भूतभाविभवद्धनेषु एकैकार्ज्जितेष्वपि सर्व्वेषां स्वत्वानि जनयति । तत्र परिसङ्ख्यानबलात्पितृभ्रातृपितृव्यैरेव विभागपूर्व्वकं धनमेलनं संसर्गइति प्रकाशः । तन्न आवृत्तिवाचिपुनःपदस्वरसेन विभागपूर्व्वकधनमेलनस्यैव लाघवेन संसर्गपदार्थत्वात् तेन विभागप्रतियोगिना पितृव्यपुत्रादिनापि संसर्गोलभ्यते पित्रादिग्रहणन्तु प्रपञ्चनमात्रं अतएवानाख्यायां वाकारइति रत्नाकरादयः । नव्यास्तु पृथग्धनानां धनमेलनमेव संसर्गोलाघवात् न तु प्राग्विभागे सति गौरवात् पृथग्धनत्वन्तु निसर्गतोवा विभागतोवेत्येतत्संसर्गे तु संसृजतोरनुमतिर्म्मूलं सा च निसर्गतः पृथग्धनयोरपि न तु विभागानन्तरमेवेति अन्यथा पित्रा योविभक्तस्तदुत्तरजेन भ्रात्रा समं संसृष्टेन स्याद्वाढमिति चेन्न दृश्यन्ते हि तथा संसृष्टा अपीति बाले तु भागिनि भ्रात्राद्यनुमत्यैव विभागवत्संसर्गोऽपि व्यवहारसत्त्वात् । तथा विभक्ताभ्रातरोये च सप्रीत्यैकत्र संस्थिताः । पुनर्व्विभागकरणे ज्यैष्ठं तेषां न विद्यते ॥ यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथञ्चन । न लुप्यते तस्य भागः सोदरस्य विधीयते ॥ या तस्य भगिनी सा तु ततोऽंशं लब्धुमर्हति । अनपत्यस्य धर्म्मोऽयमभार्य्यापितृकस्य च ॥ संसृष्टानान्तु यः कश्चिद्विद्याशौर्य्यादिना धनं प्राप्नोति तस्य दातव्योह्यंशः शेषाः समांशिनः ॥ एकत्र इति संसृज्येत्यर्थः । ज्यैष्ठमिति अंशाधिक्यप्रयोजकहेतुसत्त्वेऽपि नांशाधिक्यमित्यर्थः । विद्यार्ज्जिते तस्यापवादं स्वयमेव वक्ष्यति कश्चिदि

नि संसृष्टानामेकतमो यदि मरणेनाश्रमान्तरकरणेन वा भागा नर्हो भवति तदापि स भागो न लुप्यते तर्हि स भागः किमीयो भवतीत्याकाङ्क्षायामाह सोदरस्येति संसृष्टिसोदरस्येत्यर्थः। सोदर्य्या विभजेरंस्तं समेत्य सहिताः समं। भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय इति मनुवचनैकमूलत्वकल्पनालाघवात्। तथा च सोदर्य्या अप्यसंसृष्टिनो न लभन्त इति भावः केचित्तु किञ्चिद्धनविभागानन्तरं संसर्गे वृत्ते तत एकस्मिन्संसर्गिणि प्रमीतेऽपि स्थालीपाकन्यायेनाविभक्तेष्वपि धनेष्वंशे यत्तावधारणरूपो विभागो वृत्त एवेति कृत्वा शृङ्गग्राहिकतया तस्यांशः कर्त्तव्यः स तु सोदरसंसृष्टिना ग्राह्यः तत्रैवानपत्यस्येत्यादिपर्य्युदास इत्याहुस्तन्न चोयत्तावधारणं विभागफलं तस्य तत्कालीनजीवितस्यैव सिद्धत्वात् किन्त्विदन्तावधारणं तच्च शृङ्गग्राहिकतया अक्षपातं विना न भवत्येव तस्मात्प्रमीतस्य प्राचीनस्य सर्व्वभागिस्वत्वनिवहस्य विनाशः सङ्कोचो वा प्रादेशिकतत्पुरुषीयस्वत्वान्तरोत्पत्तिर्व्विभागफलं तच्च त्वदक्षपातविषयो न मम मदक्षपातविषयो नवेति भागिनां योऽयमभ्युत्थितोऽभ्युपगमस्तद्रूपाद्विभागात्स च यस्तदक्षपातोपहितस्तदक्षपातश्चा क्रमिकश्चेत्तदा राशिरेव विभक्तः अथ यदि क्रमिकस्तदा पक्वस्थालीपुलाकन्यायः सामग्रीभेदादिति। याज्ञवल्क्योऽपि संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः। दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥ जातस्य जीवत इति हलायुधः। अन्ये तु पितापुत्रयोः संसर्गे पितुश्च विभागानन्तरं पुत्रे जाते पितरि च प्रमीते संसृष्टी पुत्रः पितुरंशं

तस्मै जातकाय दद्यादित्यर्थमाह: संसृष्टिनस्त्विति प्रमीतसंसृष्टि भागे संसृष्टान्तरस्य ग्रहणाधिकार: सोदरासोदरसंसर्गे तु सोदरस्यैवेति वाक्यार्थ:। एवञ्च पितापुत्रयोरपि संसर्गे त्रि भक्तपुत्रान्तरसत्वे च पितुर्भागं संसृष्ट्येव पुत्रः प्राप्नोति नासं सृष्टो संसृष्टिनस्तु संसृष्टीत्यविशेषेणाभिधानात् विभक्तोयः पुन: पित्रेत्यादिना पितापुत्रयोरपि संसर्गकथनात् युक्तञ्चैतत् पुत्रान्तराणां पितृधने स्वत्वस्य विभागेन निराकृतत्वात् संसर्गि पुत्रस्य तु संसर्गेण तस्य जनितत्वादिति। न चानपत्यस्य धर्मायमि ति पर्य्युदासश्रवणान्नैवमिति वाच्यं तस्य न संसर्गान्तरजातविष यत्वात् तथा च संसर्गिण: पितुर्भागं विभागानन्तरजः पुत्राख भन्ते तदसत्वे तु संसृष्टीपुत्रो भ्रात्रादिर्व्वा न त्वसंसृष्टीपुत्र इति व र्त्तुलार्थ:। ऊर्द्धं विभागाज्जातस्तु पित्र्यमेव धनं हरेत्। संसृष्टास्ते न वा येस्तुर्व्विभजेत स तै: सह ॥ इति मनुवचनात् उत्तरार्द्धेन त स्यैव पितृदायहरत्वे सिद्धे तस्यैवाभावे संसृष्टिनोऽधिकारस्य युक्तत्वात् अतएव अनीश: पूर्व्वज: पित्र्ये भ्रातृभागे विभक्तज इत्यपि। नन्वेवं पुत्रै: समं विभज्य भ्रात्रा समं संसृज्यते तत: पुत्र मनुत्पाद्य प्रमीतस्यांश: संसृष्टस्य भ्रातु: स्यात् न त्वसंसृष्टस्य पूर्व्वं विभक्तपुत्रस्येति चेद्वाढं। संसृष्टे सापत्ने सोदरे चासंसृष्टिनि सत्याह याज्ञवल्क्य: अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यधनं हरेत्। असंसृष्यपि चाददीत सोदरो नान्यमातृजः ॥ अन्योदर्य्य: संसृ ष्टी सन् अन्योदर्य्यधनं हरेत् न त्वसंसृष्टी सोदरस्त्वसंसृष्यपि सम् आददीतधनमिति शेष: नान्योदर्य्योधनं हरेदिति पाठस्तु सुग

मः । नान्यमात्मजइत्यनुवादः । एवञ्चान्योदर्य्यस्य संसृष्टित्वं सोदरस्य तु सोदरत्वमेव तद्धरणे वीजमित्युक्तं भवति संसृष्ट्य पि सन् नान्योदर्य्यधनं हरेदिति तु नार्थः संसर्गविरोधात् सकलन्यायमूलाया अप्यस्याः स्मृतेर्व्वेदमूलत्वापत्तेः । नारदः संसृष्टानां तु योभागस्तेषामेव सउच्यते । अतोऽन्यथांशभाजस्तु निर्व्वीजेष्वितरानियात् ॥ तेषामेव संसृष्टानामेव अतोऽन्यथा संसृष्टानामभावे अंशभाजः पुत्रास्य भागदयात् निर्व्वीजेष्वनपत्येषु संसृष्टिषु प्रमीतेषु स भागइतरान् संसृष्टिनइयाद्गच्छेदित्यर्थः । संसर्गकाले योयस्य भागश्रासीत्स पुनर्व्विभागकाले प्रत्यभिज्ञायमानस्तस्यैव रक्षणीयइति पूर्व्वार्द्धस्य नार्थः संसर्गेण समोभावे एतादृशनियमे वाक्यस्यादृष्टार्थतापत्तेः । शङ्खः भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा । विभजेरन्धनं तस्य शेषास्तु स्त्रीधनं विना ॥ भरणं चास्य कुर्व्वीरन् स्त्रीणामाजीवनक्षयात् । रक्षन्ति शय्यां भर्त्तुश्चेदाच्छिन्द्युरितरासु तत् ॥ या तस्य दुहिता तस्याः पित्रंशोभरणे मतः । आसंस्काराद्धरेद्भागं परतोबिभृयात्पतिः ॥ शेषाः संसर्गिणः इतरासु शय्याभरक्षन्तीषु व्यभिचारिणीष्वित्यर्थः । तत् स्त्रीधनं तेन व्यभिचारिणीनां भरणं न कार्य्यं प्रत्युत स्त्रीधनमपि प्रीत्युत्सृष्टं याह्यं दुहिता च कुमारी तस्याभरणं विवाहपर्य्यन्तं पितृधनेन कार्य्यमित्यर्थः । कात्यायनः संसृष्टानान्तु संसृष्टाः पृथक्स्थानां पृथक्स्थिताः । अभावेऽर्थहराज्ञेया निर्व्वीजाऽन्योन्यभागिनः ॥ एकस्याभावे यदपरस्यार्थहरत्वमुक्तं तद्विशिनष्टि निर्व्वीजेति

तौ हि परस्परं निरन्वयापरभागभाजइत्यर्थः । तदयं प्रकर
णार्थसङ्क्षेपः संसृष्टप्रमीतस्य पूर्वभागोत्तरजातपुत्रयोरुभयो
रन्यतमसत्त्वे स एव तद्भागभाक् तदसत्त्वे तु सकलब्रह्मचर्य्या
दिविशेषणसम्पन्नाष्टविधमैथुननिवृत्ता भार्य्या अन्या त्वव्यभिचा
रिणी भरणीया न लंशहरा तत्कन्यायास्तु विवाहनिष्पत्तिप
र्य्यन्तं कर्म्म भरणञ्च पितृधनेन कार्य्यं पितुरपि साधुभार्य्यावज्ज
रणसाच्चं एतेषामसत्त्वे तु प्रमीतिकसंसृष्टिधनं अपरः संसृष्टी स
कलमेव लभते । सोदरासोदरसंसर्गे सोदरएव संसर्गी लभ
ते । असोदरमात्रसंसर्गे तु सोदरसत्त्वे सोदरासोदरौ तुल्यव
लभते । अन्यतरसत्वेऽन्यतरएव । संसृष्टिनान्त्वेकतमस्य संस
र्गोत्तरं विद्याद्यर्ज्जिते सहजतोऽविभक्तेऽप्यर्ज्जकस्य द्व्यंशित्वं संसृ
ष्टान्तराणामेकैकांशित्वमिति । प्रकाशे । स्थावरं द्विपदं चैव
यद्यपि स्वयमर्ज्जितं । असम्भूय सुतान्सर्व्वान्न दानं न च विक्रयः ॥
ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः । वृत्तिञ्च तेऽभि
काङ्क्षन्ति वृत्तिलोपो विगर्हितः ॥ अस्यापवादमाह । एकोऽ
पि स्थावरे कुर्य्याद्दानाधमनविक्रयं । आपत्काले कुटुम्बार्थे
धर्म्मार्थे च विशेषतः ॥ विभक्तस्तुऽपि स्थावरस्य तत्साधारण्या
मापदि तत्कन्यादानाद्यर्थं वा देयं वा विक्रेयमित्यर्थः ।
यत्तु विभक्ताअविभक्तावा दायादाः स्थावरे समाः । एकोह्य
नीशः सर्व्वत्र दानाधमनविक्रये ॥ इति विभक्तानामपि यत्रांश
परिच्छेदोन जातस्तत्साधारणमेव तिष्ठति सेन तत्रैकोऽनीशः

पृथग्भूतेषु स्वतन्त्रत्वस्य सिद्धिरेवेत्येतत्परं । विभक्तोऽस्मि
भक्तत्वसंशये तन्निरासाय विभक्तस्याप्यनुमतिस्तत्र कारयितव्या
इत्येतत्परमित्यन्ये । यत्तु स्वग्रामज्ञाति सामन्तदायादानुम
तेन च । हिरण्योदकदानेन षड्भिर्गच्छति मेदिनीति तदपि
ग्रामदायादज्ञात्यनुमतिर्दानप्रकाशनार्थं सामन्तानुमतिः सी
माविवादनिरासार्थं हिरण्योदकदानञ्च स्थावरे विक्रयो नास्ति
कुर्य्यादाधिमनुज्ञयेत्यादिनिषेधाद्भूमिं यः प्रतिगृह्णाति यश्च
भूमिं प्रयच्छति । उभौ तौ पुण्यकर्म्माणौ नियतं स्वर्गगामि
नावित्यादिदानप्रशंसनाच्च विक्रये कर्त्तव्ये सहिरण्यमुदकं दत्वा
दानरूपेणैव विक्रयः कार्य्य इत्येतत्परं ॥

अथ विभागनिर्णयः ॥ तत्र नारदः विभागधर्म्मसन्देहे दा
यादानां विनिर्णयः । ज्ञातिभिर्भागलेख्येन पृथक्कार्य्यप्रवर्त्तना
त् ॥ भ्रातॄणामविभक्तानामेको धर्म्मः प्रवर्त्तते । विभागे सति ध
र्म्मोऽपि भवेत्तेषां पृथक् पृथक् ॥ दानग्रहणपश्वन्नगृहक्षेत्रपरि
ग्रहाः । विभक्तानां पृथक् ज्ञेयाः पाकधर्म्मागमव्ययाः ॥ सा
क्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्य्युर्ना
विभक्ताः परस्परं ॥ येषामेताः क्रिया लोके प्रवर्त्तन्ते स्वरि
क्थतः । विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् ॥ विभागरूपो
धर्म्मो विभागधर्म्मः ज्ञातयो विभागसाक्षिणः भागलेख्यं भागप
त्रादि पृथक्कार्य्यं पृथगायव्ययादि विभागानन्तरीयकं ध
र्म्मो वैश्वदेवादिक्रिया तथा परस्परवैरपक्षेण दानं ग्रहणं
पशुक्रयादि अर्थोत्पादनं गृहञ्च पृथक् क्षेत्रञ्च पृथक् परि

ग्रहोपलम्भकादेः पाकधर्म्मः पार्व्वणादिः आगमोधनार्ज्जनादिः व्ययोधनविनियोगः तथैकस्य ऋणादिप्रयोगे अपरः साक्षी चेत् । प्रतिभूश्चेत् एकेन दत्तमपरो गृह्णाति चेत्तदा तौ परस्परं विभक्तौ ज्ञेयौ । याज्ञवल्क्यः विभागस्य तु सन्देहे ज्ञातिसाक्ष्यभिलेख्यकैः । विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतुकैः ॥ यौतुकैः पृथग्भूतैः युअमिश्रणे इत्यस्य धातोरनुसारात् तेनामिश्रैर्गृहैः क्षेत्रैश्च विभागभावना ज्ञेया इत्यर्थः अनन्यथासिद्धमिदं विभागमर्थापयतीति भावः । तथा भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तत्स्मृतं ॥ एतेषां विभागात्प्राक् परस्परं प्रातिभाव्यादिव्यवहारोनेत्यर्थः । ननु जायापत्योर्व्विभागो न विद्यत इत्यापस्तम्बवचनात्तयोर्व्विभागप्रसङ्गएव नास्तीति चेत् तौ जायापती अग्निमादधीयातामित्यादिना अग्न्याधाने सहाधिकारित्वात् । तथा मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं ॥ तथा पत्नी आज्यमवेक्षते यजमानोवेदं बध्नाति ॥ इत्यादि श्रवणात्तदाधानजन्याग्निसाध्यकर्म्मसु श्रौतेषु तथा कर्म्म स्मार्त्तं विवाहाग्नावित्यादि स्मरणात् जायापत्युभयसाध्यविवाहाग्निसाध्येषु स्मार्त्तेषु कर्म्मसु आवसथ्याग्निहोत्रेषु च तयोः साहित्येनाधिकारः तथैव पुण्यपापजफलेष्वपि तयोः साहित्यं तत्प्रकरणएव दिविज्योतिरमरमारभेतामित्यादि श्रवणात् न तु तदन्यसाध्येष्विष्टापूर्त्तेषु धनविभागस्तु तयोर्नास्तीति वाक्यार्थस्य शङ्कापि नास्ति आपस्तम्बवचनस्य इच्छाप्रकर

णे आम्नानात् पाणिग्रहणाद्धि सहत्वं कर्म्मसु तथा पुण्यपुण्यफलेषु चेति तद्वाक्यशेषात् । पत्न्यधिकरणे पत्न्या अपि धने स्वत्वमिति तस्या अपि तर्हि पत्या सह विभागो भवेत् यदि शास्त्रनिषेधो न स्यादिति चेन्नैवं । अधना स्त्रय एवैते भार्य्या दासस्तथा सुतः इत्यादिना तस्या अधनो मेऽदित्यवेहि । पत्न्यधिकरणन्तु द्रव्याभावे साहित्येनाधिकारविरुद्धा न तु तदधिकरणे योषिदधनत्ववचनबाधः तस्य न्यायत्वेन वचनाबाधकत्वात् विभागस्तु दम्पत्योः पत्न्यः कार्य्याः समांशिका इति वचनादिति रत्नाकरः । वृहस्पतिः पृथगायव्ययधनाः कुशीदञ्च परस्परं । वणिक्पथञ्च ये कुर्य्युस्ते विभक्ताः परस्परं ॥ येऽन्योऽन्यक्रयादिव्यवहारं कुर्वन्ति तेऽन्योन्यं विभक्ता वेदितव्या इत्यर्थः ॥

विभक्तलक्षणमाह ॥ नारदः यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः । पृथक्कर्मगुणोपेता न चेत्कार्य्येषु सङ्गताः ॥ विभक्ता येन संसृष्टास्तदा तेषां वैश्वदेवादिधर्माः कुशीदादिक्रिया परिपालनादिकं कर्म शुश्रूषादिगुणः एतत्सर्व्वं पृथक्कर्तुमर्हतीत्यर्थः ॥

विभागफलमाह ॥ स एव स्वभागान् यदि ते दद्युर्व्विक्रीणीयुरथापि वा । कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥

इति विवादचिन्तामणौ दायभागप्रकरणं ॥

अथ क्रियाबलाबलं ॥ तत्र याज्ञवल्क्यः सर्व्वेष्वेव विवादेषु बल-

त्युत्तरा क्रिया। आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा॥
क्रियाऽत्र समानजातीया अतएव वृहस्पतिरपि द्विकेनार्थसमा
हाय प्रपन्नः पश्चकन्तु यः। तासं तत्र प्रमाणं स्यात्पश्चिमं यदि
निश्चितं॥ अस्यार्थः द्विकप्रतवृद्या प्राग्धनमादाय त्वधिकः कथा,
स्वकार्यतया पञ्चकं प्रतश्चेदङ्गीकरोति तदा पश्चिमं प्रमाणं उ
त्तरा क्रिया प्रमाणमिति अनयोश्च क्रिययोर्वृद्धिव्यवस्थात्वेन
साजात्यं उत्तरक्रियाबलवत्त्वमौत्सर्गिकं अस्यापवादः आध्या
दौ तेन पुनराहितं पुनर्दत्तं पुनर्विक्रीतञ्च निवर्त्यमित्यर्थः। उप
लक्षणञ्चैतत् तेन दत्त्वा विक्रीतं विक्रीय वा दत्तं निवर्त्यं अस्वा
मिकृतत्वाविशेषात्। अतएव अस्वामिना कृतो यस्तु दायो विक्र
य एव वा। अकृतः स तु विज्ञेयो व्यवहारो यथास्थितिः॥ न्या
सि उत्तरोत्तरवत्त्वेन प्राबल्य. शिथिलोभवेत्। यः पश्चिमक्रि
याकारः सपूर्वादबलवत्तरः॥ न्यास कृत्वा ततश्चाधिं कृत्वा वाधिं
करोति यः। विक्रयं वा क्रिया तत्र पश्चिमा बलवत्तरा॥ वन्धो
ऽत्र व्यवस्था। तेन पूर्वव्यवस्था दुर्बला उत्तरा क्रिया बलवती भ
वतीत्यर्थः। इदमेवोदाहरति न्यासमित्यादि प्रथमं न्यासं उ
त्तरश्चाधिः प्रथमस्याभियुक्तोविक्रयः अपवदतीत्यर्थः। न्या
सोधारणमात्रं आधिः परवशीकरणं अनयोराधिर्बलवान्।
आध्यपेक्षया स्वत्वध्वंसफलिका क्रिया विक्रयादिरूपा बल
वती न तु वन्धकः तदजनकोबलवानिति विक्रयादेः पूर्वस्वत्व
ध्वंसकस्य पुनः करणे प्रथमोबलवान्। आध्यादेः पूर्वस्वत्व
ध्वंसाजनकस्य च पुनः करणेऽप्येवं। पूर्वस्वत्वध्वंसाजनकतत्त्वान

कयोस्तु परमोपलत्वानिति समुदायार्थः एवमेव व्याख्येयं व्यवहारोऽप्येवमिति रत्नाकरोऽपि आधिनिक्षेपदानाधान मारा पैार्वापर्य्याऽनिश्चये त्वाह स एव । कृतश्चिदेकस्मिन् दिवसे निक्षे वाधिप्रतिग्रहं । त्रयाणामपि सन्दिग्धे कार्य्या तत्र विचारणा ॥ त्रीण्येव हि प्रमाणानि विभजेरन् यथांशतः उभौ चार्थानुरूपेण विभागेन परिग्रहः ॥ आधिधर्तृक्रेतृसम्प्रदानैस्तु वस्तु समांशेन विभज्य ग्राह्यमित्यर्थः । आधिधर्त्तुरंशाभावः बलवता माधेर्हीनबलत्वादिति हलायुधः ॥

अथ द्यूतसमाह्वयौ ॥ तत्र मनुः अप्राणिभिर्यत्क्रियते तल्लो [illegible]तमुच्यते । प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥ अप्राणिभिः पाशकाद्यैः । बृहस्पतिः अन्योन्यप्रगृहीतास्तु पक्षिमेषमृगादयः । प्रहरन्ते कृतपणास्तं वदन्ति समाह्वयं ॥ मनुः प्रत्यक्षमेतत्तास्कर्य्यं यद्देवनसमाह्वयौ । तयोर्नित्यं प्रतीघाते नृपतिर्य्यत्नवान् भवेत् ॥ द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत् । तान्सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥ कात्यायनः द्यूतं नैव तु सेवेत क्रोधलोभविवर्द्धकं । अशास्त्रगमनं क्रूरं नराणां द्रव्यनाशनं ॥ श्रुतं द्यूतात्कलिं स्वन्नाद्विषं सर्पमुखादिव । तस्माद्राजा निवर्त्तेत विषये व्यसनं हि तत् ॥ बृहस्पतिः द्यूतं निषिद्धं मनुना सत्यशौचधनापहं । तत्प्रवर्त्तितमन्यैस्तु राजभागसमन्वितं ॥ सभिकाधिष्ठितं कार्य्यं तस्करज्ञापकं हितत् । एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये ॥ द्यूतं प्रायशः निषिद्धं अन्यैस्तु तस्करनिरूपणार्थं तद्विहितं तदपि सभिका

[illegible]राजपुरुषकृत्यर्थः । याज्ञवल्क्यः [illegible]कमुखं कार्यं तस्कर
ज्ञानकारणात् । एष एव विधिर्ज्ञेयः [illegible]द्यूते समाह्वये ॥
एकमुखं सभिकाख्यराजपुरुषाधि[illegible]स्पतिः द्वन्द्वयुद्धे
न यः कश्चिद्दत्तवान् [illegible]भुयात् । [illegible]देयोयस्तु
न परिकल्पितः ॥ [illegible] अकाम[illegible]ज्ञाः कूटदे
विनः ॥ [illegible] कर्त्तव्यः । नारदः अनिर्दिष्ट
[illegible] यो राज्ञा द्यूत [illegible] मानवः । न स तस्माज्जयात्कामं
[illegible] सोऽर्हति ॥ [illegible] सक्तं यश्च यचाऽप्यविदितं नृपे ।
तथापि [illegible] मस्तापि सोऽर्हति ॥ अथ वानुमत्
[illegible] भोज्याक्षपानानि खल्वान्यान्यानि
[illegible] दीव्येत्प्रसङ्गन्तु विवर्जयेत् ॥ विष
[illegible] विनः पापा राजभागहराश्च ये ।
[illegible] सि कितवाः स्मृताः ॥ विष्णुः द्यूते
[illegible] धिदेविनां सन्दंशच्छेदः ॥ [illegible]
[illegible] । याज्ञवल्क्यः राज्ञा सचिह्न नि
[illegible] । दण्डचिह्नसन्दंशच्छेदकरच्छे
[illegible]नामपराधल[illegible]घवगौरवानुसारे
[illegible]र्ज्जिता[illegible] येन रोनानुपाल
[illegible]पर राजशासनं ॥
अथ [illegible] [illegible]त्र मनुः तदर्थं सर्व्वभूतानां
[illegible] गोप्तारं [illegible]जमयं दण्डमसृजत्पूर्व्वमीश्वरः ॥
[illegible] सर्व्वाणि [illegible]णि चराणि च । भयाद्भोगाय

क्ष्यन्ति स्वधर्मान्न स[illegible]ा च ॥ तं देशकालौ शक्तिञ्च विद्याञ्चावे
क्ष्य तत्त्वतः । [illegible]तः सम्प्रणयेन्नरेष्वन्यायवर्त्तिषु ॥ स
राजा पुरुषो[illegible] शासिता च सः । चतुर्णामाश्रमा
णाञ्च धर्म[illegible]॥ दण्डः शास्ति प्रजाः सर्व्वा दण्ड
एवाभिरक्ष[illegible]जागर्त्ति दण्डं धर्मं विदुर्बुधाः ॥
[illegible] दण्डः सुप्रणु[illegible]यति प्रजाः । असमीक्ष्य प्रणी
समीक्ष्य सधृतः सम्यक् सर्व्वार[illegible] न प्रणयेद्राजा दण्डं दण्ड्ये
ष्वतन्द्रितः ॥ शूले मत्स्यानिवाहिं[illegible]र्बलान् बलवत्तराः । अथा
तु विनाशयति सर्व्वतः ॥ यदि[illegible]
स्वाकः पुरोडाशं श्वावलिह्याद्धवि[illegible]वेत्तथा ॥ स्वाम्यञ्च न स्यात्क
स्मिंश्च प्रवर्त्तेताऽवरोत्तमं । स[illegible]र्व्वो दण्डजितो लोको दुर्लभो हि
नरः शुचिः ॥ दण्डस्य हि भय[illegible]त्सर्व्वं जगद्भोगाय कल्पते ।
देवदानवगन्धर्व्वा रक्षांसि पतगो[illegible]रगाः ॥ तेऽपि भोगाय कल्प
न्ते दण्डेनैव निपीडिताः । दुष्येयु[illegible] सर्व्ववर्णाश्च भिद्येरन्सर्व्वसेत
वः ॥ सर्व्वलोकप्रकोपश्च भवेद्दण्ड[illegible]स्य विभ्रमात् । यत्र श्यामो लो
हिताक्षो दण्डश्चरति पापहा ॥ प्र[illegible]त्र न मुह्यन्ति नेता चे
त्साधु पश्यति । दण्डस्यास्य प्रणेत[illegible]रं राजानं सत्यवादिनं ॥
समीक्ष्यकारिणं [illegible]ज्ञं धर्म्मकामा[illegible]र्थकोविदं । तं राजा प्रणय
न्सम्यक् त्रिवर्गेणाभि[illegible]र्द्धते ॥ का[illegible]ात्मा विषयः क्षुद्रो दण्डेनैव
निहन्यते । दण्डो हि सु[illegible]हत्तेज[illegible]र्दुर्द्धरश्चाकृतात्मभिः ॥ ध
र्माद्विचलितं हन्ति नृपमेव [illegible]भवं । सर्व्वतोऽधर्मषड्भागो भ
वत्यस्य ह्यरक्षतः ॥ यदधीते यद्यजते यद्ददाति यदर्चति ।
तस्य षड्भागभाग्राजा सम्यग्भवति रक्षणात् ॥ रक्षन्धर्मेण भू

तानि राजा बध्यांश्च घातयन् । यजतेऽहरहर्यज्ञैः सहस्रशत
दक्षिणैः ॥ तदर्थमित्यादि पूर्वोक्तराजप्रयोजनार्थं । समीक्ष्येति
शास्त्रानुसारेण सधृतः श्रेयसे अन्यथा नेतुरनिष्टाय सम्भवेदि
त्यर्थः । विभ्रमोऽन्यथाकरणमकरणञ्च राजानं भूपं तेनभूप
स्येन तत्प्रणयनेऽधिकारइत्युक्तं । बान्धवोऽत्र पुत्राः । तथा
स्तेनोयस्य पुरे नास्ति नाऽन्यस्त्रीगोन दुष्टवाक् । न साहसिकद
ण्डोघ्न स राजा शक्रलोकभाक् ॥ एतेषां निग्रहोराज्ञः पञ्चा
नां विषये स्वके । साम्राज्यकृत्सजात्येषु लोके पूज्योभवेन्नृपः ॥
इति श्रीवाचस्पतिमिश्रविरचितोविवादचिन्तामणिः समाप्तः ॥

सारसुधानिधियन्त्रे कलिकातायां पुरेप्रकादेशात् ।
पण्डितवरपरिशुद्धो विवादचिन्तामणिः सम्यक् ॥ १ ॥
चन्द्राद्रुवसुचन्द्रप्रमितेऽब्दे मुद्रिताभवन्माघे ।
श्रीरामचन्द्रविद्यावागीशपरिष्कृता यत्नात् ॥ २ ॥